नस्यादिषु विधिं कृत्स्नमवेक्षेतार्दितोदितम् ॥ २३ ॥

वायुके प्रतिश्यायमें घृतका पान यथाक्रम करना चाहिये यह घृत पाँचों लवण और प्रथम गण (विदारिगंधादि) से सिद्ध किया हुआ चाहिये और नस्यादिके लिये समस्त विधि अर्दित वायुके अनुसार करना उचित है ॥ २३ ॥

पित्तज प्रतिश्यायका यत्न ।

पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः श्रृतम् ॥ परिषेकान्प्रदेहांश्च कुर्यादपि च शीतलान् ॥ २४ ॥ श्रीसर्जरसपत्तंगप्रियंगुमधुशर्करैः ॥ द्राक्षामधूलिकागोजीश्रीपर्णीमधुकैस्तथा ॥ २५ ॥ युज्यंते कवलाश्चात्र विरेको मधुरैरपि ॥ धवत्वक्क्षीफला श्यामा बिल्वकैर्मधुकेन च ॥ २६ ॥ श्रीपर्णीरजनीमिश्रैः क्षीरे दशगुणे पचेत् ॥ तैलं कालोपपन्नं तन्नस्यं स्यादनयोर्हितम् ॥ २७ ॥

(श्लो० २२) केचिदत्र एवं योजयंति मृदुतां विदित्वा प्राग्लक्षणेषु गतेषु उक्तमादिशेत् ।

(श्लो० २५) अस्य श्लोकस्यान्वयः अग्रिमश्लोकोक्तेन 'युज्यंते कवलाः' इत्यनेन सह कार्यः । श्रीः कमलं, सर्जः पीतशालः, रसो बोलः, अन्ये श्रीसर्जरसः गुग्गुलुः इत्याहुः । मधूलिका गोधूमभेदः, अन्ये गुडूचीमाहुः । गोजी गोजिह्वानामौषधं, श्रीपर्णी काश्मरी । कवलाश्च गंडूषभेदाः (इति डल्हनः)

यदि पित्तका अथवा रुधिरका प्रतिश्याय हो तो उसमें मधुर द्रव्योंसे पकाया हुआ घृत पान करे तथा परिषेक और प्रदेह (लेप) ये भी शीतलही करने चाहिये॥ ॥ २४ ॥ श्री (कमल), सर्जरस (रालका वृक्ष और बोल अथवा श्रीसर्जरसका अर्थ कई गूगल करते हैं), पत्तंग, प्रियंगु (गोंदी अर्थात् सिपिस्तां), शहद और खांड, दाख (मुनक्का), मधूलिका (गोधूम अर्थात् गेहूं या गेहूंका चापट, मधूलिकाका अर्थ कई गिलोय करते हैं), गोजी (गोजिह्वा अर्थात् गाजुबां) और काश्मरी तथा मुलेठी इनका कवल धारण करे (यहां कवलका अभिप्राय एक प्रकारका गंडूष है अर्थात् गुटकी मुँहमें भर भरकर पीलेवे) और मधुर द्रव्योंके योगसे विरेचन देवे, धवकी छाल, त्रिफला, निसोथ, तिल्वक (लोध) और मुलेठी इनमें खंभारी और हलदी मिलाकर दश गुने दूधमें तैल सिद्ध करे वह तैल उस समयका ताजा बना होवे इसकी नस्य देना इन दोनों प्रतिश्यायोंमें हित है ॥ २५ ॥ २६ ॥ २७ ॥

कफज प्रतिश्यायका यत्न ।

कफजे सर्पिषा स्निग्धं तिलमाषविपक्वया ॥ यवाग्वा वामयेद्धांतः कफघ्नं क्रममाचरेत् ॥ २८ ॥ उभे बले बृहत्यौ च विडंगं सत्रिकंटकम् ॥ श्वेतामूलं सहां भद्रां वर्षाभूं चात्र संहरेत् ॥ २९ ॥ तैलमेभिर्विपक्वं तु नस्यमस्योपकल्पयेत् ॥ ३० ॥ सरलाकिणिही दारुनिकुंभेंगुदिभिः कृताः ॥ वर्तयश्चोपयोज्यास्युर्धूमपाने यथाविधि ॥ ३१ ॥

कफके प्रतिश्यायमें रोगीको घृतसे स्निग्ध करके तिल, उडद इनसे पकाई हुई यवागूसे (उसमें वामक द्रव्य डालकर) वमन करावे और वमन कराये पीछे कफनाशक यत्न करने चाहिये (कफनाशक भोजनादिक) देने चाहिये ॥ २८ ॥ दोनों बला (बला और अतिबला) तथा छोटी बडी दोनों कटेली, विडंग, गोखरू, श्वेत स्यंदकी जड़, सहा (शालपर्णी), भद्रा (इसे कोई काश्मरी और कोई पीपली कहते हैं) और सांटी इनको एकत्र करे ॥ २९ ॥ फिर इनसे तैल पकावे और उस तैलकी नस्य देवे ॥ ३० ॥ तथा सरला (निशोथ), कटभी, देवदारु, दंती और हिंगोट इनकी बत्ती बनाकर उससे यथाविधि धूमपान करावे ॥ ३१ ॥

सन्निपातज प्रतिश्यायका यत्न ।

सर्पींषि कटुतिक्तानि तीक्ष्णा धूमाः कटूनि च ॥ भेषजान्युपयुक्तानि हन्युः सर्वप्रकोपजम् ॥ ३२ ॥ रसांजने सातिविषे मुस्तायां भद्रदारुणि ॥ तैलं विपक्वं नस्यार्थे विदध्याच्चात्र बुद्धिमान् ॥३३॥

कटुतिक्त द्रव्योंसे सिद्ध किये घृत, तीक्ष्ण धूमपान तथा कटुक औषध उपयोग किये हुए सन्निपातके प्रतिश्यायको नष्ट करनेवाले होते हैं ॥ ३२ ॥ रसोत, अतीस, नागरमोथा और देवदारु इनसे पकाये हुए तैलसे बुद्धिमान् वैद्य यहां नस्य देवे ॥ ३३ ॥

मुस्ता तेजोवती पाठा कट्फलं कटुका वचा ॥ सर्षपाः पिप्पली-मूलं पिप्पल्यः सैंधवाग्निकौ ॥ ३४ ॥ तुत्थं करंजबीजं च लवणं भद्रदारु च ॥ एतैः कृतं कषायं तु कवले संप्रयोजयेत् ॥ ३५ ॥ हितंमूर्द्धविरेकेण तैलमेभिर्विपाचितम् ॥ ३६ ॥

नागरमोथा, तेजवल, पाढ, कायफल, कुटकी, वच, सरसों, पीपलामूल, पीपल, सैंधानमक, चित्रक ॥ ३४ ॥ नीलाथोथा, करंजके बीज, लवण (यहां कई 'लवंग' ऐसा पाठांतर मानते हैं) और देवदारु इनका काथ करके उससे कवल धारण करे (मुखमें रखकर कुल्ले कर दे) (इसमें 'अग्निक'का अर्थ कई अजमोद करते हैं) ॥ ३५ ॥ और इन्हीं औषधोंसे पकायाहुआ तैल शिरोविरेचनके लिये हितकारक है ॥ ३६ ॥

क्षीरंमर्द्धजले काथ्यं जांगलैर्मृगपक्षिभिः ॥ पुष्पैर्विमिश्रं जलजैर्वातघ्नैरौषधैरपि ॥ ३७ ॥ हिमे क्षीरावशिष्टेऽस्मिन्घृतमुत्पाद्य यत्नतः ॥ सर्वगंधा सिताऽनंता मधुकं चंदनं तथा ॥ ३८ ॥ अवाप्य विपचेद्भूयो दशक्षीरं तु तद्घृतम् ॥ नस्यंप्रयुक्तमुद्रिक्तान्प्रतिश्यायान् व्यपोहति ॥ ३९ ॥ यथास्वं दोषशमनैस्तैलं कुर्य्याच्च यत्नतः ॥ ४० ॥

दूधमें दूधके बराबर या उससे आधा जल और जंगली जीवों और पक्षियोंका मांस और कमलके पुष्प तथा वायुनाशक औषधें डालकर पकावे ॥ ३७ ॥ जब दूध मात्र शेष रहजावे तब ठंढा करके उसे मथकर घृत निकाल लेवे फिर उस घृतमें सर्वगंधा (एलादिगण), मिश्री, उत्पल सारिवा, मुलेठी और चंदन ॥ ॥ ३८ ॥ इन सबको डालकर और दशगुना दूध डालकर फिर पकावे घृतमात्र शेष रहनेपर उतार लेवे इसकी नस्य देवे तो बढेहुए प्रतिश्यायोंको भी यह नष्ट करदेता है ॥ ३९ ॥ अथवा जिस दोषका जहां उद्रेक देखे उसी दोषकी शांति करनेवाली औषधोंसे तैल सिद्ध करके उपयोगमें लाया करे ॥ ४० ॥

(श्लो० ३७) क्षीरमित्यादि क्षीरं जांगलमांसादिभ्योऽष्टगुणमर्द्धजलेन समजलेन वा क्षीरार्द्धजलं जांगलैर्मृगपक्षिभिः एणादिभिर्लावादिभिश्च (श्लो० ३८) सर्वगंधा एलादिपरिपीठिताः (इति नि० सं०)

समूत्रपित्तास्तूदिष्टाः क्रियाः कृमिषु योजयेत् ॥
यापनार्थं कृमिघ्नानि भेषजानि च बुद्धिमान् ॥ ४१ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शालाक्ये चतुर्विंशोऽध्यायः ॥ २४॥

यदि सूक्ष्म कृमि उत्पन्न होगये हों तो उनके यापन (दबने) के लिये गोमूत्र और पित्त (गोरोचन) तथा कृमिनाशक औषधें इन्हीं पूर्वोक्त योगोंमें मिलाकर बुद्धिमान् वैद्य उपयोग करे ॥ ४१ ॥

(वक्तव्य) कृमियुक्त प्रतिश्याय पहले असाध्य कहचुके हैं इस लिये यह यत्न यापनार्थ कहागया है ॥

डाक्टरीमें प्रतिश्यायको "कैटराह" (Cattarrh) कहते हैं और यूनानी हकीम नज़लेके भेदसे "ज़ुकाम" कहते हैं ॥

परिशिष्ट ।

नज़ल या नज़लेका बयान।

नज़लेका अर्थ टपकना या गिरना है और नज़लाभी इसीका नाम है मनुष्य जो खाता पीता है वह मेदेमें पकता है उसमेंसे जो अवखरे (परमाणु) उठते हैं वे ऊपरको हलक़ और शिरकी तरफ चढते हैं यदि उनका ठीक गाढा मल बनकर बराबर नाकसे निकल जाया करे तो ठीक है नहीं तो यह अनेक बीमारी पैदा करनेवाला होता है जैसे जियादह खींचकर नाककी तरफ़ बहना ज़ुक़ाम कहलाता है और छातीकी तरफ गिरे तो सिल (उरःक्षत) करता है अर्थात फेंफड़ोंमें जखम पैदा कर देता है, इसके सिवाय जिस जिस जगह यह गिरता-है या रुजू होता है वहां ही कुछ बीमारी पैदा करता है जैसे आँखोंकी तरफ रुजू होनेसे नज़लुलमा (पानी उतर आना) कहते हैं पैदाकरे और हलक़की तरफ रुजू हो तो खराश (खांसी) वगैरह पैदा करे इत्यादि यह नज़ूल शरद और गरम दोनों भांतिका प्रायः हो सकता है, बल्कि कइयोंकी राय है कि यह नज़ूलके अवखरे ही तिरछे फैल कर मसामोंकी तरफ रुजू होते हैं तब बुखार पैदा करते हैं, प्रयोजन यह है कि ये नज़ूलके अवखरे (परमाणु या बाष्प) अवश्य अनेक रोग करते हैं, इनका नीचे मलकी तरफ रुजू होना या नाकसे निर्विकार निकलनाही ठीक है और वैद्यको भी ऐसेही यत्न करने चाहिये जिसे या तो ये अवखरे उठें ही कम और जो उठें वे ठीक नाकसे निकल जावें परंतु कम उठनेमें ऐसी तजवीज़ करे जिससे हाज़मेंमें फ़ितूर न पडे हमारे वैद्यकशास्त्रमें जहांतहां वातानुलोमन करना लिखा है उसका यही अभिप्राय है, वैद्यकके मतसें त्रिफला अर्थात् हरीतकी, बहेडा और आंवले यह इसके अनुलोमन करनेके लिये

उत्तम है यूनानीके कायदेसे धनियां, नागकेसर, गुलकंद, बनफशा, सौंफ वगैरह नजूलके अवखरे ऊपर दिमाग़की तरफ़ चढनेसे रोकनेवाली हैं और दिमागको इससे साफ़ करनेके लिये उस्तखद्दूस बहुत अच्छा है।

इति पं० मुरलीधरविरचितसुश्रुतसंहिता० भा०टी० उत्तरतन्त्रे शालाक्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

पंचविंशोऽध्यायः २५.

अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम शिरके रोगोंके विज्ञानविषयक अध्यायका व्याख्यान करते हैं।

शिरके रोगोंकी संख्या और नाम।

शिरो रुजति मर्त्यानां वातपित्तकफैस्त्रिभिः ॥ सन्निपातेन रक्तेन क्षयेण कृमिभिस्तथा ॥ १ ॥ सूर्यावर्तानंतवाताद्धावभेदकशंखकैः ॥ एकादशप्रकारस्य लक्षणं संप्रवक्ष्यते ॥ २ ॥

मनुष्योंके शिरमें रोग वायुसे, पित्तसे, कफसे तथा तीनों दोषोंके सन्निपातसे, रुधिरसे और कृमियोंसे होता है ॥ १ ॥ तथा एक रोग सूर्यावर्त और एक अर्द्धावभेदक, एक अनन्तवात और एक शंखक इस भांति ११ प्रकारके शिरोरोग होते हैं इनके लक्षण अगाडी कहेजाते हैं ॥ २ ॥

वातज शिरोरोग।

यस्यानिमित्तं शिरसो रुजश्च भवंति तीव्रा निशि चातिमात्रम् ॥ बंधोपतापैश्च भवेद्विशेषः शिरोभितापैः स समीरणेन ॥ ३ ॥

जिसके विना किसी कारणहीके (अकस्मात्) शिरमें पीडा (दरद) होजाया करे और रातको विशेष करके अधिक वेदना होवे तथा बांधने और तपानेके यत्नोंसे विशेष होवे ऐसा शिरोरोग वायुका होता है ॥ ३ ॥

(वक्तव्य) इसमें जो "बंधोपतापैश्च भवेद्विशेषः" पाठ है तिसमें " विशेष " पदके अर्थमें बडी गडबड है क्योंकि प्रत्यक्षमें तथा अन्य आर्ष पुस्तकोंसे यह नहीं पायाजाता कि वातिक शिरोरोग बंध और उपतापसे विशेष होता है इसीसे डल्हनमिश्र विशेषका अर्थ यहां "उपशम" करते हैं और भावमिश्र अपने भावप्र-

---

(श्लो० ३) अनिमित्तम् अकस्मात् विशेषः उपशमः (इति डल्हनः) भावमिश्रस्तु " बंधोपतापैश्च भवेद्विशेषः" इत्यत्र 'बंधोपतापैः प्रशमो भवेच्च' इति पाठांतरमकरोत् । केचित् भवेद्विशेषः इत्यत्र 'भवेद्धि शेषः' इति मन्यंते, तल्लेखभ्रमादेव 'भवेद्विशेषः' इति संजायते इति मन्यंते । अत्र शेषः अवशिष्टः अल्पो भवेदित्यर्थः ।

काशमें " बंधोपतापैः प्रशमो भवेच्च " ऐसा पाठांतर मानते हैं और कई "भवेद्धि शेषः " ऐसा पाठ मानते हैं ॥

पित्तज शिरोरोग।

यस्योष्णमंगारचितं यथैव भवेच्छिरो धूमवती च नासा ॥
शीतेन रात्रौ च भवेद्विशेषः शिरोभितापः स तु पित्तकोपात् ॥ ४ ॥

जिसका शिर गरम हो, अंगारोंका ढेर जैसा हो और नाकसे धुवांसा घुटा रहे और शीतसे तथा रातको विशेष होजावे ऐसा शिरोरोग पित्तके कोपसे होता है ॥ ४ ॥

(वक्तव्य) यहां भी वही शंका होती है कि पित्तका शिरोरोग शीतसे और रात्रिमें विशेष कैसे होवे ? अस्तु यहां भी पूर्वोक्त प्रकारसे "विशेष" का अर्थ उपशम अर्थात् शांति जानना चाहिये अथवा "भवेत् हि शेषः" ऐसा मान लेना और 'भवेद्धि शेषः' का लेखभ्रमसे " भवेद्विशेषः " ऐसा पाठ होगया हो यही समझ लेना अथवा किसी अवस्थामें ऐसा भी होता हो कि पैत्तिक शिरदरद शीतसे बढ जावे और वातिक बंध उपतापादिसे बढ जावे क्योंकि यदि यह पाठ शुद्ध और सरलार्थक ऋषि धन्वंतरिजी प्रणीत है तो इसपर और कल्पनाही अनुचित है परंतु यदि ऐसा होता तो अन्य ग्रंथकार अवश्य इसका अनुसरण करते यहांभी भावमिश्रजीने पाठांतर किया है ॥

कफज और सन्निपातज शिरोरोग।

शिरो गलं यस्य कफोपदिग्धं गुरुं प्रतिष्टब्धमथो हिमं च ॥
शूनाक्षिकूटं वदनं च यस्य शिरोभितापः स कफप्रकोपात् ॥ ५ ॥
शिरोभितापे त्रितयप्रवृत्ते सर्वाणि लिंगानि समुद्भवंति ॥
रक्तात्मकः पित्तसमानलिंगः स्पर्शासहत्वं शिरसो भवेच्च ॥ ६ ॥

जिसके शिर व गल ये कफसे भरेहुएसे मालूम हों और भारीसे रुके हुएसे हों और छूनेमें शीतलता मालूम हो, नेत्रके डौले और मुँह सूझेसे दिखाई देवें तो ऐसा शिरका दरद कफके कोपसे होता है ॥ ५ ॥ "त्रिदोषके शिर दरदमें" सब दोषोंके लक्षण मिले जुले होते हैं । और रक्तजशिरोरोग (शिरके दरद) में पित्तके शिरोरोगके समान लक्षण होते हैं विशेष करके शिरको स्पर्श नहीं सुहाता यह बात अधिक होती है ॥ ६ ॥

(श्लो० ४) 'शीतेन रात्रौ च भवेद्विशेषः' इत्यत्र 'शीतेन रात्रौ च भवेच्छमश्च' इति पाठांतरं भावमिश्रेण कृतमस्ति ।

क्षयज शिरोरोग।

वसाबलासक्षयसंभवानां शिरोगतानामिह संक्षयेण ॥
क्षयप्रवृत्तः शिरसोभितापः कष्टो भवेदुग्ररुजोऽतिमात्रम् ॥
संस्वेदनच्छर्दनधूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति ॥७॥

जिनके शरीर (या शिर) की चरबी या कफ क्षीण होगये हों उनके क्षयसे जो शिरका दरद होताहै उसमें तीक्ष्ण वेदना होतीहै और वह कष्टसाध्य होताहै तथा यह दरद स्वेदन, वमन, धूमपान, नस्य और रक्तस्रावादिसे वृद्धिको प्राप्त होताहै (क्योंकि इन कर्षणयत्नोंसे क्षीणता उलटी अधिक होजाती है) ॥ ७ ॥

कृमिज शिरोरोग।

निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चांतः ॥
घ्राणाच्च गच्छेत्सलिलं सरक्तं शिरोभितापः कृमिभिः स घोरः ॥८॥

जिसका शिर बहुतही वेदनाको प्राप्त हो और भीतरसे खाये जानेकी भांति फरके (अर्थात् जैसे कोई नोचकर खाता हो और कुछ फरक २ करता हो ऐसा मालूम हो) और नाकमेंसे रुधिरयुक्त पानीसा निकले तो ऐसा शिरोरोग कृमियोंसे जानना (इसके मगजमें कीडे हैं ऐसा जानना) और यह व्याधि घोर होतीहै॥८॥

सूर्यावर्तके लक्षण।

सूर्योदयं या प्रतिमंदमंदमक्षिभ्रुवं रुक्समुपैति गाढम् ॥
विवर्द्धते चांशुमतां सहैव सूर्यापवृत्तौ विनिवर्तते च ॥ ९ ॥
शीतेन शांतिं लभते कदाचिदुष्णेन जंतुः सुखमाप्नुयाच्च ॥
तं भास्करावर्तमुदाहरंति सर्वात्मकं कष्टतमं विकारम् ॥ १० ॥

सूर्योदयके साथही जिसके आंखके ऊपरकी भ्रुकुटीपर मंद मंद वेदना होवे और ज्यों ज्यों सूर्य (दिन) चढता जावे त्यों त्यों वह वेदनाभी बढती जावे और दिन ढलनेपर वहभी कम होती चलीजावे ॥ ९ ॥ कभी यह व्याधि शीतसे शांत होती है, कभी मनुष्यको उष्ण (गरमवस्तु या गरमी) से सुख होताहै इस रोगको "सूर्यावर्त" कहते हैं और यह सब दोषोंसे उपजा हुआ कष्टसाध्य विकार होता है ॥ १० ॥

(वक्तव्य) सूर्यावर्तका विपरीत रोगभी होता है जो मध्याह्नमें शांत हो जावे और सूर्यके ढलनेके साथ बढे, रातको और प्रभातमेंभी हो यह उष्णसे शांतिको प्राप्त होता है।

(श्लो० १०) उष्णेन जंतुः सुखमाप्नुयाच्चेति योगात्सूर्यावर्तविपर्ययः कथितो बोद्धव्यः (इति डल्हनः)

अनन्तवातके लक्षण ।

दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटां सरुजां सुतीव्राम् ॥
कुर्वंति साक्षिभ्रुवशंखदेशे स्थितिं करोत्याशु विशेषतस्तु ॥ ११ ॥
गंडस्य पार्श्वेषु करोति कंपं हनुग्रहं लोचनजांश्च रोगान् ॥
अनंतवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम् ॥ १२ ॥

तीनों दोष दुष्ट होकर मन्या नामक प्रदेशको पीडित करके घाटा (ग्रीवाके पिछाडीके भाग) को तीव्र वेदना युक्त कर देते हैं और विशेष करके नेत्र, भ्रुकुटी और कनपटी इन स्थानोंमें वे दुष्ट दोष स्थिति करतेहैं ॥ ११ ॥ और गंडस्थलके पिछाडीको यह व्याधि कम्प पैदा करदेती है तथा हनुग्रह और नेत्रोंके अनेक विकार करदेती है इस व्याधिको "अनंतवात" कहते हैं यह त्रिदोषसे उपजाहुआ शिरोरोग है ॥ १२ ॥

अर्द्धावभेदक (आधाशीशी) के लक्षण ।

यस्योत्तमांगार्द्धमतीव जंतोः संभेदतोदभ्रमशूलजुष्टम् ॥
पक्षादशाहादथवाप्यकस्मात्तस्यार्द्धभेदं त्रितयाद्ब्रवीत् ॥ १३ ॥

जिसका आधा शिर पंद्रह दिनके अन्तरसे अथवा दश दिनके अंतरसे अथवा अकस्मात (बेकारण चाहे जब) दूखने लगे, भेदनकीसी पीडा और चमक, भ्रम तथा शूल ये शिरमें होजावें तो इसे "अर्द्धावभेदक" रोग कहते हैं और यह तीनों दोषोंसे होता है ॥ १३ ॥

शंखाख्य शिरोरोगके लक्षण ।

शंखाश्रितो वायुरुदीर्णवेगः कृतानुयात्रः कफपित्तरक्तैः ॥
रुजः सुतीव्राः प्रतनोति मूर्द्धि विशेषतश्चापि हि शंखयोस्तु ॥ १४ ॥
सुकष्टमेनं खलु शंखकाख्यं महर्षयो वेदविदः पुराणाः ॥
व्याधिं वदंत्युद्धममृत्युकल्पं भिषक्सहस्रैरपि दुर्निवारम् ॥ १५ ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे शालाक्ये पंचविंशोऽध्यायः ॥ २५ ॥

यदि वायु कफ, पित्त और रक्तके अनुगत उदीर्ण वेग होकर शंख (कनपटियों) में प्राप्त हो और शिरमें विशेषकर कनपटियोंमें तीव्र वेदना करे तो इसे वेदवित

(श्लो० ११) घाटा ग्रीवायाः पश्चाद्भागे (इति श० स्तो०) स्थितिं करोतीत्यत्रैकवचनेन त्रिषु काश्चिदेकः स्थितिं करोतीति भावः । विशेषतो वायुः स्थितिं करोतीति सिद्धान्तः ।

(श्लो० १४) कृता अनुयात्रा अनुगमनं येन स वायुरित्यर्थः ।

पुराने महर्षि वैद्य कष्टसाध्य "शंख" रोग कहते हैं यह व्याधि दारुण मृत्युक समान होती है, हजारों वैद्योंसेभी कठिनतासे निवारण होवे तो होवे ॥ १४ ॥ १५ ॥

डाक्टरीमें शिरके दरदको "सेफेलिलजिया" Cephalalajia कहते हैं और अनंतवातके लक्षण कुछ "कलूसहिस्ट्रीक्स" Clawus Hystericus से मिलते हैं और अर्द्धावभेदकको "हेमेक्रीमिया" Hemicrama कहते हैं और क्षयज शिरोरोगको "वरटीगो" Verti Go कहते हैं ॥

और यूनानी हकीम शिरके दरदको "सदाअ" कहते हैं इनके यहांभी इसकी बहुत किस्म हैं जैसे क्षयजको "जोफदिमागी" पित्तजको "दर्दसर सफरावी" और वातजको "सौदावी" व "रीही" कहते हैं, रक्तजको "दमवी" कहते हैं इत्यादि इनके यहां शिरदर्द सत्रह प्रकारका लिखाहै उन सबोंको ग्रन्थविस्तरभयसे हम यहांपर लिख नहीं सकते यदि उनके जाननेकी इच्छा हो तो उन्हींकी किताबोंमें देखो ॥

इति पं० मुरलीधरवि०सुश्रुतसं०भा०टी० उत्तरतंत्रे शालाक्ये पंचविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः २६.

अथातः शिरोरोगप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाड़ी अब हम शिरके रोगोंकी चिकित्साका व्याख्यान करते हैं ॥

वातज शिरोरोगका यत्न ।

वातव्याधि[3] विधिः कार्यः[4] शिरोरोगेऽनिलात्मके[1] ॥ पेयानुपानं सेवेत घृतं तैलमथापि वा ॥ १ ॥ मुद्गान्[11] कुलत्थान्[10] माषांश्च[9] खादेच्च[7] निशि[2] केवलान्[1] ॥ कटूष्णांश्च[4] ससर्पिष्कानुष्णं[6] चानु[5] पिबेत्पयः[12] ॥ पिबेद्वा[2] पयसा[1] तैलं[4] तत्कल्कं वापि[1] मानवः[3] ॥ २ ॥

वातके शिरोरोगमें वातव्याधिकी विधि करनी चाहिये और ऊपरसे पतली पेया पीना चाहिये और घृत अथवा तैल पीना उचित है ॥ १ ॥ मूंग, कुलथी, उड़द इनको केवलही रातको खाना चाहिये हाँ उनमें कटुक और गरम पदार्थ तथा घृत मिलाना उचित है इनको खाकर ऊपरसे गरम दूध पीना तथा दूध, तैल पीवे या दूधके संग तिलोंका कल्क पीवे ॥ २ ॥

वातघ्नसिद्धैः क्षीरैश्च सुखोष्णैः सेकमादिशेत् ॥ तत्सिद्धैः पायसैर्वापि सुखोष्णैर्लेपयेच्छिरः[1] ॥ ३ ॥ स्विन्नैर्वा मत्स्यपिशितैः

(श्लो० २) तत्कल्कं तिलकल्कमित्यर्थः । अत्र तच्छब्देन तैलस्य कारणीभूतस्य तिलस्यैव ग्रहणम् ।

कृसरैर्वा ससैंधवैः ॥ चंदनोत्पलकुष्ठैर्वा सुश्लक्ष्णैर्मगधायुतैः ॥ ॥ ४ ॥ स्निग्धस्य तैलं नस्यं स्यात्कुलीररसैसाधितम् ॥ वरुणादौ गणे क्षुण्णे क्षीरमर्द्धोदकं पचेत् ॥ ५ ॥ क्षीरशेषं च तन्मध्यं शीतं सारमुपाहरेत् ॥ ततो मधुरकैः सिद्धं नस्ये तत्पूजितं हविः ॥ ६ ॥ तस्मिन्विपक्के क्षीरे च पेयं सर्पिः सशर्करम् ॥ धूमं चास्य यथाकालं स्नैहिकं योजयेद्भिषक् ॥ ७॥ पानाभ्यंजननस्येषु वस्तिकर्मणि सेचने ॥ विदध्यात्त्रैवृतं धीमान्बलातैलमथापि वा ॥ ८ ॥ भोजयेच्च रसैः स्निग्धैः पेयाभिर्वा सुसंस्कृतैः ॥ ९ ॥

वायुनाशक द्रव्योंसे सिद्ध किये हुए निवाये दूधसे सेचन करना अथवा उन्हींसे सिद्ध किये हुए दूधका पायस (खीर या मावा) शिरपर निवाया २ लेप करना ॥ ॥ ३ ॥ अथवा मछलीके मांसको पकाकर उसका या खिचडी (तिल तंदुलकी) सैंधा नमक डालकर उसे शिरपर लेप करे (या बांध दे) अथवा चंदन, कमल, कूट और पीपल इनको गीला पीसकर लेप करे ॥ ४ ॥ कुलीर (केकडे) के रससे सिद्ध किया तैल नस्यमें उपयोग करे अथवा वरुणादि गणको थोडा कूटकर उसे दूध और दूधसे आधा पानी डालकर पकावे ॥ ५ ॥ जब दूधमात्र रहजावे तब मथकर घृत निकाल ले फिर उस घृतको मधुर (काकोल्यादि) गणसे सिद्ध करले और इसकी नस्य देवे (यह श्रेष्ठ है) ॥ ६ ॥ अथवा इन्हींसे सिद्ध किये दूधमें घृत और खांड मिलाकर पीना चाहिये तथा समयके अनुसार स्नेहका धूमपान करे ॥ ७ ॥ तथा पान, मर्दन, नस्य, वस्तिकर्म और सेचन इनमें त्रैवृत (निशोथका स्नेह अथवा घृत, वसा, मज्जा इनसे युक्त त्रैवृत तैल) उपयोग करे अथवा बलातैलका उपयोग करे ॥ ८ ॥ और स्निग्ध रसोंके संग अथवा पेयाओं करके संस्कार किये हुए भोजन करावे ॥ ९ ॥

पित्तज और रक्तज शिरोरोगका यत्न ।

पित्तरक्तसमुत्थानौ शिरोरोगौ निवारयेत् ॥ शिरोलेपैः ससर्पिष्कैः पारिषेकैश्च शीतलैः ॥ १० ॥ क्षीरेक्षुरसधान्याम्लमस्तुक्षौद्रसिताजलैः ॥ नलवञ्जुलकह्लारचंदनोत्पलपद्मकैः ॥ ११ ॥ शंखशैवालयष्ट्याह्वमुस्तांभोरुहसंयुतैः ॥ शिरःप्रलेपः सघृतैर्वसपैश्च तथाविधैः ॥ १२ ॥

पित्त और रुधिरसे उपजे हुए शिरके रोगोंको घृतयुक्त शीतल लेपों व परिषेकोंसे निवारण करना चाहिये ॥ १० ॥ दूध, ईखका रस, धान्याम्ल (एक भांतिकी कांजी) और दहीका पानी, शहद तथा मिश्रीका शरबत इनका परिषेक करे अथवा नल, वंजुल (जलवेतस), कह्लार (कमल), चंदन और पद्माख ॥ ॥ ११ ॥ शंख, शिवाल, मुलेठी, मोथा, रक्तकमल इनको पीस घृत मिलाकर लेप करे अथवा पित्तविसर्पोक्त विधि करे ॥ १२ ॥

मधुरैश्च सुखालेपैर्नस्यकर्मभिरेव च ॥ आस्थापनैर्विरेकैश्च पथ्यैश्च स्नेहवस्तिभिः ॥ १३ ॥ क्षीरसर्पिर्हितं नस्यं वसा वा जांगला शुभा ॥ उत्पलादिविपक्केन क्षीरेणास्थापनं हितम् ॥ १४ ॥ भोजनं जांगलरसैः सर्पिषा चानुवासनम् ॥ मधुरैः क्षीरसर्पिस्तु स्नेहने च सशर्करम् ॥ १५ ॥ पित्तरक्तघ्नमुद्दिष्टं यच्चान्यदपि तद्धितम् ॥१६॥

मधुर द्रव्योंका निवाया २ लेप करना तथा मधुर द्रव्यों (काकोल्यादिसे सिद्ध कियेहुए घृत) से नस्यकर्म करना और आस्थापनवस्ति और विरेचन तथा पथ्य और स्नेहवस्ति करना ये सब हित हैं ॥ १३ ॥ तथा दूध, घृतकी नस्य लेना या जंगली जीवोंकी सुंदर चरबीका नस्य लेना तथा उत्पलादिगणके पकाये हुए दूधसे आस्थापन करना हित है ॥ १४ ॥ और जंगली जीवोंके मांसरसके संग भोजन कराना तथा मधुर द्रव्योंसे पकाये हुए घृतसे अनुवासन करना और दूध, घृत, खांड मिलाकर स्नेहन करना तथा पित्तरक्तनाशक और जो जो वस्तु हैं वे अन्यभी यहां हितकारक हैं ॥ १५ ॥ १६ ॥

कफज शिरोरोगका यत्न ।

कफोत्थितं शिरोरोगं नयेत्कफनिवारणैः ॥ शिरोविरेकैर्वमनैस्तीक्ष्णैर्गंडूषधारणैः ॥ १७ ॥ अच्छं च पाययेत्सर्पिः स्वेदयेच्चाप्यभीक्ष्णशः ॥ शिरो मधुकसारेण स्निग्धं चापि विरेचयेत् ॥ १८ ॥ इंगुदस्य त्वचा वापि मेषशृंग्या च वा भिषक् ॥ आभ्यामेव कृता वर्तीर्धूमपाने प्रयोजयेत् ॥ १९ ॥ घ्रेयं कटफलचूर्णं च कवलाश्च कफापहाः ॥ सरलाकुष्ठशार्ङ्गष्ठादेवकाष्ठैः सरोहिषैः ॥ २० ॥ क्षारपिष्टैः सलवणैः सुखोष्णैर्लेपयेच्छिरः ॥ यवषष्टिकयोश्चान्नं व्योषक्षारसमायुतम् ॥ पटोलमुद्गकौलत्थैर्मात्रावद्भोजयेद्रसैः ॥२१॥

कफसे उपजे शिरोरोगको कफनाशक द्रव्योंसे निवारण करना चाहिये तथा शिरोविरेचनोंसे, वमनोंसे और तीक्ष्ण गंडूषोंके धारणसे जीतना चाहिये ॥ १७ ॥ पहले स्वच्छ घृतका पान कराना फिर खूब स्वेदन कराना चाहिये और स्निग्ध हुएको मधुकसारसे शिरोविरेचन करना चाहिये ॥ १८ ॥ और हिंगोटकी छाल तथा काकडासींगीकी छाल इन दोनोंकी वत्ती बनाके उससे धूमपान कराना चाहिये ॥ १९ ॥ और कायफलके चूर्णकी नास लेनी और कफनाशक कवल धारण करने उचित हैं तथा सरला (तारपीन), कूट, शार्ङ्गेष्टा (महाकरंज), देवदारु और रोहिष ॥ २० ॥ इनको क्षारके पानीमें पीसकर थोडा लवण मिलाकर निवाया २ शिरके ऊपर लेप करे तथा यव और षष्टिक (चावल) इनमें त्रिकटु और यवक्षार मिलाकर इनका भोजन परवल, मूंग, कुलथी इनके रसके संग थोडा थोडा खावे ॥ २१ ॥

त्रिदोषज शिरोरोगका यत्न।

शिरोरोगे त्रिदोषोत्थे त्रिदोषघ्नो विधिर्हितः ॥
सर्पिःपानं विशेषेण पुराणं वा दिशंति हि ॥ २२ ॥

त्रिदोषसे उपजेहुए शिरोरोगमें त्रिदोषनाशक विधि करनी हित है विशेष करके पुराना घृत पान करना बहुत श्रेष्ठ कहा है ॥ २२ ॥

क्षयज शिरोरोगका यत्न।

क्षयजे क्षयमासाद्य कर्तव्यो बृंहणो विधिः ॥
पाने नस्ये च सर्पिः स्याद्वातघ्नैर्मधुरैः श्रृतम् ॥ २३ ॥
क्षयकासापहं चात्र सर्पिः पथ्यतमं विदुः ॥ २४ ॥

क्षयसे उपजेहुए शिरोरोगमें उसी क्षीणताको नष्ट करके बृंहण (बलदायक) विधि करनी चाहिये और वायुनाशक तथा मधुर द्रव्योंसे सिद्ध किये घृतका पान कराना श्रेष्ठ है ॥ २३ ॥ अथवा क्षयज खांसीको नाश करनेवाला जो घृत कहा जायगा वह भी यहां बहुतही हितकारक है ॥ २४ ॥

(वक्तव्य) इसमें बदामका हलवा, हरीरा तथा खसखसका हरीरा इत्यादि बहुत गुण करते हैं, हमारे अनुभव कियेहुए हैं ॥

(श्लो० २२) त्रिदोषघ्नो विधिरिति-अनंतवातोक्तो विधिर्हित इति भावः (श्लो० २३) बृंहणो विधिरित्यत्र श्लेष्मवर्द्धनो विधिर्बोद्धव्यः। (श्लो० २४) क्षयकासापहं चात्र सर्पिः पथ्यतमं विदुरित्यत्र कुलीशुक्तिचटकैणलावान् निष्काथ्य साधितमिति पठंति (इति नि० सं०)

शिरोगतकृमियोंका यत्न ।

कृमिभिर्भक्ष्यमाणस्य वक्ष्यंते शिरसः क्रियाः ॥ नस्यं हि शोणितं दद्यात्तेन मूर्च्छंति जंतवः ॥ २५ ॥ मत्ताः शोणितगंधेन समायान्ति यतस्ततः ॥ तेषां निर्हरणं कार्यं ततो मूर्द्धविरेचनैः ॥२६॥ ह्रस्वशिग्रुकबीजैर्वा कांस्यनीलीसमायुतैः ॥ कृमिघ्नैरवपीडैश्च मूत्रपिष्टैरुपाचरेत् ॥ २७ ॥ पूतिमत्स्ययुतान्धूमान्कृमिघ्नांश्च प्रयोजयेत् ॥ भोजनानि कृमिघ्नानि पानानि विविधानि च ॥२८॥

कीडोंसे खायेहुए शिरोरोगकी क्रिया अगाडी कहते हैं अर्थात् जिसके मग़ज़में कीडे पडगये हों उसको पहले रुधिरकी नस्य देवे जिससे वे कीडे सब इकट्ठे होजावें ॥ २५ ॥ और रुधिरकी गन्धसे मतवाले होकर इधर उधर घूमने लगें तब उनको शिरोविरेचनी नस्य देकर निकाल देना चाहिये ॥ २६ ॥ अथवा छोटे सोहँजनेके बीजोंमें नीलाथोथा मिलाकर या कृमिनाशक (वायविडंग) को गोमूत्रमें पीसकर इनसे अवपीडन नस्य देवे ॥ २७ ॥ तथा सडीहुई मछलीमें कृमिनाशक (विडंग) मिलाकर उसका धूमपान करावे और भोजन भी कृमिनाशक कराना तथा अनेक प्रकारके पान भी कृमिघ्नही करे ॥ २८ ॥

सूर्यावर्त और अर्द्धावभेदकके यत्न ।

सूर्यावर्ते विधातव्यं नस्यकर्मादिभेषजम् ॥ भोजनं जांगलप्रायं क्षीरान्नविकृतैर्घृतम् ॥ २९ ॥ तत्रार्द्धभेदके व्याधौ प्राप्तमन्यच्च यद्भवेत् ॥ शिरीषमूलकफलैरवपीडोनयोर्हितः ॥ ३० ॥ वंशमूलकर्कपूरैरवपीडं प्रयोजयेत् ॥ अवपीडो हितश्चात्र वचामागधिकायुतः ॥ ३१ ॥ मधुकेनावपीडो वा मधुना सह संयुतः ॥ मनःशिलावपीडो वा मधुना चंदनेन वा ॥ ३२ ॥ तेषामंते हितं नस्यं सर्पिर्मधुरसान्वितम् ॥ सारिवोत्पलकुष्ठानि मधुकं चाम्लपेषितम् ॥ ॥ ३३ ॥ सर्पिस्तैलयुतो लेपो द्वयोरपि सुखावहः ॥ एष एव प्रयोक्तव्यः शिरोरोगे कफात्मके ॥ ३४ ॥

सूर्यावर्त रोगमें नस्यकर्मादिक भेषज करे और जंगली जीवोंके मांसप्रधान भोजन करे तथा दूध और अन्नोंसे युक्त घृत सेवन करे (और सूर्यावर्त विपर्ययमें

(श्लो० ३०) अनयोः सूर्यावर्तार्द्धावभेदकयोः (श्लो० ३३) एषामंते अवपीडनानामंते ।

भी प्रायः यही विधि करनी उचित होती है) ॥ २९ ॥ तथा अगाडी कही हुई अर्द्धावभेदक व्याधिकी अन्य औषधें भी यहां उपकारक होती हैं अर्द्धावभेदक रोगमें तथा सूर्यावर्त इन दोनोंमें सिरस और मूलीके बीजोंका अवपीडन नस्य देना हित है ॥ ३० ॥ बांस, मूली और कपूर इनकी नस्य देना अथवा वच और पीपल मिलाकर नस्य देना ॥ ३१ ॥ अथवा मुलेठी और शहद मिलाकर नस्य देना अथवा मैनसिलमें शहद या चंदन मिलाकर अवपीडन नस्य देना ॥ ३२ ॥ फिर अवपीडन नस्योंके पीछे मधुरसा (काकोल्यादि) से सिद्ध किये घृतकी नस्य देना उचित है तथा सारिवा, कमल, कूट, मुलेठी इनको खटाईमें पीसकर घृत, तैल मिलाकर लेप करना दोनों (सूर्यावर्त और अर्द्धावभेदक) को सुखकारक है तथा कफके शिरोरोगमें इसका उपयोग हित है ॥ ३३ ॥ ३४ ॥

अनंतवातका यत्न ।

अनंतवाते कर्तव्यः सूर्यावर्तेरितो विधिः ॥ शिराव्यधश्च कर्तव्योऽनंतवातप्रशांतये ॥ ३५ ॥ आहारश्च विधातव्यो वातपित्तविनाशनः ॥ मधुमस्तकसंयावघृतपूरैश्च भोजनैः ॥ ३६ ॥

अनंतवात नाम शिरके दरदमें सूर्यावर्तकी कही हुई विधि भी करनी श्रेष्ठ है तथा विशेषकर अनंतवातकी शांतिके लिये शिरावेध कराना उचित है ॥ ३५ ॥ और वातपित्तके नाशक भोजन करने चाहिये जैसे मधुमस्तक (मालपुवे) और हलवा या हरीरा तथा घेवर ऐसे भोजन (अग्निबलके अनुसार) करे ॥ ३६ ॥

(वक्तव्य) पूर्व कहे हुए भोजन क्षयज शिरोरोगमें भी श्रेष्ठ हैं ॥

शंखाख्यका यत्न ।

क्षीरसर्पिः प्रशंसंति नस्ये पाने च शंखके ॥ जांगलानां रसैः स्निग्धैराहारश्चात्र शस्यते ॥ ३७ ॥ शतावरीं तिलान्कृष्णान्मधुकं नीलमुत्पलम् ॥ दूर्वां पुनर्नवां चैव लेपे साध्ववचारयेत् ॥ ३८ ॥ महासुगंधामथवा पालिंदीं चाम्लपेषिताम् ॥ शीताँश्चात्र परीषेकान्प्रदेहानत्र योजयेत् ॥ ३९ ॥ अवपीडश्च देयोत्र सूर्यावर्तनिवारणः ॥ ४० ॥

शंख (कनपटी) के रोगमें नस्य और पानमें दूध, घृत उपयोग करना श्रेष्ठ है और जंगली जीवोंके मांसरससे युक्त स्निग्ध भोजन करना हित है ॥ ३७ ॥ शतावरी, काले तिल, मुलेठी, नीलकमल, दूब और साँठी इनको पीसकर लेप करे ॥ ३८ ॥ तथा महासुगंधा (उत्पलसारिवा), निशोथ, पालिंदी (कालवल्ली

या निशोथ) इनको कांजीमें पीसकर ठंढा लेप करना या परिषेक करना योग्य है ॥ ३९ ॥ और इस रोगमें सूर्यावर्तनाशक अवपीड (नस्य) देना भी हितकारक होसकता है ॥ ४० ॥

अन्य निर्देश ।

कृमिक्षयकृतौ हित्वा शिरोरोगेषु बुद्धिमान् ॥ मधुतैलसमायुक्तैः शिरांस्यति विरेचयेत् ॥ ४१ ॥ पश्चात्सर्षपतैलेन ततो नस्यं प्रयोजयेत् ॥ न चेच्छांतिं व्रजत्येवं स्निग्धस्विन्नांस्ततो भिषक् ॥ पश्चादुपाचरेत्सम्यक्छिराणामथ मोक्षणैः ॥ ४२ ॥

कृमियोंके और क्षयके शिरोरोगोंको छोडकर सब प्रकारके शिरके रोगोंमें बुद्धिमान वैद्य शहद और तैलयुक्त द्रव्योंसे शिरको खूब ही विरेचन करे (छाँटे) ॥ ॥ ४१ ॥ फिर सरसोंके तैलकी नस्य देवे और यदि इन सब क्रियाओंसे शांत न हो तो फिर स्नेहन,स्वेदन कराकर पीछे सम्यक् रीतिपूर्वक शिरामोक्ष कर (शोणितस्राव करके) उसका उपचार करे ॥ ४२ ॥

षट्सप्ततिर्नेत्ररोगा दशाष्टादश कर्णजाः ॥ एकत्रिंशद्घ्राणगताः शिरस्येकादशेह तु ॥ ४३ ॥ इति विस्तरतो दृष्टाः सलक्षणचिकित्सिताः ॥ संहितायामभिहिताः सप्तषष्टिर्मुखामयाः ॥ ४४ ॥ एतावंतो यथास्थूलमुत्तमांगगतो गदाः ॥ अस्मिञ्छास्त्रे निर्गदिताः संख्यारूपचिकित्सितैः ॥ ४५ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे शालाक्ये षड्विंशोऽध्यायः ॥ २३ ॥

॥ इति शालाक्यं समाप्तम् ॥

छिहत्तर ७६ नेत्रके रोग और अट्ठाईस २८ कानके रोग, इकतीस ३१ नाकके रोग और ग्यारह ११ शिरके रोग ॥ ४३ ॥ ऐसे ये सब १४६ रोग लक्षण और चिकित्सा सहित यहां वर्णन किये गये हैं और इनके सिवाय सरसठ ६७ मुखके रोग पहले कहे जा चुके हैं (वे भी वास्तवमें शालाक्यहीके अंतरगत हैं) ॥ ॥ ४४ ॥ इस प्रकारसे उत्तमांग (चेहरे) के मोटे मोटे रोग इस शास्त्रमें संख्या, रूप और चिकित्सापूर्वक वर्णन किये गये हैं ॥ ४५ ॥

(वक्तव्य) यहां स्थूलसे प्रयोजन यह है कि रोगोंके सूक्ष्म भेद तो अनन्त हैं कहांतक कहे जावें परन्तु जो स्थूल भेद हैं वेही कहे जा सकते हैं जब स्थूल ही कहें तभी १४६ और ६७ सब २१३ रोग केवल चेहरेहीके होते हैं तो फिर

सूक्ष्म भेद और समस्त शरीरके रोगोंके सूक्ष्म भेद असंख्य हैं कदापि कहे और लिखे नहीं जासकते और जब वे कहे ही नहीं जासकते तो उनकी चिकित्सा कैसे हो बस केवल ईश्वरकी प्रेरणासे जैसी जहां विद्वान् वैद्यकी बुद्धिमें फुरे वहां वही वैसा ही यत्न करें ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे शालाक्ये षड्विंशोऽध्यायः ॥ २६ ॥

॥ इति शालाक्यं समाप्तम् ॥

अथ कौमारभृत्यम् ।

सप्तविंशोऽध्यायः २७.

अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम नवग्रहों (बालकोंके पीडक नवग्रहों) की आकृतिके विज्ञानके अध्यायका व्याख्यान करते हैं ।

बालग्रहाणां विज्ञानं साधनं चाप्यनंतरम् ॥
उत्पत्तिं कारणं चैव सुश्रुतैकमनाः शृणु ॥ १ ॥

श्रीधन्वंतरिजी कहते हैं कि हे सुश्रुत ! तुम एकाग्रचित्त होकर बालग्रहोंके विज्ञान और साधन तथा उत्पत्ति और कारण इन सबको श्रवण करो ॥ १ ॥

स्कंदग्रहस्तु प्रथमः स्कंदापस्मार एव च ॥ शकुनी रेवती चैव पूतना चांधपूतना ॥ २ ॥ पूतना शीतनामा च तथैव मुखमंडिका ॥ नवमो नैगमेयश्च यः पितृग्रहसंज्ञितः ॥ ३ ॥

इनमेंसे प्रथम (प्रधान) ग्रह स्कंद है फिर स्कंदापस्मार, शकुनी, रेवती, पूतना, अंधपूतना ॥ २ ॥ शीतपूतना तथा मुखमंडिका और नवां नैगमेय ग्रह यह पितृसंज्ञक है (यह मातापिताके समान बालककी रक्षा करता है इससे इसे पितृसंज्ञक कहा है) ॥ ३ ॥

धात्रीमात्रोः प्राक्प्रदिष्टापचाराच्छौचभ्रष्टान्मंगलाचारहीनान् ॥
त्रस्तान्हृष्टांस्तर्जितान्क्रंदितान्वा पूजाहेतोर्हिंस्युरेते कुमारान् ॥४॥
ऐश्वर्यस्थास्ते नं शक्या विशंतो देहं द्रष्टुं मानुषैर्विश्वरूपाः ॥
आप्तं वाक्यं तत्समीक्ष्याभिधास्ये लिंगान्येषां यानि देहे भवन्ति५

धात्री (धाय) या माताके पूर्वकथित अपचार (जो शारीरक स्थानमें कहे जाचुके हैं) उनके होनेसे बालकोंको तथा जो शौचसे भ्रष्ट बालक हों उन्हें और जो मंगलाचारसे हीन हों उन्हें तथा डराये हुओंको और हृष्ट बालकोंको तथा ताडनादिसे डरे हुओंको और जो क्रंदित हों ऐसे बालकोंको ये ग्रह पूजा और बलि मिलनेके लोभसे मारते हैं ॥ ४ ॥ ये ग्रह विश्वरूप (व्यापक) हैं और ऐश्वर्यमें स्थित हैं इससे बालकोंके देहमें प्रवेश करतेहुए इनको मनुष्य नहीं देख सकते इसमें आप्त ऋषियोंके वाक्योंको देखकर जो जो लक्षण इनके कारणसे देहमें होते हैं उनको हम वर्णन करते हैं ॥ ५ ॥

स्कंदग्रहपीडित बालकके लक्षण ।

शूनाक्षः क्षतजसगंधिकस्तनद्विड्वक्त्रास्यो हतचलितैकपक्ष्मनेत्रः ॥
उद्विग्नः सुलुलितचक्षुरल्परोदी स्कंदार्तो भवति च गाढमुष्टिवर्चाः॥६॥

जिसकी आंखके डोले सूजे हों, रुधिरकीसी गंध आवे, स्तनपान नहीं करे, मुँहको विशेषकर टेढा रक्खे, एक नेत्रकी पलकें और नेत्र ज्यादा फरकें, उद्विग्न रहें, आंखें झपीसी रहें, कम रोवे, मुट्ठी बंद रक्खे और मल गाढा हो ये लक्षण होनेसे स्कंदग्रहपीडित बालक है ऐसा जाने ॥ ६ ॥

स्कंदापस्मारके लक्षण ।

निःसंज्ञो भवति पुनर्भवेत्ससंज्ञः संरब्धः करचरणैश्च नृत्यतीव ॥
विण्मूत्रे सृजति विनद्य जृंभमाणः फेनं च प्रसृजति तत्सखाभिपन्नः७॥

कभी बालक बेहोश होजावे और फिर होशमें आजावे, शरीर मूझासा हो, हाथ, पावोंको नचाता रहे, चिल्लाकर या रोकर मल मूत्र करे और जँभाई ज्यादे ले और मुँहसे झाग आवें ये लक्षण स्कंदापस्मारके हैं ॥ ७ ॥

शकुनी और रेवतीग्रहके लक्षण ।

स्रस्तांगो भयचकितो विहंगगंधिः संस्राविव्रणपरिपीडितः समंतात् ॥ स्फोटैश्च प्रततैतनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥ ८ ॥ रक्तास्यो हरितमलोऽतिपांडुदेहः श्यावो वा ज्वरमुखपाकवेदनार्तः ॥ रेवत्या व्यथिततनुश्च कर्णनासं मृद्नाति ध्रुवमभिपीडितः कुमारः ॥ ९ ॥

(श्लो० ६) क्षतजसगंधिकः रक्तगंधिः (श्लो० ७) विनद्येति—शब्दं कृत्वा विण्मूत्रे सृजतीत्यर्थः । फेनं मुखाद्यसृजतीति भावः । तत्सखा स्कंदस्य सखा स्कंदापस्मार एव ।

बालकका अंग शिथिल होजावे, भयसे चकितसा हो और शरीरमें पक्षीकीसी गंध आवे और शरीर स्रावयुक्त व्रणोंसे पीडित हो। दाह और पाकवाले फोड़े फुन्सियोंसे शरीर व्याप्त होवे ये लक्षण शकुनीग्रहसे क्षत हुए (पीडित हुए) बालकके होतेहैं ऐसा जानना ॥ ८ ॥ बालकका मुँह लाल रहे और मल हरे रंगका होवे और शरीरका रंग अति पांडु (सुपेदी लिये पीला) हो अथवा श्याम हो और ज्वर, मुखपाक, वेदना इनसे पीडित हो और कान, नाक इन्हें विशेष रगड़े ऐसा बालक रेवतीग्रहसे पीडित होता है ॥ ९ ॥

पूतना और अंधपूतनाके ल०।

स्रस्तांगः स्वपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगंधिः ॥ छर्यार्तो हृषिततनूरुहः कुमारस्तृष्णालुर्भवति च पूतनागृहीतः ॥ १० ॥ यो द्वेष्टि स्तनमतिसारकासहिक्काछर्दीभिर्ज्वरसहिताभिरर्द्यमानः ॥ दुर्वर्णः सततमधःशयोऽम्लगंधिस्तं ब्रूयुर्भिषजोऽन्धपूतनार्तम् ॥ ११ ॥

शिथिल शरीर हो, दिन और रातमें सुखसे नींद नहीं आवे फटे, मलका दस्त हो, कागकीसी गंध शरीरमें हो, वमन भी हो, रोमांच हों, तृषा अधिक हो ये लक्षण पूतनाग्रहजुष्ट बालकके होतेहैं ॥ १० ॥ जो बालक स्तनसे द्वेष रक्खे (अर्थात् माताके स्तन नहीं पीवे) और अतिसार, खांसी, हिचकी, वमन और ज्वर इनसे पीडित हो, वर्ण बिगड जावे, सोते समय नीचेको मुँह करके सोवे, खट्टी २ गंध आवे ऐसे बालकको अंधपूतनासे पीडित कहते हैं ॥ ११ ॥

शीतपूतना और मुखमंडिकाके लक्षण।

उद्विग्नो भृशमतिवेपते प्ररुद्यात्संलीनः स्वपिति च यस्य चांत्रकूजः ॥ विस्रांगो भृशमतिसार्यते च यस्तं जानीयाद्विषगिह शीतपूतनार्तम् ॥ १२ ॥ म्लानांगः सुरुचिरपाणिपादवक्त्रो बह्वाशी कलुषशिरावृतोदरो यः ॥ सोद्वेगो भवति च मूत्रतुल्यगंधिः स ज्ञेयः शिशुरथ वक्त्रमंडिकार्तः ॥ १३ ॥

बालक उद्विग्न रहे, वारवार खूब कांपे, बहुत रोवे, कुम्हलायासा रहे और सोते समय पेटकी आंत गुडगुड शब्द करें, शरीरमें कच्चे (रक्त) कीसी गंध आवे, वारवार अतिसार हो ऐसे बालकको शीतपूतना नामक ग्रहसे पीडित जानना चाहिये॥ १२॥

(श्लो० ११) अधःशयः अधोमुखशायी (इति डल्हनः)

यदि बालकका अंग मलीन हो और हाथ, पांव, मुँह सुंदर हों तथा बहुत भोजन करे (या खूब स्तनपान करे) और पेटपर नीली २ नसें चमकें और उद्वेगयुक्त हो, मूत्रकीसी गंध आवे ऐसा बालक मुखमंडिका नामक ग्रहसे पीडित जानना ॥ १३ ॥

नैगमेयके लक्षण ।

यः फेनं वमति विनम्यते च मध्ये सोद्वेगं विलपति चोर्द्ध्वमीक्ष्यमाणः ॥ ज्वर्येत प्रततमथो वसासुगंधिर्निःसंज्ञो भवति हि नैगमेयजुष्टः ॥ १४ ॥

जो बालक मुँहसे झाग डाले, बीचमेंसे नवनव जाय, उद्वेगयुक्त विलाप करे (रोवे), ऊपरको देखे, बराबर ज्वर बना रहे और चरबीकीसी गंध आवे, कभी बेहोशभी होजावे ऐसा बालक नैगमेय नाम ग्रहसे पीडित होता है ॥ १४ ॥

साध्यता और असाध्यता ।

प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन्मुहुः ॥
तं बालं न चिराद्धंति ग्रहः संपूर्णलक्षणः ॥ १५ ॥
विपरीतमतः साध्यं चिकित्सेदचिरार्दितम् ॥ १६ ॥

जो बालक अकडा हुआसा होजावे (अर्थात् देह कडा पडजावे) और दूध नहीं पीवे और बेहोश होजावे और वारवार आवेश (वेग) होवे और सब पूरे लक्षण हों वह असाध्य होता है उसे ग्रह शीघ्र मृत्यु करता है ॥ १५ ॥ और इनसे विपरीत साध्य होता है, ग्रहजुष्टकी शीघ्र चिकित्सा करनी चाहिये (जादे दिनका रोग नहीं होने देवे) ॥ १६ ॥

ग्रहजुष्टका सामान्य यत्न ।

गृहे पुराणं हविषाऽभ्यंज्य बालं शुचौ शुचिः ॥ सर्षपान्प्रकिरेत्तेषां तैलैर्दीपं च कारयेत् ॥ १७ ॥ सदा सन्निहितं चापि जुहुयाद्धव्यवाहनम् ॥ सर्वगंधौषधीबीजैर्गंधमाल्यैरलंकृतम् ॥ १८ ॥ अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन् ॥ नमः स्कंदाय देवाय ग्रहाधिपतये नमः ॥ १९ ॥ शिरसा त्वाऽभिवन्देहं प्रतिगृह्णीष्व मे बलिम् ॥ निरुजो निर्विकारश्च शिशुर्मे जायतां ध्रुवम् ॥ २० ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे कौमारभृत्ये सप्तविंशोऽध्यायः ॥ २७ ॥

(श्लो० १५) मुह्यते मूर्च्छां प्राप्नोति तं न चिरात् हंति शीघ्रमेव हंतीत्यर्थः (श्लो० १८) सर्वगंधौषधीबीजैरिति-सर्वगंधा एलादिगणे परिपठिता औषधीनां बीजानि यवादयः तैर्जुहुयादित्यर्थः ॥

मनुष्य स्वयं पवित्र होकर और घरको पवित्र करके वहां सुपेद सरसों बखेर देवे और बालकको पुराने घृतसे चुपडकर मर्दन करे और घरमें सरसोंके तैलका दीपक जलावे ॥ १७ ॥ और सदा (नित्य) गंधमालाओंसे अलंकृत होकर सावधानीसे अग्निमें हवन करे सर्वगंधा और औषधीके बीजों (यवादि) से आहुति देवे ॥ १८ ॥ और आहुति देते समय 'अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा' इन मंत्रोंको पढता जावे और स्मरण करता जावे और 'नमः स्कंदाय' यह मंत्र पढ पढ कर प्रार्थना करे और बलिदान देवे, इसका अर्थ यह है कि स्कंद जो सब ग्रहोंके अधिपति हैं उनको नमस्कार हो, हे स्कंद ! तुमको मैं शिर झुकाकर नमस्कार करता हूं, आप मेरी बलिको ग्रहण करो और मेरा बालक रोग तथा विकारसे रहित होजावे (ऐसी कृपा करो) ॥ १९ ॥ २० ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कौमारभृत्ये सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः २८.

अथातः स्कंदग्रहप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाडी अब हम स्कंदग्रहके प्रतिषेध (अर्थात् स्कंदग्रहपीडित बालककी चिकित्सा) का व्याख्यान करते हैं ।

परिषेक और अभ्यंग ।

स्कंदग्रहोपसृष्टानां कुमाराणां च शस्यते ॥ वातघ्नद्रुमपत्राणां निःक्वाथैः परिषेचनं ॥१॥ तेषां मूलेषु सिद्धं च तैलमभ्यंजने हितम् ॥ सर्वगंधासुरामंडकैटर्य्यावापमिष्यते ॥ २ ॥

स्कंदग्रहसे पीडित बालकोंको वायुनाशक वृक्षोंके पत्तोंके क्वाथसे परिषेक (स्नान) कराना श्रेष्ठ होता है ॥ १ ॥ और उन्हींके मूलसे तैल सिद्ध करे, सिद्ध होनम सर्वगंधा, सुराका मंड और कैटर्य (महानिंब) इनको डाले फिर इस तैलका मर्दन करना हित है ॥ २ ॥

पान धूपन और धारण ।

देवदारुणि रास्नायां मधुरेषु द्रुमेषु च ॥ सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत् ॥ ३ ॥ सर्षपाः सर्पनिर्मोको वचा काकादनी घृतम् ॥ उष्ट्राजाविगवां चैव रोमाण्युद्धूपनं शिशोः ॥ ४ ॥ सोमवल्लीमिंद्रवल्लीं शमीं बिल्वस्य कंटकान् ॥ मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत् ॥ ५ ॥

देवदारु, रास्ना और मधुरद्रव्य (काकोल्यादि) इनमें सिद्ध किया हुआ घृत दूधयुक्त पिलावे ॥ ३ ॥ और सरसों, साँपकी काँचली, वच, काकादनी, घृत तथा ऊंट, बकरी, भेड और गौके रोम इन सबको मिलाकर (धूनी देनी) बालकको इनका धुवाँ लगाना ॥ ४ ॥ सोमवल्ली (सोमलता), इंद्रवल्ली (इंद्रवृक्ष), जांट, बिल्ववृक्षके कांटे और इंद्रायनकी जड इनको गूथकर (या गांठमें बांधकर) गले या हाथमें धारण करे ॥ ५ ॥

बलिदानादि ।

रक्तानि माल्यानि तथा पताका रक्ताश्च गंधा विविधाश्च भक्ष्याः ॥
घंटा च देवाय बलिर्निवेद्यः सकुक्कुटः स्कंदग्रहे हिताय ॥ ६ ॥
स्नानं त्रिरात्रं निशि चत्वरेषु कुर्यात्पुनः शालियवैर्नवैस्तु ॥
अद्भिश्च गायत्र्यभिमंत्रिताभिः प्रज्वालनं चाहुतिभिश्च वह्नेः ॥ ७ ॥

रक्तपुष्पोंकी माला (या रक्तपुष्प) तथा लाल झंडियां और अनेक प्रकारकी सुगंध (लौंग , इलायची, इतर इत्यादि) तथा कई प्रकारके भक्ष्य (बड, पुवे आदि) तथा घंटा और एक मुरगा इन सबको स्कंदके स्थान (चौराहे) में बालकके हितके लिये बलि (भेंट) देना चाहिये ॥ ६ ॥ और तीन दिन तक रातके समय चौराहेमें स्नान करना और गायत्रीसे अभिमंत्रित जल तथा नये यव और चावलोंसे प्रज्वलित अग्निमें हवन करना चाहिये ॥ ७ ॥

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ॥ अहन्यहनि कर्तव्या या भिषग्भिरतंद्रितैः ॥ ८ ॥ तपसां तेजसां चैव यशसां वपुषां तथा ॥ निधानं योऽयजो देवः स ते स्कंदः प्रसीदतु ॥ ९ ॥ ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ॥ देवसेनारिपुहरः पातु त्वां भगवान्गुहः ॥ १० ॥ देवदेवस्य महतः पावकस्य च यः सुतः ॥ गंगोमाकृत्तिकानां च स ते शर्म प्रयच्छतु ॥ ११ ॥ रक्तमाल्यांबरः श्रीमान्रक्तचंदनभूषितः ॥ रक्तदिव्यवपुर्देवः पातु त्वां क्रौंचसूदनः ॥ १२ ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे कौमारभृत्येऽष्टाविंशोऽध्यायः ॥ २८ ॥

बालकोंके (बालग्रहोंके) दोष दूर करनेवाली रक्षाका विधान अब हम कहते हैं जो वैद्यको सावधान होकर नित्य करनी चाहिये ॥ ८ ॥ तप, तेज और यश तथा

शरीर इन सबके निधान और अविनाशी जो स्कंद (कार्तिकेय) देव हैं सो रक्षा करें ॥ ९ ॥ ग्रहोंकी सेनाके पति और देवताओंकी सेनाके पति और देवसेनाके वैरीके नाशक ऐसे स्कंददेव तुम्हारी रक्षा करें ॥ १० ॥ देवोंके देव (शिव) और अग्नि इनके तथा गंगा, पार्वती और कृत्तिका इनके पुत्र स्कंद रक्षा करें ॥ ११ ॥ रक्तपुष्पमाला धारण करनेवाले, रक्तवस्त्रधारी, रक्तचंदनसे भूषित और रक्त-दिव्यशरीरवाले स्कंद देव जो क्रौंचके विदारण करनेवाले हैं सो हे बालक! तुम्हारी रक्षा करें ॥ १२ ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कौमारभृत्येऽष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशत्तमोऽध्यायः २९.

अथातः स्कंदापस्मारप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाडी अब हम स्कंदापस्मारग्रहपीडितकी चिकित्साका व्याख्यान करतेहैं।

परिषेचन और अभ्यंग तथा पान ।

बिल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ॥ परिषेके प्रयोक्तव्यः स्कंदापस्मारशांतये ॥ १ ॥ सर्वगंधविपक्वं तु तैलमभ्यंजने हितम् ॥ २ ॥ क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा ॥ विपक्तव्यं घृतं वापि पानीयं पयसान्वितम् ॥ ३ ॥

बिल्व, शिरस, गोलोमी (सुपेद दूब) और सुरसादिगण इनका जल स्कंदापस्मारकी शांतिके लिये बालकके परिषेकमें उपयुक्त करे (अर्थात् इनके काथसे बालकको स्नान करावे) ॥ १ ॥ तथा सर्वगंधा (एलादिगण) से पकाया हुआ तैल मर्दन करे ॥ २ ॥ और दूधके वृक्षों (गूलरआदि) के काथमें तथा काकोल्यादि गणमें पकाये हुए घृतमें दूध मिलाकर पिलाना उचित है ॥ ३ ॥

उत्सादनं वचाहिंगुयुक्तं स्कंदग्रहे हितम् ॥ गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतम् ॥ ४ ॥ ऋषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च ॥ अनंतां कुक्कुटीं बिंबीं मर्कटीं चापि धारयेत् ॥ ५ ॥

वच और हींग मिलाकर उबटन करना और गीध, उलूक इनकी बीट और पर, हाथीके नख, घृत, बैलके बाल इनको मिलाकर धूनी देना और अनंता (उत्पलसारिवा), कुक्कुटी (शाल्मली अर्थात् सेमल), कंदूरी तथा किवांच (इनकी जडको गले या हाथमें) बांधे ॥ ४ ॥ ५ ॥

बलिदान और स्नान।

पक्वापक्वानि मांसानि प्रसन्नं रुधिरं पयः ॥ भूतौदनो निवेद्यश्च स्कंदापस्मारिणोऽवटे ॥ ६ ॥ चतुष्पथे च कर्तव्यं स्नानमस्य यतात्मना ॥ ७ ॥ स्कंदापस्मारसंज्ञो यः स्कंदस्य दयितः सखा॥ विशाखसंज्ञश्च शिशोः शिवोस्तु विकृताननः ॥ ८ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे कौमारभृत्य एकोनत्रिंशत्तमोऽध्यायः २९॥

पकाये हुए और कच्चे मांस और स्वच्छ रुधिर (अजादिका) तथा दूध और भूतौदन (उड़दके बाकले) ये सब स्कंदापस्मार (ग्रहकी शांतिके लिये गर्तमें बलिदान करे (अर्थात् उद्यानमें कोई खड्ढा हो उसमें रखवा देवे)॥ ६ ॥ और नियमित होकर चौराहेमें रोगी बालकको स्नान करावे ॥ ७ ॥ स्नान कराते समय तथा बलि रखते समय यह मंत्र पढे "स्कंदापस्मारसंज्ञो य" इत्यादि इसका अर्थ यह है कि स्कंदका प्यारा मित्र स्कंदापस्मार संज्ञक ग्रह और विकृतमुखवाला विशाख संज्ञक ग्रह बालकको आनंद करनेवाला हो ॥ ८ ॥

(वक्तव्य) कई विशाखसंज्ञक इसी स्कंदापस्मारको मानते हैं और कई पृथक् मानते हैं वृद्धवाग्भट पृथक् मानते हैं परंतु पृथक् मानें तो भी उसकी शांतिका यही मंत्र और यही विधि समझनी चाहिये ॥

इति पं०मुरलीधरवि०सुश्रुतसं०भा०टी० उत्तरतन्त्रे कौमारभृत्य एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

त्रिंशत्तमोऽध्यायः ३०.

अथातः शकुनीप्रतिषेधं व्याख्यास्यामः।

यहांसे अगाडी अब हम शकुनीग्रहकी चिकित्साका व्याख्यान करते हैं।

परिषेचनादि।

शकुन्यभिपरीतस्य कार्यो वैद्येन जानता ॥ वेतसाम्रकपित्थानां निःक्वाथः परिषेचने ॥ १ ॥ कषायमधुरैस्तैलं कार्यमभ्यंजने शिशोः ॥ मधुकोशीरह्रीबेरसारिवोत्पलपद्मकैः ॥ २ ॥ रोध्रप्रियंगुमंजिष्ठागैरिकैः प्रदिहेच्छिशुम् ॥ व्रणेषूक्तानि चूर्णानि पथ्यानि विविधानि च ॥ ३ ॥ स्कंदग्रहे धूपितानि तानीहापि प्रयोजयेत्॥ स्कंदग्रहोपशमनं घृतं तच्चेह पूजितम् ॥ ४ ॥ शतावरीमृगैर्वारु-

(श्लो० ६) अवटे गर्त्ते (इति डल्हनः) केचित् वटे वटवृक्षस्य समीपे इति वदंति।

नागदंतीनिदिग्धिकाः ॥ लक्ष्मणां सहदेवां च बृहतीं चापि धारयेत् ॥ ५ ॥

शकुनीग्रहसे पीडित बालकका यत्न जानकार वैद्यको इस भांति करना, चाहिये वेतस, आंब, कैथ इनके पत्र और जटाका काथ करके बालकको परिषेक करावे (छींटे देवे या स्नान करावे) ॥ १ ॥ और कषाय (वटादिक) और मधुर (काकोल्यादि) इनसे सिद्ध किये तैलका बालकके मर्दन करे तथा मुलेठी, खस, नेत्रवाला, सारिवा, कमल, पद्माख ॥ २ ॥ लोध, प्रियंगु, मंजीठ और गेरू इनको पीसकर लेप करे और इन्हींका सूखा चूर्ण व्रणोंपर बुरकावे तथा सब तरहके पथ्यभी करे ॥ ३ ॥ और स्कंदग्रहके विधानमें कही हुई धूपसे यहांभी धूनी देवे तथा स्कंदग्रहशांतिकारक (स्कंदग्रहके विधानमें कहा हुआ) घृत पान करनेमें यहांभी श्रेष्ठ है ॥ ४ ॥ और शतावरी, इन्द्रायन, नागदंती (दांतनी), छोटी कटेली, लक्ष्मणा (श्वेतकंटकारी), सहदेवी तथा बडी कटेली इनको मिला पोटली बना गले या हाथमें धारण करे (बांध दे) ॥ ५ ॥

बलिदानादि ।

तिलतंडुलकं माल्यं हरितालं मनःशिला ॥ बलिरेष करंजेषु निवेद्यो नियतात्मना ॥ ६ ॥ निकुंजे च प्रयोक्तव्यं स्नानमस्य यथाविधि ॥ कुर्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ॥ ७ ॥ अंतरिक्षचरा देवी सर्वालंकारभूषिता ॥ अधोमुखी तीक्ष्णतुंडा शकुनी ते प्रसीदतु ॥ ८ ॥ दुर्दर्शना महाकाया पिंगाक्षी भैरवस्वरा ॥ लंबोदरी शंकुकर्णी शकुनी ते प्रसीदतु ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे कौमारभृत्ये त्रिंशत्तमोऽध्यायः ॥ ३० ॥

तिल, चावल, पुष्प, हरिताल और मैनसिल इनकी बलि करंजके वृक्षके नीचे सावधान होकर देना चाहिये ॥ ६ ॥ और निकुंजमें (वनमें जहां गहरे झुके वृक्ष हों) विधिपूर्वक बालकको स्नान करावे और सुन्दर पुष्पोंसे शकुनी ग्रहकी विविध प्रकारसे पूजा करे ॥ ७ ॥ और "अंतरिक्षचरा देवी" इत्यादि मंत्र पढे अर्थ इनका यह है कि आकाशमें विचरनेवाली, सब आभूषणोंसे भूषित, अधोमुख और तीक्ष्ण तुंडवाली शकुनी देवी तेरी रक्षा करे ॥ ८ ॥ भयंकर रूपवाली, बडे शरीरवाली, पिंग नेत्रोंवाली, भयानक शब्दवाली, लंबे पेटवाली, शंकु जैसे खडे कानवाली शकुनी देवी (हे बालक !) तेरी रक्षा करे ॥ ९ ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतन्त्रे कौमारभृत्ये त्रिंशत्तमोऽध्यायः ॥ ३० ॥

एकत्रिंशत्तमोऽध्यायः ३१.

अथातो रेवतीप्रतिषेधं व्याख्यास्यामः।

यहांसे अगाडी अब हम रेवतीग्रहके प्रतिषेधका व्याख्यान करते हैं।

परिषेकादि।

अश्वगंधाजशृंगी च सारिवा सपुनर्नवा ॥ सहे विदारी च तथा कषायाः सेचने हिताः ॥ १ ॥ तैलमभ्यंजने कार्यं कुष्ठे सर्जरसेऽपि वा ॥ धवाश्वकर्णककुभधातकीतिंदुकीषु च ॥ २ ॥ काकोल्यादिगणे चैव पानीयं सर्पिरिष्यते ॥ कुलत्थाः शंखचूर्णं च प्रदेहाः सर्वगंधिकाः ॥ ३ ॥ गृध्रोलूकपुरीषाणि यवा यवफलो घृतम् ॥ संध्ययोरुभयोः कार्यमेतद्धूपनं शिशोः ॥ ४ ॥ वरुणारिष्टकमयं रुचकं सेंदुकं तथा ॥ सततं धारयेच्चापि कृतं वा पौत्रजीविकम् ॥ ५ ॥

असगंध, मेढासींगी, सारिवा, सांठी, दोनों सहा (मुद्गपर्णी, माषपर्णी) और विदारी इनका क्वाथ करके सेचन करे (छिडके या तरडे दे या स्नान करावे) ॥ १ ॥ और कूट तथा रालसे सिद्ध किये तैलका अथवा धव, अश्वकर्ण (शालभेद), कुहा, धायके फूल और तिंदुकी (तेंदू) इनसे सिद्ध किये तैलका मर्दन करे ॥ ॥ २ ॥ और काकोल्यादिगणसे सिद्ध किये घृतका पान करावे और कुलथी, शंखका चूर्ण और सर्वगंधा इनका प्रदेह करे (शरीरपर लेपन या उबटन करे) ॥ ३ ॥ गीध और उल्लूकी वीट, यव और बांसके बीज, घृत इन्हें मिलाकर दोनों वख्त संध्याको बालकके धूनी देवे ॥ ४ ॥ और वरना, नींब इनका तथा सेंदुक (सिम्हालू) का अथवा जीयापोतेके वृक्षका रुचक (अर्थात् मणियांसा) बनवाकर गलेमें धारण करावे ॥ ५ ॥

बलिदानादि।

शुक्लाः सुमनसो लाजाः पयः शाल्योदनं तथा ॥ बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ॥ ६ ॥ संगमे च भिषक् स्नानं कुर्याद्धात्रीकुमारयोः ॥ ७ ॥ नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ॥ ८ ॥

(श्लो० २) धवाश्वकर्णककुभधातकीतिंदुकीषु कृतं तैलमभ्यंजनार्थमिति (श्लो० ३) सर्वगंधिकाः एलादिगणपठिताः (श्लो० ४) यवफलो वंशः (श्लो० ५) रुचकं ग्रीवाभरणं मणिकसंज्ञकम्। सेंदुकं सिंदुको निर्गुंडी तद्भवम् (इति नि० सं०) (श्लो० ७) कुर्यादिति ण्यंतार्थे, कारयेदिति भावः। भिषक् धात्रीकुमारयोः स्नानं कारयेदिति प्रयोजनम्।

चलत्कुंडलिनी श्यामा रेवती ते प्रसीदतु ॥ लंबा कराला विनता तथैव बहुपुत्रिका ॥ रेवती सततं माता सा ते देवी प्रसीदतु ॥ ९ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे कौमारभृत्य एकत्रिंशत्तमोऽध्यायः ॥३१॥

सुपेद फूल, धानकी खील, दूध और पकाये हुए चावल (भात) इनकी बलि गोतीर्थमें (गांवके अगाड़ी जहां गायें खड़ी होती हैं और गोबर गोमूत्र करती हैं उस स्थानमें) उपवास किये हुए मनुष्य रेवतीकी शांतिके लिये देवे ॥ ६ ॥ और जहां दो या अधिक रस्ते मिलें वहां बालक और धाय (या माता) दोनोंको स्नान करावे ॥ ७ ॥ और "नानावस्त्रधरा देवी" इत्यादि मंत्र पढे अर्थ इनका यह है कि नाना प्रकारके वस्त्र धारण करनेवाली, चित्र विचित्र पुष्प और अनुलेपन धारण करनेवाली, चलायमान कुंडलोंवाली, श्यामवर्ण रेवती देवी तेरी रक्षा करे ॥ ८ ॥ लंबी, कराल, झुकीहुई और बहुत संतानोंवाली जो रेवती माता है सो वह देवी (हे बालक और बालककी धाय या माता!) तुम्हारी रक्षा करे (तुमपर प्रसन्न हो) ॥ ९ ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कौमारभृत्य एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

द्वात्रिंशत्तमोऽध्यायः ३२.

अथातः पूतनाप्रतिषेधं व्याख्यास्यामः।

यहांसे अगाडी अब हम पूतनाके प्रतिषेधकी व्याख्या करते हैं।

परिषेकादि यत्न।

कपोतवंकारलुकौ वरुणः पारिभद्रकः ॥ आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥ १ ॥ वचा वयस्था गोलोमी हरितालं मनःशिला ॥ कुष्ठं सर्जरसं चैव तैलार्थे वर्ग इष्यते ॥ २ ॥ हितं घृतं तुगाक्षीर्यां सिद्धं मधुरकेषु च ॥ कुष्ठतालीसखदिरं चंदनस्यंदने तथा ॥ ३ ॥ देवदारु वचा हिंगु कुष्ठं गिरिकदंबकः ॥ एला हरेणवश्चापि योज्या उद्धूपने सदा ॥ ४ ॥ गंधनाकुलिकुंभीकामर्जानो बदरस्य च ॥ कर्कटास्थि घृतं चैव धूपनं सर्षपैः सह ॥ ५ ॥ काकादनीं चित्रफलां निंबीं गुंजां च धारयेत् ॥ ६ ॥

कपोतवंका (ब्राह्मी), अरलू, वरना, नींब, आस्फोता (गिरिकर्णी) इनको (इनके काथको) बालकोंके परिषेक करनेके लिये योजना करना चाहिये ॥ १ ॥

वच, वयस्था (गिलोय), दूब, हरताल, मैनसिल, कूट और राल इनका तैल बनाकर मर्दन करना ॥ २ ॥ और वंशलोचन तथा मधुर (काकोल्यादि) इनमें सिद्ध किया हुआ घृत तथा कूट, तालीसपत्र, खैर, चंदन और स्यंदन (तिनिश) इनसे सिद्ध घृत पान करानेमें हित होता है ॥ ३ ॥ देवदारु, वच, हींग, कूट, पहाड़ी कदंब, इलायची और हरेणु इनकी धूप देना ॥ ४ ॥ अथवा गंधनाकुली, कुंभीका (जलकुंभी या गोमा), बेरकी मींगी, केकड़ेकी हड्डी और घृत इनको मिलाकर धूनी देना ॥ ५ ॥ तथा काकादनी, चित्रफला (इंद्रायन), बिंबी और चिरमिठी इनकी पोटली बनाकर धारण करना चाहिये ॥ ६ ॥

बलिदानादि ।

मत्स्यौदनं च कुर्वीत कृसरां पललं तथा ॥ शरावसंपुटे कृत्वा बलिं शून्यगृहे हरेत् ॥ ७ ॥ उच्छिष्टेनाभिषेकेण शिरसि स्नानमिष्यते ॥ पूज्या च पूतना देवी बलिभिः सोपहारकैः ॥ ८ ॥ मलिनांबरसंवीता मलिना रूक्षमूर्द्धजा ॥ शून्यागाराश्रिता देवी दारकं पातु पूतना ॥ ९ ॥ दुर्दर्शना सुदुर्गंधा कराला मेघकालिका ॥ भिन्नागाराश्रया देवी दारकं पातु पूतना ॥ १० ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे कौमारभृत्ये द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥

मछलीका मांस, तिल और तंडुलकी खिचड़ी, पलल (तिलकी पिट्ठी) इनको शरावेमें रखकर ऊपर शरावा ढककर शून्य स्थानमें बलि देवे ॥ ७ ॥ और आचमनके जूँठे पानीसे बालकको शिर समेत स्नान करावे और पूतनादेवीकी बलियों और उपहारोंसे पूजा करे ॥ ८ ॥ और "मलिनांबरसंवीता" इत्यादि मंत्र पढे अर्थ इनका यह है कि मैले वस्त्र पहने हुए, मैले और रूखे बालोंवाली, शून्यस्थानोंमें बसनेवाली पूतनादेवी दारक (बालक) की रक्षा करे ॥ ९ ॥ तथा भयंकर दर्शनवाली, दुर्गंधवाली, कराल और मेघ जैसी काली, फूटे मकानोंमें रहनेवाली पूतना देवी बालककी रक्षा करे ॥ १० ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कौमारभृत्ये द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशत्तमोऽध्यायः ३३.

अथातोंऽधपूतनाप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाड़ी अब हम अंधपूतनाके प्रतिषेधकी व्याख्या करते हैं ।

(श्लो० ९) दारकमिति–दृणाति दारणं करोति उदरमिति दारकः बालकः (इति श० स्तो०)

परिषेकमर्दनादि ।

तिक्तकद्रुमपत्राणां कार्यः क्वाथोऽवसेचने ॥ सुरासौवीरकं कुष्ठं हरितालं मनःशिला ॥ तथा सर्जरसश्चैव तैलार्थमुपदिश्यते ॥ १ ॥ पिप्पल्यः पिप्पलीमूलं वर्गो मधुरको मधु ॥ शालपर्णी बृहत्यौ च घृतार्थमुपदिश्यते ॥ २ ॥ सर्वगंधैः प्रदेहश्च गात्रेष्वक्ष्णोश्च शीतलैः ॥ ३ ॥ पुरीषं कौक्कुटं केशांश्चर्म सर्पत्वचं तथा ॥ जीर्णां च भिक्षुसंघाटीं धूपनायोपकल्पयेत् ॥ ४ ॥ कुक्कुटीं मर्कटीं शिंबीमनंतां चापि धारयेत् ॥ ५ ॥

तिक्त वृक्षों (निंबादि) के पत्तोंके क्वाथको परिषेकके लिये बनावे और मदिरा कांजी, कूट, हरताल, मैनशिल, राल इनको तैल साधनेके लिये कहा है (और इन्हींके तैलका मर्दन करना) ॥ १ ॥ तथा पीपल, पीपलामूल और काकोल्यादिगण, शहद, शालपर्णी, दोनों कटेली इन्हें घृत साधनेके लिये उपदेश किया है अर्थात् इनसे घृत सिद्ध करके पान करावे ॥ २ ॥ और सर्वगंध (एलादिगण) के शीतल जलको शरीर और नेत्रोंपर लगावे ॥ ३ ॥ मुरगेकी बीट, बाल और चर्म तथा सर्पकी कांचली और पुराना (शाक्यमती संन्यासीका) वस्त्र (अर्थात् वस्त्रकी कत्तर या सूत इनकी धूनी देना ॥ ४ ॥ और कुक्कुटी (एक भांतिका सुपेद मुरगेके अंडे जैसा कंद होताहै), केवांच और सेम तथा अनन्ता (सारिवा) इनको धारण करे ॥ ५ ॥

बलिप्रदानादि ।

मांसमामं तथा पक्वं शोणितं च चतुष्पथे ॥ निवेद्यमंतश्च गृहे शिशो रक्षानिमित्ततः ॥ ६ ॥ शिशोश्च स्नपनं कुर्यात्सर्वगंधादिकैः शुभैः ॥ ७ ॥ कराला पिंगला मुंडा कषायांबरवासिनी ॥ देवी बालमिमं पीता संरक्षत्वंधपूतना ॥ ८ ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे कौमारभृत्ये त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥

कच्चा और पक्का मांस तथा रुधिर इनकी बलि चौराहेमें देवे और बालककी रक्षाके निमित्त घरके भीतर बालकको (और दाय य माताको भी) सर्वगंध

(श्लो० १) तिक्तद्रुमा निंबादयः (श्लो० ४) पुरीषं कौक्कुटं केशांश्चर्म इति-कुक्कुटस्य पुरीषं तस्यैव केशान् चर्म च । जीर्णां च भिक्षुसंघाटीमिति-भिक्षुरत्र शाक्यभिक्षुः बौद्धाख्यपरिव्राजकः तयोर्जीर्णसंघाटी जीर्णवस्त्रं तदेकदेशो गृह्यते (इति नि० सं०) कुक्कुटी स्फटिकरचितकुक्कुटांडसदृशकंदा कुक्कुटीशरीरवत् कुसुमचित्रवल्ली । अनंता सारिवा (इति डल्हनः)

(एलादिगण) के सुंदर जलसे स्नान करावे ॥ ६ ॥ ७ ॥ और "कराला पिंगला मुंडा" इत्यादि मंत्र पढे, अर्थ यह है कि करालरूप, पिंगवर्णवाली, शिरमुंडी हुई, कषायवस्त्र धारण करनेवाली अंधपूतना देवी प्रसन्न होकर इस बालककी रक्षा करे॥ ८॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कौमारभृत्ये त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशत्तमोऽध्यायः ३४.

अथातः शीतपूतनाप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाड़ी अब हम शीतपूतनाके प्रतिषेधका व्याख्यान करते हैं ।

परिषेचनादि ।

कपित्थं सुवहां बिंबीं तथा बिल्वं प्रचीवलम् ॥ नंदीं भल्लातकीं चापि परिषेके प्रयोजयेत् ॥ १ ॥ वस्तमूत्रं गवां मूत्रं मुस्तं च सुरदारु च ॥ कुष्ठं च सर्वगंधां च तैलार्थमवचारयेत् ॥ २ ॥ रोहिणीसर्जखदिरपलाशककुभत्वचः ॥ निःक्काथ्य तस्मिन्निःक्काथे सक्षीरं विपचेद्घृतम् ॥ ३ ॥ गृध्रोलूकपुरीषाणि वस्तगंधामहेस्त्वचः ॥ निंबपत्राणि मधुकं धूपनार्थं प्रयोजयेत् ॥ ४ ॥ धारयेदपि लंबां च गुंजां काकादनीं तथा ॥ नद्यां मुद्गकृतैश्चान्नैस्तर्पयेच्छीतपूतनाम् ॥ ५ ॥ देव्यै देयश्चोपहारो वारुणी रुधिरं तथा॥ जलाशयांते बालस्य स्नपनं चोपदिश्यते ॥६॥ मुद्गौदनाशना देवी सुराशोणितपायिनी ॥ जलाशयालया देवी पातु त्वां शीतपूतना ॥७॥

इति सुश्रुतसंहितायामुत्तरतंत्रे कौमारभृत्ये चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥

कैथ, सुवहा (रास्ना), बिंबी तथा बिल्व, प्राचीबल, नंदीवृक्ष और शुद्ध भिलावें इनके क्काथसे परिषेक करे ॥ १ ॥ बकरीका मूत्र, गोमूत्र, नागरमोथा और देवदारु, कूट और सर्वगंधा इनका तैल साधन करे ॥ २ ॥ रोहिणी (मंजीठ), सर्ज (रालका वृक्ष), खैर, ढाक और कुहा इन सबकी छाल लेकर क्काथ बनावे और उस क्काथमें दूध युक्तकर घृत पकाले (और पान करावे) ॥ ३ ॥ गीध, उल्लू इनकी वीट, वस्तगंधा (शालपर्णी या तुलसी) और सर्पकी कांचली, नींबके पत्ते और मुलेठी इनकी धूनी देवे ॥ ४ ॥ और लंबा (कटु तुंबी), चिरमिठी और काकादनी (काकतिंदुकी) इन्हें धारण करे और नदीके किनारे मूँगोंके भोजनसे शीतपूतनाकी तृप्ति करे ॥ ५ ॥ और देवीके लिये मदिरा और

रुधिर इनसे बलि देवे और जलाशयके किनारे बालकको स्नान करावे ॥ ६ ॥ " मुद्गौदनाशना देवी " इत्यादि मंत्र पढे, अर्थ यह है कि मूंग, चावल (या रंधे मूंग) खानेवाली तथा मदिरा और रुधिर पीनेवाली, जलाशयमें रहनेवाली शीतपूतना देवी तुम्हारी रक्षा करे ॥ ७ ॥

(वक्तव्य) इस परिषेकके काथमें भिलावें लिखे हैं इन्हें शुद्धकर सावधानीसे उपयोग करे ऐसा न हो कि यूंही डालकर काथ करनेमें उसके धुवांसे बनानेवाला मनुष्य सूज जावे, स्नान करानेसे स्नान करानेवाला तथा बालक सब सूज जावें इसका विचार रक्खें।

इति पं० मुरलीधरवि०सुश्रुतसं०भा०टी० उत्तरतंत्रे कौमारभृत्ये चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥

पंचत्रिंशत्तमोऽध्यायः ३५.

अथातो मुखमंडिकाप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाडी अब हम मुखमंडिकाके प्रतिषेधकी व्याख्या करते हैं।

परिषेकादि और उपहार ।

पवनस्तस्मात्तं त्वरया जयेत् ॥ ८६ ॥ तस्य शूलाभिपन्नस्य स्वेदं एवं सुखावहः ॥ पायसैः कृसरापिंडैः स्निग्धैर्वा पिशितैर्हितः॥८७॥

शूलोंके लक्षण तो वर्णन करदिये अब इनकी चिकित्सा श्रवण करो-सब प्रकारके शूलोंमें वायुही शीघ्र शूल करनेवाला है इससे उसे शीघ्रही (बहुत जल्दी) शांत करना चाहिये ॥ ८६ ॥ शूलपीडित मनुष्यको स्वेद कराना (सेककर पसीना दिलाना) ही सुखकारक होताहै इससे दूधके पदार्थों (मावे) आदिसे या कृसरा (खिचडी आदिके पिंडेसे स्निग्ध और वायुनाशक मांसोंसे सेक सेककर स्वेद कराना हित है ॥ ८७ ॥

वायूके शूलका यत्न ।

त्रिवृच्छाकेन वा स्निग्धमुष्णं भुंजीत भोजनम् ॥ चिरबिल्वांकुरान्वापि तैलभृष्टांस्तु भक्षयेत् ॥ ८८ ॥ वैहंगांश्च रसान्स्निग्धाञ्जांगलाञ्छूलपीडितः॥यथालाभं निषेवेत मांसानि बिलशायिनाम् ८९॥

निशोथके शाकके साथ स्निग्ध और गरम भोजन करना चाहिये अथवा करंजके अंकुरोंको तैलमें भूनकर खावे ॥ ८८ ॥ तथा शूलरोगसे पीडित मनुष्य पक्षियोंके मांसका रस स्निग्ध सेवन करे तथा जंगली जीवोंके मांसका रस सेवन करे अथवा यथालाभ बिलमें रहनेवाले जीवोंके मांसका रस सेवन करे ॥ ८९ ॥

सुरा सौवीरकं शुक्तं मस्तूदश्वित्तथा दधि ॥ सकालं लवणं पेयं शूले वातसमुद्भवे ॥ ९० ॥ कुलत्थयूषो युक्ताम्लो लावकीयूषसंस्कृतः ॥ ससैंधवः समरिचो वातशूलविनाशनः ॥ ९१ ॥

मद्य, सौवीर (काँजी), सिरका, दहीका तोड तथा उदश्वित् (आधे पानीयुक्त तक्र) तथा दही इनमेंसे कोई काले नमकके साथ वायुके शूलमें पीवे॥९०॥ कुलत्थका यूष जिसमें खटाई पड़ी हो और लवेके यूषसे संस्कार किया हो तथा सैंधानमक और मिरचें मिली हों यह भी वायुके शूलको नष्ट करता है ॥ ९१ ॥

विडंगं शिग्रुकंपिल्लपथ्याश्यामाम्लवेतसान् ॥ सुरसामश्वकर्णं च सौवर्चलयुतान्पिबेत् ॥ मद्येन वातजं शूलं क्षिप्रमेव प्रशाम्यति ॥ ॥ ९२ ॥ पृथ्वीकाजाजिचविकायवानीव्योषचित्रकाः ॥ पिप्पल्यः पिप्पलीमूलं सैंधवं चेति चूर्णयेत् ॥ ९३ ॥ तानि चूर्णानि पयसा पिबेत्कांबलिकेन वा ॥ ९४ ॥ मध्वासवेन चुक्रेण सुरासौवीरकेन

मुद्गान्मसूरांश्चणकान्कुलत्थान्समकुष्ठकान् ॥ आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥ १४० ॥

सब ज्वरोंमें प्रायः सात दिन मात्रासे (थोडा) भोजन करना (और हितकारक भोजन करना) चाहिये (और ज्वर छोड देनेपर भी कुछ दिन हलकाही भोजन करना) क्योंकि ज्वरका वेग छूटे पीछे भी अन्यथा आहार, विहारसे फिर ज्वरका वेग बढजाया करता है ॥ १३६ ॥ परंतु ज्वरवाला मनुष्य यदि अरुचि भी हो तो भी कुछ थोडासा हलका भोजन तो किया ही करे क्योंकि अन्नके समय भोजन नहीं करनेसे मनुष्य क्षीण होजाताहै अथवा मर जाताहै (यह लंघनसे पीछेकी व्यवस्था जीर्णज्वर या विषमज्वरोंमें करनेकी है) ॥ १३७ ॥ ज्वरका रोगी गरिष्ठ, अभिष्यंदी भोजन तथा बेसमय कभी भोजन नहीं करे क्योंकि गरिष्ठ और बेसमयका भोजन न तो आयुके लिये हित होता है और न सुखके लिये ॥ ॥ १३८ ॥ क्षीण मनुष्यके बहुत दिनका पुराना सततज्वर (निरंतर रहनेवाला) या विषम (अन्येद्युष्क तृतीयकादि) हो तो उसे पथ्य और हलके अच्छे भोजनोंसे उपचार करना चाहिये ॥ १३९ ॥ ज्वरवालेको भोजनके समय मूँग, मसूर, चने, कुलथी और मोठ इनमेंसे यथोक्त यूषके लिये देवे (अर्थात् इनमेंसे जो उचित हो उसका यूष भोजनके वास्ते देना उचित है) ॥ १४० ॥

ज्वरमें मांसकी व्यवस्था ।

लावान्कपिंजलानेणान्पृषताञ्छरभाञ्छशान् ॥ कालपुच्छान्कुरंगांश्च तथैव मृगमातृकान् ॥ मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ॥ १४१ ॥ सारसक्रौंचशिखिनः कुक्कुटांस्तित्तिरींस्तथा ॥ गुरूष्णत्वान्न शंसंति ज्वरे केचिच्चिकित्सकाः ॥ १४२ ॥ ज्वरितानां प्रकोपं तु यदा याति समीरणः ॥ तदैते ऽपि हि शस्यंते मात्राकालोपपादिताः ॥ १४३ ॥

लवा, कपिंजल (सुफेद तीतर), एण (काला मृग), पृषत (साबर), शरभ (एक प्रकारका मृग जिसके ४ पांव नीचे और ४ ऊँचे होते हैं) और शशा, काली पुच्छका मृग और कुरंग (बदामी रंगका मृग) और मृगमातृका इनका मांस मांसभोजी ज्वरवालोंको देना चाहिये ॥ १४१ ॥ सारस, क्रौंचनाम पक्षी, मोर, मुरगा और तीतर ये गरम और भारी (गरिष्ठ) हैं इससे

(श्लो० १४१) कपिंजलान् गौरतित्तिरान् । एणः कृष्णमृगः । पृषतः श्वेतबिंदुलमृगः । "शरभः अष्टपादूर्ध्वनयन ऊर्ध्वपादचतुष्टयः" इत्युक्तलक्षणो मृगभेदः । (इति शा० स्तो०)

पित्तके शूलका यत्न ।

अथ पित्तसमुत्थस्य क्रियां वक्ष्याम्यतः परम् ॥ १०२ ॥ ससुखं छर्दयित्वा तु पीत्वा शीतोदकं नरः ॥ शीतलानि च सेवेत सर्वाण्युष्णानि वर्जयेत् ॥१०३॥ मणिराजतताम्राणि भोजनानि च सर्वशः ॥ वारिपूर्णानि तान्यस्य शूलस्योपरि निःक्षिपेत् ॥ ॥ १०४ ॥ गुडशालियवाः क्षीरं सर्पिःपानं विरेचनम् ॥ जांगलानि च मांसानि भेषजं पित्तशूलिनाम् ॥ १०५ ॥ रसान्सेवेत पित्तघ्नान्पित्तलानि विवर्जयेत् ॥ पालाशं धान्वनं वापि पिबेद्यूषं सशर्करम् ॥ १०६ ॥ परूषकाणि मृद्वीका खर्जूरोदकजान्यपि ॥ तत्पिबेच्छर्करायुक्तं पित्तशूलनिवारणम् ॥ १०७ ॥

इसके अगाडी अब हम पित्तके शूलकी चिकित्सा कहते हैं ॥ १०२ ॥ रोगीको सुखपूर्वक शीतल जलके योगसे वमन कराके शीतल पदार्थोंका सेवन करावे और सब प्रकारके गरम आहार, विहार औषधोंको त्याग दे ॥ १०३ ॥ मणि (बिल्लोर आदि) के, चांदीके, तांबेके पात्रोंको ठंढे पानीसे भरके शूलस्थानपर रक्खे ॥ १०४ ॥ गुड़, चावल और जव खावे तथा घृतपान करे और विरेचन करे तथा जंगली जीवोंका मांस भोजन करे ये पित्तशूलवालेके लिये परम औषध है ॥ १०५ ॥ तथा पित्तनाशक मांसरस सेवन करे और पित्तकारक आहार, विहार त्याग दे और पलाश तथा धान्वनका यूष खांड डालकर पीवे ("पालाशं" की जगह 'पालानां' यहभी पाठांतर है इसका ऐसा अर्थ करते हैं कि पालों (जंगलके पालों) के धान्वन अर्थात् जंगली जीवोंकी मृगयासे उत्पन्न हुए मांसरस शर्करायुक्त पीवे) ॥ १०६ ॥ फालसे, दाख, मुनक्का, खजूर, जलके फल कमलादिक लेकर उनका पन्ना बनाकर खांड मिलाकर पिलावे ये पित्तशूलके निवारण करनेवाले हैं ॥ १०७ ॥

कफशूलका यत्न ।

अशने भुक्तमात्रे तु प्रकोपः श्लैष्मिकस्य च ॥ वमनं कारयेत्तत्र पिप्पलीवारिणा भिषक् ॥ १०८॥ रूक्षः स्वेदः प्रयोज्यः स्यादन्याश्चोष्णाः क्रिया हिताः ॥ पिप्पलीशृंगबेरं च श्लेष्मशूले भिष-

---

(श्लो० १०९) शृंगबेरम् आर्द्रकं शुंठी च ।

ग्जितम् ॥ १०९ ॥ पाठां वचां त्रिकटुकं तथा च कटुरोहिणीम् ॥ चित्रकस्य च निर्यूहे [3]पिबेद्यूषं स [1]सार्जकम् ॥ ११० ॥

कफका शूल भोजन खाते ही कुपित होताहै इसमें वैद्य पिप्पलीके काथसे वमन करावे ॥ १०८ ॥ तथा रूखा स्वेद करावे तथा अन्य उष्ण क्रिया करे और पीपल तथा अदरख मिलाकर खाना कफशूलकी औषध है ॥ १०९ ॥ तथा पाठा, वच, त्रिकटु और कुटकीको चित्रकके काथके संग पीवे अथवा कफनाशक धान्यों-के यूषमें अर्जक (कुठेरक) मिलाकर पीवे ॥ ११० ॥

एरंडफलमूलानि मूलं गोक्षुरकस्य च ॥ शालिपर्णीं पृश्निपर्णीं बृहतीं कंटकारिकाम् ॥१११॥ दद्याच्छृगालविन्नां च सहदेवीं तथैव च ॥ महासहां क्षुद्रसहां मूलं चेक्षुरकस्य च ॥ ११२ ॥ एतत्सं-भृत्य संभारं जलद्रोणे विपाचयेत् ॥ चतुर्भागावशेषं तु यवक्षार-युतं पिबेत् ॥ ११३ ॥ वातिकं पैत्तिकं वापि श्लैष्मिकं सान्निपाति-कम् ॥ प्रसह्य नाशयेच्छूलं छिन्नाभ्रमिव मारुतः ॥ ११४ ॥

एरंडके फल और जड, गोखरूकी जड, शालिपर्णी, पृश्निपर्णी, बडी कटेली, छोटी कटेली ॥ १११॥ शृगालविन्ना (पिठवनका भेद), सहदेवी, माषपर्णी, मुद्ग-पर्णी, तालमखानेकी जड ॥ ११२ ॥ इन सबको इकट्ठा करके द्रोणभर पानीमें काथ करे और चतुर्थांश शेष रहनेपर उतार ले इसे यवक्षारके संग (यवक्षार मिलाके) पीवे ॥ ११३ ॥ यह वात, पित्त, कफ और सन्निपातके शूलको बल-पूर्वक इसप्रकार नाश करता है जैसे पवन बादलोंको नष्ट करता है ॥ ११४ ॥

पिप्पल्यः स्वर्जिकाक्षारो यवाश्चित्रक एव च ॥
सेव्यं चैव समानीय भस्म कुर्याद्विचक्षणः ॥
तदुष्णवारिणा पीतं श्लेष्मशूले भिषग्जितम् ॥ ११५ ॥

पीपल, सज्जीखार, जौ, चित्रक, सेव्य (खस) इन सबको मिलाकर भस्म करलेवे फिर इस भस्मको गरम जलके साथ पीवे यह कफके शूलकी औषध है ॥ ११५ ॥

(श्लो० ११०) पाठादीनां द्रव्याणि चूर्णितानि कल्कितानि वा चित्रकस्य निर्यूहे काथे पिबेदित्येको योगः । यूषं सार्जकमिति द्वितीयो योगः । यूषं शूलहरं शिंबीधान्ययूषं सार्जकम् अर्जकेन सह सः पिबेदित्यर्थः (इति डल्हनः) (श्लो० ११२) शृगालविन्ना पृश्निपर्णीभेदः (इति डल्हनः) (श्लो० ११४) प्रसह्य बलात्कारेण (श्लो० ११५) सेव्यम् उशीरम् ।

पार्श्वशूलके लक्षण ।

रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः ॥ स संरुद्धः करोत्याश्वाध्मानं गुडगुडायनम् ॥११६॥ सूचीभिरिव निस्तोदः कृच्छ्रोच्छ्वासी तदा नरः ॥ नान्नं वांछति नो निद्रामुपैत्यार्तिनिपीडितः॥ ॥ ११७ ॥ पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ॥ ११८ ॥

जब कूख और पँसवाडोंमें स्थितहुआ कफ वायुको रोक देता है तब वह रुका हुआ वायु शीघ्रही अफारा और गुडगुडाहट पैदा करता है ॥ ११६ ॥ सुई चुभनेकीसी पीडा होतीहै और मनुष्यसे कष्टसे श्वास लिया जाता है, अन्नकी इच्छा नहीं होती और पीडित रोगीको निद्रा नहीं आती है ॥ ११७ ॥ इसे कफवायुसे उत्पन्न हुआ पार्श्वशूल (पँसलीका दर्द) कहतेहैं॥ ११८ ॥

पार्श्वशूलका यत्न ।

तत्र पुष्करमूलानि हिंगु सौवर्चलं बिडम् ॥ सैंधवं तुंबुरुपथ्याचूर्णं कृत्वा तु पाययेत् ॥ ११९ ॥ पार्श्वहृद्वस्तिशूलेषु यवक्काथेन संयुतम् ॥ सर्पिः प्लीहोदरोक्तं वा घृतं वा हिंगुसंयुतम् ॥ ॥ १२० ॥ बीजपूरकसारं वा पयसा सह साधितम् ॥ एरंडतैलमथवा मद्यमस्तुपयोरसैः ॥ १२१ ॥ भोजयेच्चापि पयसा जांगलेन रसेन वा ॥ १२२ ॥

इस पार्श्वशूलमें पोहकरमूल, हींग, कालानोंन, बिडनोंन, सैंधानोंन, धनियां और हरडेकी छाल इनका चूर्ण करके पार्श्वशूल, हृदयशूल, वस्तिशूल इन सब रोगोंमें जौके क्काथके संग पिलावे अथवा प्लीहोदरमें कहाहुआ घृत पिलावे अथवा घृतमें हींग मिलाकर चटावे ॥ ११९ ॥ १२० ॥ अथवा बिजोरेका सार (अंतछाल) दूधमें पकाकर देवे अथवा एरंडके तैलको मदिरा या मस्तु या दूध या मांसरस इनमेंसे किसीके संग देवे ॥ १२१ ॥ औषध पचनेपर दूध या जंगली जीवोंके मांसरसके संग भोजन करावे ॥ १२२ ॥

प्रकुप्यति यदा कुक्षौ वह्निमाक्रम्य मारुतः ॥ तदाऽस्य भोजनं भुक्तं सोपस्तंभं न पच्यते ॥ १२३ ॥ उच्छ्वसित्यामशकृता शूलेनाहन्यते मुहुः ॥ नैवासने न शयने तिष्ठन्न लभते सुखम् ॥१२४॥ कुक्षिशूल इति ख्यातो वातादामसमुद्भवः ॥ १२५ ॥

(श्लो० १२४) आमशकृता अपक्वपुरीषेणेत्यर्थः ।

यदि जठराग्निको दबाकर (मन्द करके) वायु कूखमें कुपित हो (अर्थात् जब कुक्षिमें वायु कुपित होकर अग्निको रोक ले) तब उसका भोजन किया हुआ ठिठराकर पचता नहीं अर्थात् ज्योंका त्यों विना पचा धरा रहता है) ॥ १२३ ॥ श्वाससा भरजाता है और कच्चे अन्नके दस्त आतेहैं वारवार शूलकी वेदना होती-है, न बैठे चैन पडता है, न लेटे, न खेडे हुए ॥ १२४ ॥ इसे कुक्षिशूल कहतेहैं यह वायुसे और कच्चे आम (विनपचे) भोजनसे उत्पन्न होताहै ॥ १२५ ॥

कुक्षिशूलकी चिकित्सा ।

वमनं कारयेत्तत्र लंघयेद्वा यथाबलम् ॥ संसर्गपाचनं कुर्यादम्लैर्दीपनसंयुतैः ॥ १२६ ॥ नागरं दीप्यकं चव्यं हिंगु सौवर्चलं बिडम् ॥ मातुलुंग्याश्च बीजानि तथा श्यामोरुवूकयोः ॥ १२७ ॥ बृहत्याः कंटकार्याश्च क्वाथं शूलहरं पिबेत् ॥ वचा सौवर्चलं हिंगु कुष्ठं सातिविषाभया ॥ १२८ ॥ कुटजस्य च बीजानि सद्यःशूलहराणि तु ॥ विरेचनं प्रयुंजीत ज्ञात्वा दोषबलाबलम् ॥ १२९ ॥ स्नेहवस्तीन्निरूहांश्च कुर्याद्दोषनिबर्हणम् ॥ उपनाहाः स्नेहसेका धान्याम्लपरिषेचनम् ॥ १३० ॥

इसमें वमन करावे और बलके अनुसार लंघन करावे और अम्लरस तथा दीपन द्रव्य मिलाकर संसर्ग (कच्चे आम) को पचावे ॥१२६॥ सोंठ, अजवायन, चव्य, हींग, कालानमक, विडनमक, बिजोरेके बीज, निशोथ और एरंड ॥ १२७ ॥ बडी कटेली, छोटी कटेली इनका क्वाथ पीवे यह परम शूलनाशक है अथवा वच, कालानमक, हींग, कूट, अतीस, हरडे ॥ १२८ ॥ और इन्द्रजौ ये भी तत्काल शूलनाश करते हैं (इनका चूर्ण या क्वाथ लेवे) और दोष तथा रोगीका बलाबल देखकर विरेचनका उपयोग करे ॥ १२९ ॥ तथा स्नेहवस्ति और निरूहणवस्ति भी देवे ये दोषको नष्ट करती हैं तथा उपनाह (गरम लेप या भुरता आदि बाँधना)तथा स्नेहका सेक करना अथवा धान्याम्ल (कांजी) का सेचन करना भी श्रेष्ठ है ॥१३० ॥

हृच्छूल ।

कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः ॥ हृदिस्थः कुरुते शूलमुच्छ्वासरोधकं परम् ॥ १३१ ॥ स हृच्छूल इति ख्यातो रसमारुतसंभवः ॥ तत्रापि कर्मभिर्हितं यदुक्तं हृद्विकारिणाम् ॥ १३२ ॥

(श्लो० १२६) संसर्गपाचनं कुर्यात् । संसर्गस्य आमस्य पाचनं संसर्गपाचनम् ।

(श्लो० १३१) हृदिस्थः हृत्समीपस्थः अत्र अजहल्लक्षणायाः सामीप्यकं बोद्धव्यम् ।

कफपित्तसे अवरुद्ध हुआ वायु रसमें मिलकर जब हृदयके समीपमें होता है तब वहां शूल पैदा करता है इस हृदयशूलमें श्वास नहीं लिया जाता और बड़ा कष्ट होता है ॥ १३१ ॥ इसे हृच्छूल कहते हैं यह रस और वायुसे होता है इसमें वही यत्न करना चाहिये जो हृद्रोगमें कहा जावेगा ॥ १३२ ॥

(वक्तव्य) यह शूल आमाशयके उपरिभागमें होता है और यह स्थान हृदयके निकट है इसीसे इसे हृच्छूल कहते हैं ॥

वस्तिशूल और मूत्रशूल।

संरोधात्कुपितो वायुर्वस्तिमावृत्य तिष्ठति ॥ वस्तिवंक्षणनाभीषु ततःशूलोऽस्य जायते ॥ विण्मूत्रवातसंरोधी वस्तिशूलः स मारुतात् ॥ १३३ ॥ नाभ्यां वंक्षणपार्श्वेषु कुक्षौ मेढ्रांत्रमर्दकः ॥ मूत्रमावृत्य गृह्णाति मूत्रशूलः स मारुतात् ॥ १३४॥

मल, मूत्र, अधोवायु इनके रोकनेसे कुपित वायु वस्तिस्थानमें प्राप्त होकर आवर्तरूपसे घूमताहुआ स्थित होता है तब मनुष्यके वस्तिस्थान, वंक्षण (नलें) और नाभि इन स्थानोंमें शूल होता है इसमें दस्त, मूत्र और अधोवायु ये सब रुक जाते हैं यह वायुसे उपजा वस्तिशूल कहलाता है ॥१३३॥ और जब कुपित वायु मेढ्रांत्र (लिंगकी नलियों) को मर्दन करके (दबाकर या रोककर) और मूत्रको रोककर बंद करता है तब नाभि, वंक्षण, पँसवाड़े और कूख इन स्थानोंमें शूल होता है इसे मूत्रशूल कहते हैं यह भी वायुसे होता है ॥ १३४ ॥

विट्शूल।

वायुः प्रकुपितो यस्य रूक्षाहारस्य देहिनः ॥ मलं रुणद्धि कोष्ठस्थं मंदीकृत्य तु पावकम् ॥ १३५ ॥ शूलं संजनयंस्तीव्रं स्रोतांस्यावृत्य तस्य हि ॥ दक्षिणं यदि वा वामं कुक्षिमादाय जायते ॥ ॥ १३६ ॥ सर्वत्र वर्धते क्षिप्रं शूलं तत्र सघोषवत् ॥ पिपासा वर्द्धते तीव्रा भ्रमो मूर्च्छा च जायते ॥ १३७ ॥ उच्चारितो मूत्रितश्च न शांतिमधिगच्छति ॥ विट्शूलमेतज्जानीयाद्विषक्परमदारुणम् ॥ १३८ ॥

(श्लो० १३३) संरोधान्मलमूत्रादीनाम् (श्लो० १३४) मेढ्रांत्रमर्दको वायुः मेढ्रनलिकां संमर्द्य वायुः आवृत्य मूत्रं गृह्णातीति। (श्लो० १३७) सघोषवत् सशब्दवदित्यर्थः।

रूक्ष आहार करनेसे मनुष्यके कोष्ठमें वायु कुपित होता है तब कोष्ठके मलको रोक देता है और अग्निको मंद करदेता है ॥ १३५ ॥ स्रोतों (द्वारों) को रोककर तीव्र शूल पैदा करता हुआ दाहिनी या बांई कूखमें प्राप्त होजाता है ॥१३६॥ तथा शीघ्रही सारे पेटमें शूल फैल जाता है और शब्दसा करता हुआ बढता है और तीव्र प्यास बढ जाती है, भ्रम और मूर्च्छा भी होजाती है ॥ १३७ ॥ दस्त आने या पेशाब आनेपर भी शांति नहीं होती इसे वैद्य परम दारुण विट्शूल जाने (यह कोठेमें मल बढ जानेपर रूक्षता होनेसे होता है) ॥ १३८ ॥

क्षिप्रं दोषहरं कार्यं भिषजा साधु जानता ॥ स्वेदनं वमनं चैव निरूहाः स्नेहवस्तयः १३९ ॥ पूर्वोद्दिष्टान्पाययेत योगान्कोष्ठविशोधनान् ॥ उदावर्तहराश्चास्य क्रियाः सर्वाः सुखावहाः ॥ १४० ॥

जानकार वैद्यको शीघ्रही दोषको हरनेवाली क्रिया करनी चाहिये, स्वेदन कराना, वमन कराना, निरूहणवस्ति और स्नेहनवस्ति करना योग्य है ॥ १३९ ॥ तथा पूर्वोक्त कोष्ठशोधनके योग्य पान कराने चाहिये तथा उदावर्त हरनेवाली सब क्रियायें यहांपर सुख देनेवाली होती हैं ॥ १४० ॥

अतिमात्रं यदा भुक्तं पावके मृदुतां गते ॥ स्थिरीभूतं तु तत्कोष्ठे वायुरावृत्य तिष्ठति ॥ १४१ ॥ अविपाकगतं ह्यन्नं शूलं तीव्रं करोति च ॥ मूर्च्छाध्मानं विदाहं च हृदुत्क्लेशं विलंबिकाम् ॥ १४२ ॥ विरिच्यते छर्दयति कंपतेऽथ विमुह्यति ॥१४३॥

यदि जठराग्नि मन्द होनेपर अधिक भोजन करे तो वह कोष्ठमें (पेटमें) स्थिर होता है (ज्योंका त्यों धरा रहता है) और वायु उसे रोक लेता है ॥१४१॥ इस प्रकार विना पचा अन्न तीव्र शूल पैदा करता है, मूर्च्छा, अफारा और दाह पैदा करता है, जी मिचलाता है (उबकाई आती हैं), विलंबिका होजाती है, वारवार दस्त आते हैं, वमन होते हैं, कंप होजाता है तथा मोह (बेहोशी या बुद्धिभ्रंश) होजाता है ॥ १४२ ॥ १४३ ॥

क्षाराश्चूर्णानि गुटिकाः शस्यंते शूलनाशनाः ॥
गुल्मार्वस्थाः क्रियाः कार्या यथावत्सर्वशूलिनाम् ॥१४४॥

इति सुश्रुतसंहितायां उत्तरतंत्रे कायचिकित्सायां द्विचत्वारिंशोऽध्यायः ॥४२॥

यहां शूलनाशक क्षार, चूर्ण, गोली इत्यादिका उपयोग करना श्रेष्ठ है तथा सब प्रकारके शूलवालोंके लिये गुल्मनाशक क्रियायें करनी भी श्रेष्ठ हैं ॥ १४४ ॥

यूनानीवाले गुल्मको " अकद " कहते हैं और साधारण आदमी "गांठ" या "गोला" कहते हैं ॥

डाक्टरीमें गुल्मको "ट्यूमर" (Tumur) कहते हैं यूनानीवाले आमाशयके शूलको " बजेउलमेदा " कहते हैं और दहिनी तरफ यकृत्में या यकृत्के पास हो तो उसे " बनेउलकबद " कहते हैं और आमाशयके ऊपर हृदयके पास हो तो उसे "बजेउलफवाद" जिसे आम आदमी "दरददिल" कहते हैं और छातीमें दरद हो उसे " जातुलरिया" और पँसलियोंके दरदको " जातुलजंब " कहते हैं और मोटी अंतड़ीके दरदको " कुलंज " कहते हैं ॥

डाक्टरीमें मेदेके मुँहपर कौड़ीके नीचे बहुत दरद हो उसे "ग्यास ट्राइटस" कहते हैं और पसलीके दरद (पार्श्वशूल) को "प्लूरिया" कहते हैं अर्थात् पार्श्वशूलमें कुछ इसके लक्षण मिलते हैं और कुलंजके दरदको "कालक" कहते हैं ॥

(वक्तव्य) यूनानी या डाक्टरीमतसे इन व्याधियोंका विस्तारपूर्वक विवेचन उस मतके बडे २ ग्रंथ देखे विना नहीं आसकता क्योंकि रोगोंके कारणों, रूपों और भेदोंमें मतांतरसे बहुत अंतर होता है ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कायचिकित्सायां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशत्तमोऽध्यायः ४३.

अथातो हृद्रोगप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाडी अब हम हृद्रोगकी चिकित्साका व्याख्यान करते हैं ॥

हृद्रोगका हेतु और संप्राप्ति ।

वेगाघातोष्णरूक्षान्नैरतिमात्रोपसेवितैः ॥ विरुद्धाध्यशनाजीर्णै-
रसात्म्यैश्चापि भोजनैः ॥ १ ॥ दूषयित्वा रसं दोषा विगुणा
हृदयं गताः ॥ कुर्वंति हृदये बाधां हृद्रोगं तं प्रचक्षते ॥ २ ॥
चतुर्विधः स दोषैश्च पंचमः कृमिभिस्तथा ॥ पृथग्लिंगं
प्रवक्ष्यामि चिकित्सितमनंतरम् ॥ ३ ॥

वेगोंके रोकने (या चोट आदिके आघात) से तथा गरम और रूखे अन्नोंके अधिक सेवनसे, विरुद्ध भोजनसे, भोजनपर भोजन करनेसे, अजीर्ण रहनेसे, असात्म्य (जो माफकत न हो ऐसा) भोजन करनेसे ॥ १ ॥ वातादि दोष रसको दूषित करके विगुण होकर (रसमें मिलकर) हृदयमें पहुँचते हैं तब हृदयमें बाधा करते हैं इसे हृद्रोग कहते हैं ॥ २ ॥ यह हृद्रोग चार प्रकारका तो दोषोंसे (वातसे, पित्तसे, कफसे और सन्निपातसे) होता है और पांचवां

कृमियोंसे होता है इन सबके जुदे जुदे लक्षण कहते हैं और इसके पीछे उनकी चिकित्सा भी कहेंगे ॥ ३ ॥

हृद्रोगके लक्षण ।

आयम्यते मारुतजे हृदयं तुद्यते तथा ॥ निर्मथ्यते दीर्यते च स्फोट्यते पाट्यतेपि च ॥ ४ ॥ तृष्णोपदाहचोषाः स्युः पैत्तिके हृदये क्लमः ॥ धूमायनं च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥५॥ गौरवं कफसंस्रावोऽरुचिः स्तंभोग्निमार्दवम् ॥ माधुर्यमपि चास्यस्य बलासावतते हृदि ॥ ६ ॥ उत्क्लेशः ष्ठीवनं तोदः शूलो हृल्लास कस्तमः ॥ अरुचिः श्यावनेत्रत्वं शोषश्च कृमिजे भवेत् ॥ ७ ॥

वायुका हृद्रोग हो तो हृदय खींचासा जावे, व्यथा हो, हृदय मथासा जावे, चीरासा जावे, फोडासा जावे और फाड़ासा जावे ॥ ४ ॥ पित्तका हृद्रोग हो तो तृषा हो, जलन और दाह हो तथा चोष (चूषनेके समान पीडा हो), हृदयमें ग्लानि हो तथा धुवाँसा उठता मालूम पडे, मूर्च्छा (बेहोशी होजावे), पसीना आवे और मुँह सूखे ॥ ५ ॥ कफके हृद्रोगमें भारीपन हो, मुँहसे कफ आवे, अरुचि हो हृदय और शरीर कडे पडजावें, अग्नि मन्द होजावे, मुँह मीठा रहे (और सन्निपातका हृद्रोग हो तो उसमें सब दोषोंके मिले जुले लक्षण हों) ॥ ॥ ६ ॥ और कृमिके हृद्रोगमें मुँहसे पानी (लार) बहे, थूँक ज्यादे आवे, दरद हो, शूल भी हो, जी मिचलावे, उबकाई आवें और अँधेरी आजावे, अरुचि हो, नेत्रोंमें कालापन मालूम पडे और शोष भी हो ॥ ७ ॥

(वक्तव्य) कई ग्रन्थांतरोंमें ऐसा लिखाहै कि सन्निपातका कृमिरोग होनेपर भी यदि मनुष्य गुडादिक कुपथ्यके वस्तु अति भोजन करे तो उसके हृदयमें कृमि उत्पन्न होजातेहैं परन्तु कभी कभी आमाशयके उपरिभागमें कृमि होनेसे भी कृमिका हृद्रोग कहाजाता है क्योंकि यह स्थान हृदयके अत्यन्त समीप है यदि हृदय (अर्थात् कलब यानी हार्ट या प्रीकार्डियम गशा जो इसपर छाई हुई है इन) में कृमि पैदा होजावें तो प्रायः असाध्य होतेहैं पर यदि हृदयके निकट आमाशयके उपरिभागमें हो तो साध्य हो सकतेहैं ॥

भ्रमक्लमौ सादशोषौ ज्ञेयास्तेषामुपद्रवाः ॥
कृमिजे कृमिजातीनां श्लैष्मिकीनां च ये मताः ॥ ८ ॥

(श्लो० ७) यदुक्तं भावप्रकाशे-"त्रिदोषहेतुहृद्रोगे यो दुरात्मा निषेवते ॥ तिलक्षीरगुडादींश्च अत्यिस्तस्योपजायते ॥ १ ॥ मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति ॥ संक्लेदात्कृमयश्चास्य पतंत्युपहतात्मनः ॥ ॥ २ ॥" तस्य लक्षणानि उत्क्लेशादीनि ।

भ्रम, क्लम (ग्लानि), थकान (दिलकी कमजोरी) और शोष (राजयक्ष्मा) ये वातजादि हृद्रोगोंके उपद्रव हैं और कृमिजमें वे उपद्रव होतेहैं जो कफज कृमिरोगमें होतेहैं ॥ ८ ॥

वायुके हृद्रोगका यत्न ।

वातोपसृष्टे हृदये वमयेत्स्निग्धमातुरम् ॥ द्विपंचमूलकाथेन सस्नेहलवणेन तु ॥ ९ ॥ पिप्पल्येलावचाहिंगुयवभस्मानि सैंधवम् ॥ सौवर्चलमथो शुंठीमजमोदांश्च चूर्णितम् ॥ १० ॥ फलधान्याम्लकौलत्थदधिमद्यासवादिभिः ॥ पाययेत्तं विशुद्धं च स्नेहेनान्यतमेन वा ॥ ११ ॥ भोजयेज्जीर्णशाल्यन्नं जांगलैः सघृतै रसैः ॥ वातघ्नसिद्धं तैलं च दद्याद्वस्तिं प्रमाणतः ॥ १२ ॥

वातके हृद्रोगमें रोगीको स्नेहन कराके दशमूलके काथमें स्नेह और लवण मिलाके इससे वमन करावे ॥ ९ ॥ तथा पीपल, इलायची, वच, हींग, जौकी भस्म, सैंधानमक, कालानमक, सोंठ और अजमोदा इनका चूर्ण बनाले ॥ १० ॥ इसे फलाम्ल या धान्याम्ल या कुलथीके क्वाथ या दही या मदिरा या आसव इनमेंसे किसी एकके संग खिलावे या किसी स्नेहके संग इसी चूर्णको खिलावे परंच पहले वमनादि देकर शोधन करलेवे ॥ ११ ॥ और जंगली जीवोंके घृतयुक्त रसके संग पुराने चावलोंको भोजन करावे और वायुनाशक द्रव्योंसे सिद्ध किये तैलकी प्रमाणसे वस्ति भी देनी उचित है ॥ १२ ॥

पित्तके हृद्रोगका यत्न ।

श्रीपर्णीमधुकक्षौद्रसितोत्पलजलैर्वमेत् ॥ पित्तोपसृष्टे हृदये सेवेतं मधुरैः श्रृतम् ॥ १३ ॥ घृतं कषायांश्चोद्दिष्टान्पित्तज्वरविनाशनान् ॥ तृतस्य च रसैर्मुख्यैर्जांगलैः सघृतैर्भिषक् ॥ सक्षौद्रं वितरेद्वस्तिं तैलं मधुकसाधितम् ॥ १४ ॥

पित्तके हृद्रोगमें खँभारी, मुलेठी, शहद, मिश्री, कमल इनके क्वाथसे वमन करावे और मधुर द्रव्यों काकोल्यादिसे सिद्ध किया घृत सेवन करे ॥ १३ ॥ तथा पित्तज्वरके नाश करनेवाले पूर्वोद्दिष्ट क्वाथ पीवे तथा जंगली जीवोंके घृतयुक्त मुख्य मांसरसोंसे तृप्त कियेहुए रोगीके वैद्य मुलेठीसे सिद्धकिये तैलमें शहद मिलाकर वस्तिकर्म करे ॥ १४ ॥

कफके हृद्रोगका यत्न ।

वचानिंबकषायाभ्यां वांतं हृदि कफात्मके ॥ चूर्णं तु पाययेत्तोक्तं वातजे भोजयेच्च तम् ॥ १५ ॥ फलादिमथ मुस्तादिं त्रिफलां वा पिबेन्नरः ॥ श्यामात्रिवृत्कल्कयुतं घृतं वापि विरेचनम् ॥ १६ ॥ बलातैलैर्विदध्याच्च वस्तिं वस्तिविशारदः ॥ १७ ॥

कफके हृद्रोगमें वच और नींबके क्काथसे वमन करावे और वातज हृद्रोगमें कहा हुआ चूर्ण भी उन्हीं अनुपानोंसे पिलावे और यथायोग्य भोजन करावे ॥ १५ ॥ अथवा मदनफलादिक या मुस्तादिगण या त्रिफलाका क्काथ पिलावे तथा श्यामा निशोथ और सुपेद निशोथके कल्कसे युक्त घृत पिलाकर विरेचन देवे ॥ १६ ॥ तथा वस्तिक्रियामें चतुर वैद्य बलातैलकी वस्ति देवे ॥ १७ ॥

कृमिहृद्रोगिणं स्निग्धं भोजयेत्पिशितौदनम् ॥ दध्ना वा पललोपेतं त्र्यहं पश्चाद्विरेचयेत् ॥ १८ ॥ सुगंधिभिः सलवणैर्योगैः साजाजिशर्करैः ॥ विडंगगाढैर्धान्याम्लं पाययेताप्यनंतरम् ॥ १९ ॥ हृदयस्थाः पतंत्येवमधस्तात्कृमयो नृणाम् ॥ यवान्नं वितरेच्चास्यै सविडंगमतः परम् ॥ २० ॥

इति सुश्रुतसं० उत्तरतंत्रे कायचिकित्सायां त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

कृमिके हृद्रोगवाले रोगीको स्निग्ध मांस और भात या दहीके साथ तिलकी पिट्ठीसे तीन दिन तक भोजन करावे फिर विरेचन देवे ॥ १८ ॥ सुगंधियुक्त नमकीन या जीरा और खांडके योगसे जिनमें वायविडंग मिली हों ऐसे विरेचन देवे और फिर ऊपरसे धान्याम्ल पिलावे (और कई "विडंगगाढं" पाठांतर मानकर ऐसा अर्थ करते हैं कि धान्याम्लमें विडंग मिलाकर ऊपरसे पिलावे) ॥ १९ ॥ इससे हृदयस्थ कृमि मनुष्योंके नीचेको दस्तके राहसे निकल जातेहैं इसके पीछे विडंगयुक्त यवका भोजन करावे ॥ २० ॥

(वक्तव्य) हृदयस्थ उन्हीं कृमियोंका यह यत्न है जो आमाशयके ऊर्द्धभागमें हृदयके समीप चिमटेहुए होतेहैं और येही दस्तके राहसे निकल सकतेहैं इन बातोंको वेही वैद्य समझ सकतेहैं जो शारीरकका तत्त्व भली भांति जानतेहैं कि हृत्कमल (अर्थात् दिल यानी हार्ट) में कदाचित् जखम होकर कृमि पैदा हो भी जावें तो वे दस्तके राहसे नहीं निकल सकते, हां शायद श्वासनलका (ट्राकिया) के

मार्गद्वारा मुखसे कोई एक दो निकलकर दिखाई देसकताहै श्रीभगवान् धन्वंतरिजीने आमाशयगत हृदयके समीपके कृमियोंकाही यह पूर्वोक्त यत्न लिखा है ॥

यूनानीवाले हृद्रोगको "अमराजकलब" याने दिलकी बीमारियां कहतेहैं और डाक्टरीमें "हार्टडजीज" (Heart Disease) कहते हैं

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कायचिकित्सायां त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः ४४.

अथातः पांडुरोगप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाडी अब हम पांडुरोगकी चिकित्साका व्याख्यान करतेहैं ।

पांडुरोगके कारण और संप्राप्ति ।

व्यवायमम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीवतीक्ष्णम् ॥
निषेवमाणस्य विदूष्य रक्तं कुर्वंति दोषास्त्वचि पांडुभावम् ॥१॥

अति मैथुन करनेसे, खट्टा, नमकीन पदार्थ विशेष खानेसे, मिट्टी खानेसे, अत्यन्त मद्य पीनेसे, दिनके विशेष सोनेसे, अति तीक्ष्ण पदार्थ या औषधादि सेवन करनेसे कुपितहुए दोष रुधिरको दूषित करके त्वचा आदिमें पीलापन पैदा करते हैं ॥ १ ॥

पांडुके भेद और निरुक्ति ।

पांड्वामयोष्टार्द्धविधः प्रदिष्टः पृथक्समस्तैर्युगपच्च दोषैः ॥
सर्वेषु चैवैष्विह पांडुभावो यतोधिकोऽतः खलु पांडुरोगः ॥ २ ॥

यह पाडुरोग अष्टार्द्ध अर्थात् चार प्रकारका है, सब दोषोंसे पृथक् २ (जैसे वायुका, पित्तका, कफका) और चौथा सन्निपातका इन सब प्रकारके पांडुओंमें प्रायः सब अवयवोंमें पीलापन अधिक होता है इसीसे इसे पांडु (पीलिया) रोग कहते हैं ॥ २ ॥

(वक्तव्य) कई आचार्य इस पांडुका पांचवां भेद मृद्भक्षणजनित और मानतेहैं परंतु वह केवल कारणभेद है जातिभेद नहीं होसकता इसीसे भगवान् धन्वंतरिजीने उसे जुदा नहीं लिखा ॥

पांडुका पूर्वरूप ।

त्वक्स्फोटनं ष्ठीवनगात्रसादौ मृद्भक्षणं प्रेक्षणकूटशोथः ॥
विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥ ३ ॥

(श्लो० २) अष्टार्द्धविधः चतुर्विधः । (श्लो० ३) प्रेक्षणकूटशोथ इति—नेत्राधोभागस्थकूटे शोथ इत्यर्थः ।

त्वचामें फूटनसी होना, मुँहमें धूँक अधिक आना, अंगोंमें शिथिलता होना, मिट्टी खानेकीसी इच्छा होना और नेत्रोंके नीचले डोले सूजेसे मालूम होना, मल और मूत्रमें पीलापन होना, भोजन न पचना ये लक्षण पांडुरोगके पहले पूर्वरूपमें होते हैं ॥ ३ ॥

पांडुके और भेद कामला आदि।

सकामलापालकिपांडुरोगः कुंभाह्वयो लाघरकोऽलसाख्यः ॥
विभाष्यते लक्षणमस्य कृत्स्नं निबोधं वक्ष्याम्यनुपूर्वशस्तत् ॥४॥

इस पांडुरोगके अवस्थाके अनुसार और भी कई भेद हैं जैसे कामला, पालकि या पानकी, कुंभिका लाघर और अलस इन सबके लक्षण अगाडी क्रमसे श्रवण करो हम कहते हैं ॥ ४ ॥

पांडुके लक्षण।

कृष्णेक्षणं कृष्णशिरावनद्धं तद्वर्णविण्मूत्रनखाननं च ॥
वातेन पांडुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥ ५ ॥
पीतेक्षणं पीतशिरावनद्धं तद्वर्णविण्मूत्रनखाननं च ॥
पित्तेन पांडुं मनुजं व्यवस्येद्युक्तं तथान्यैस्तदुपद्रवैश्च ॥ ६ ॥
शुक्लेक्षणं शुक्लशिरावनद्धं तद्वर्णविण्मूत्रनखाननं च ॥
कफेन पांडुं मनुजं व्यवस्येद्युक्तं तथाऽन्यैस्तदुपद्रवैश्च ॥ ७ ॥
सर्वात्मके सर्वमिदं व्यवस्येद्वक्ष्यामि लिंगान्यथ कामलायाः॥८ ॥

वायुके पांडुमें नेत्र काले (पिलाईमें कालापन लिये) हों, नीली २ नसें चमकें और वैसेही कालापन लिये पीले दस्त, मूत्र, नख और मुख हो तथा और भी वायुके उपद्रव उसमें होवें ॥ ५ ॥ पित्तके पांडुमें नेत्र पीले हों और ऐसेही पीले मल, मूत्र नख और मुख हों तथा पीली पीली नसें चमकें और अन्य भी पित्तके उपद्रव हों ॥ ६ ॥ कफके पांडुमें नेत्र सुपेदी लिये पीले हों तथा ऐसे मल, मूत्र, नख और मुख हों तथा सुपेद नसें चमकें और अन्य भी कफके उपद्रव हों ॥७॥ तथा सन्निपातके पांडुमें ये सब लक्षण मिलेहुए मालूम पडें इसके अगाडी हम कामला आदिके लक्षण कहते हैं ॥ ८ ॥

यो ह्यामयांते सहसान्नमम्लंमद्यादपथ्यानि च तस्य पित्तम् ॥
करोति पांडुं वदनं विशेषात्तंद्राबलत्वं प्रथमोदितांश्च ॥ ९ ॥
भेदस्तु तस्याः खलु कुंभसाह्वः शोको महांस्तत्र च पर्वभेदः॥

ज्वरांगमर्दभ्रमसादतंद्रा क्षयान्वितो लाघरकोऽलसाख्यः ॥
तं वातपित्ताभिपरीतलिंगं हलीमकं नाम वदंति तज्ज्ञाः ॥१०॥

जो पांडु (या अन्य रोग) के अंतमें शीघ्रही अम्ल अन्न (खटाई) खावे अथवा अन्य ऐसे कुपथ्य करे जिससे पित्त अति दूषित होकर विशेष पांडु वर्ण मुखको (तथा शरीरको) कर देता है तथा तंद्रा और निर्बलता तथा पूर्वोक्त लक्षण करता है इसे कामला कहते हैं ॥ ९ ॥ इस कामलाहीका भेद कुंभिका है इसमें शोथ विशेष होता है और जोडोंमें दरद होता है और जिसमें ज्वर, अंग टटना, भ्रम, थकान, तंद्रा और क्षीणता हों उसे लाघरक अलसाख्य कहते हैं और इसमें यदि वात, पित्तके चिह्न पायेजावें तो इसे वैद्य हलीमक कहते हैं ॥ १० ॥

(वक्तव्य) पानकी या पालकिके लक्षण ग्रंथांतरसे लिखते हैं-

श्लोक-संतापो भिन्नवर्चस्त्वं बहिरंतश्च पीडता ॥
पांडुता नेत्ररोगाश्च पानकीलक्षणं वदेत् ॥ १ ॥

अर्थ-संताप हो, मल फटा हो, अंदर और बाहर वेदना हो, पीलापन हो, नेत्रोंमें विकृति हो ये पानकीके लक्षण हैं ॥ १ ॥

पांडुरोगके उपद्रव ।

उपद्रवास्तेष्वरुचिः पिपासा छर्दिर्ज्वरो मूर्धरुजाग्निसादः ॥
शोफस्तथा कंठगतोबलत्वं मूर्च्छाऽक्रमो हृद्यवपीडनं च ॥ ११ ॥

पांडु कामला आदिमें ये उपद्रव होते हैं-अरुचि, तृषा, वमन, ज्वर, शिरका दरद, अग्निकी मंदता तथा कंठमें शोथ, निर्बलता, मूर्च्छा, क्रम और हृदयमें पीडा ॥ ११ ॥

साध्यं तु पांडुामयिनं समीक्ष्य स्निग्धं घृतेनोर्द्धमधश्च शुद्धम् ॥
संपादयेत्क्षौद्रघृतप्रगाढैर्हरीतकीचूर्णयुतप्रयोगैः ॥ १२ ॥ पिबेद्घृतं वा रजनीविपक्वं यत्त्रैफलं तैल्वकमेव वापि ॥ विरेचनद्रव्यकृतं पिबेद्धि योगांश्च वैरेचनिकान्घृतेन ॥ १३ ॥ मूत्रे निकुंभार्द्धपलं विपाच्य पिबेदभीक्ष्णं कुडवार्द्धमात्रम् ॥ खादेद्गुडं वाप्यभयाविमिश्रमारग्वधादिक्वथितं पिबेद्वा ॥ १४ ॥

साध्य पांडुरोगवालेको देखकर (अर्थात् अगाडी जो असाध्यके लक्षण कहे हैं जिसमें वे न हों) रोगीको घृतसे स्निग्ध करक ऊपर नीचेसे शुद्ध करके शहद

और घृतमें मिलाके हरीतकीके चूर्ण सहित प्रयोग करे ॥ १२ ॥ अथवा हलदीसे पके घृतको पीवे या त्रिफलाघृत अथवा तिल्वक (लोध) से सिद्ध किये घृतको पान करे अथवा विरेचनद्रव्यों (त्रिवृता आदि)से सिद्ध किये घृतको पीवे तथा विरेचनके योगोंको घृतके संग पीवे ॥ १३ ॥ अथवा निकुंभ (दंती) आधे पल लेकर सोलहगुने मूत्र (गोमूत्र) में पकाकर इसमेंसे २ पल पीवे अथवा हरडेकी छालको गुड़में मिलाकर खावे अथवा आरग्वधादि गणका क्वाथ पीवे ॥ १४ ॥

अयोरजो व्योषविडंगचूर्णं लिह्याद्धरिद्रां त्रिफलान्वितां वा ॥
सर्पिर्मधुभ्यां विदधीत वापि शास्त्रप्रदर्शाभिहितांश्च योगान्॥१५॥
हरेच्च दोषान्बहुशोल्पमात्राञ्छनैर्हि दोषेष्वतिनिर्हृतेषु ॥ धात्री-
फलानां रसमिक्षुजं च मंथं पिबेत्क्षौद्रयुतं हिताशी ॥ १६ ॥ उभे
बृहत्यौ रजनीं शुकाख्यां शुकादनीं चापि सकाकमाचीम् ॥
आदारिबिंबीं सकदंबपुष्पीं विपाच्य सर्पिर्विपचेत्कषाये ॥ १७ ॥
तत्पांडुतां हंत्युपयुज्यमानं क्षीरेण वा मागधिकां यथाग्नि ॥ हितं
च यष्टीमधुकं कषायं चूर्णं समं वा मधुनाऽवलिह्यात् ॥ १८ ॥

लोहका चूर्ण (शोधित मारित लोहभस्म), त्रिकटु, विडंग इनके चूर्णको शहद और घृतके संग चाटे अथवा हलदी, त्रिफला इन्हें शहद और घृतसे चाटे तथा अन्यशास्त्रोक्त प्रयोग करे (यद्यपि लोहचूर्ण इसमें महर्षिजीने शोधित मारित कुछ नहीं लिखा केवल ऐसाका ऐसा लोहचूर्ण उपयोग करना प्रतीत होता है परंतु इस समय विना शोधन मारण किये ठीक नहीं) ॥ १५ ॥ पांडु रोगवालेके दोषोंको थोडा थोडा करके कई वार निकाले क्योंकि ज्यादे एक वार निकालनेसे शोथ होजाता है और हित भोजन करनेवाला रोगी आंवलोंका रस या ईखका रस या मंथ इनमेंसे एकको शहद मिलाके पीवे ॥ १६ ॥ अथवा दोनों कटेली, हलदी, शुकाख्य (चर्मकारवट), शुकादनी (शुकासेंबी कई अनारकी कली कहते हैं) तथा मकोय, आदारिबिंबी (आंउली) और कदम्बपुष्पी इनको पकाकर इनके क्वाथमें घृत पकावे ॥ १७ ॥ ॥ यह घृत उपयोग करनेसे पांडुताको नाश करता है अथवा अग्निबलके अनुसार पीपलोंको दूधके साथ खावे अथवा मुलेठीके क्वाथको शहद मिलाकर पीवे या मुलेठीके चूर्णको शहद समान भागमें मिलाके चाटे ॥ १८ ॥

(श्लो० १७) आदारिबिंबी बिंबफलानुकारिविटपा लोहितफला च (इति डल्हनः) कार्तिककुंडस्तु आँउलीरिति प्रसिद्धा इति व्याख्यानयति ।

गोमूत्रयुक्तं त्रिफलादलानां दत्त्वायसं चूर्णमनल्पकालम्॥ प्रवाल-मुक्तांजनशंखचूर्णं लिह्यात्तथा कांचनगैरिकोत्थम् ॥ १९ ॥ आजं शकृद्वा कुडवप्रमाणं विडं हरिद्रा लवणोत्तमं च ॥ पृथक्पलांशानि समग्रमेतच्चूर्णं हिताशी मधुनाऽवलिह्यात् ॥ २० ॥ मंडूर-लोहाग्निविडंगपथ्याव्योषांशकाः सर्वसमानताप्यैः ॥ मूत्रायुतोयं मधुनावलेहैः पांडुामयं हंत्यचिरेण घोरम् ॥ २१ ॥ विभीतकायो-मलनागराणां चूर्णं तिलानां च गुडश्च मुख्यः ॥ तक्रानुपानो वटकैः प्रयुक्तः क्षिणोति घोरानपि पांडुरोगान् ॥ २२ ॥

त्रिफलाके पत्ते, गोमूत्र इनमें लोहचूर्ण (सार) मिलाकर बहुत दिन सेवन करे अथवा मूंगा, मोती, सुरमा और शंख इनको गोमूत्रके संग (या शहदके संग) चाटे अथवा सोना गेरूको चाटे ॥ १९ ॥ अथवा बकरीकी मेंगनी एक कुडव, विडनोन, हलदी, सैंधानमक ये सब एक एक पल लेकर सबका चूर्ण बनाले और शहद मिलाके चाटे और हित भोजन करे ॥ २० ॥ मंडूर (किट्ट) और लोह इनका चूर्ण (भस्म), चित्रक, विडंग, हरडे, त्रिकटु इन सबको समान भाग ले और समान भाग सोनामक्खी (शुद्ध) मिलावे फिर इसमें गोमूत्र मिलाके शहदके संग चाटे यह शीघ्र घोर पांडुरोगको नष्ट करदेता है ॥ २१ ॥ अथवा बहेडा, लोह, किट्ट, सोंठ और तिल इनका चूर्ण गुडमें मिलाके गोली बनाले और छांछके साथ खिलावे यह भी घोर पांडुरोगको नष्ट करदेता है॥२२॥

सौवर्चलं हिंगु किराततिक्तं कलायमात्राणि सुखांबुना वा ॥ मूर्वाहरिद्रामलकं च लिह्यात्स्थितं गवां सप्तदिनानि मूत्रे ॥२३॥ मूलं बलाचित्रकयोः पिबेद्वा पांडामयार्तोऽक्षसमं हिताशी ॥ सुखांबुना वा लवणेन तुल्यं शिग्रोः फलं क्षीरभुजोपयोज्यम् ॥२४॥

(श्लो० १९) प्रवालो विद्रुमः । मुक्ता मौक्तिकम् । अंजनं सौवीरांजनम् । अन्ये रसांजनमाहुः शंखः समुद्रभवः । तेषां चूर्णं विधिना कार्यम् । (श्लो० २३) : सौवर्चलादीनामेकत्वेन निर्दिष्टानां बहुवचनांतत्वमभिप्रेतं अतः कलायमात्राणि इति विशेषणं, तत् सौवर्चलादीनां प्रत्येकं कलायमात्रमिति बोधनार्थम् (इति डल्हनः) अन्ये तु त्रयाणां मिलित्वा कलायमात्रं प्रमाणं मन्यंते । पांडोः पित्तस्य प्रधानत्वात् केचित् योगमेनं कफपांडुपरमिति मन्यंते (श्लो० २४) लवणेन सैंधवेन तुल्यं शिग्रुफलं कफजे कलायमात्रमित्यनुवर्तनीयम् (इति नि० सं०)

न्यग्रोधवर्गस्य पिबेत्कषायं शीतं सिताक्षौद्रयुतं हितार्शी॥ शालादिकं चाप्यथ सारचूर्णं धात्रीफलं वा मधुनावलिह्यात् ॥ २५ ॥

कालानमक, हींग और चिरायता इनको ले मटरके तुल्य गोली बनाकर निवाये जलके संग खावे अथवा मूर्वा, हलदी और आंवले इन्हें सात दिन गोमूत्रमें भिगोकर चाटे ॥ २३ ॥ अथवा खरेंटी और चित्रककी जडको पांडुरोगी निरंतर कर्षभर पीवे और पथ्यसे रहे अथवा सोहँजनेके फल और नमक समान भाग ले मटरके समान गोली बनावे और इन्हें निवाये पानीसे उपयोग करे और दूध भोजन करे ॥ २४ ॥ अथवा न्यग्रोधादि गणका शीतल कषाय मिश्री और शहद मिलाकर पीवे और हितकारक भोजन करता रहे अथवा शालसारादिके चूर्णको या आंवलोंके चूर्णको शहदके संग चाटे ॥ २५ ॥

विडंगमुस्तत्रिफलाजमोदपरूषकव्योषविनिर्दहन्यः ॥ चूर्णीकृता वा गुडशर्करे च तथैव सर्पिर्मधुनी शुभे च ॥ २६ ॥ संभारमेतद्विपचेन्निधाय सारोदके सारवतो गणस्य ॥ जातं च लेह्यं मतिमान्विदित्वा निधापयेन्मोक्षकजे समुद्गे ॥ २७ ॥ हन्त्येष लेहः खलु पांडुरोगं सशोथमुग्रामपि कामलां च ॥ २८ ॥

चूर्ण किये हुए विडंग, नागरमोथा, त्रिफला, अजमोदा, फालसे, त्रिकडु, चित्रक इन सबके समभागोंको तथा गुड, खांड, घृत और शहद इन सबको शालसारादिक गणके क्वाथमें डालकर पकाता रहे जब पककर अवलेहसा होजावे तब इसे मोक्षक (मोखा) वृक्षकी लकडीके डब्बेमें भर देवे ॥ २६ ॥ २७ ॥ यह अवलेह निश्चय शोथयुक्त पांडुरोगको नष्ट करता है तथा बढी हुई कामलाको भी नष्ट करदेता है ॥ २८ ॥

कामलाका यत्न ।

सशर्करां कामलिनां त्रिभंडी हितां गवाक्षी सगुडा च शुंठी ॥ कालेयके चापि घृतं विपक्वं हितं च तत्स्याद्रजनीविमिश्रम्॥२९॥

कामला रोगवालेको निशोथमें मिश्री मिलाकर उपयोग करना हित है तथा इन्द्रायन और सोंठको गुड मिलाके खाना भी हित है तथा कालीयक (पीतचन्दन दारुहलदीके भेद) से घृत पकावे उसमें (पकते समय) हलदी मिलावे यह भी हित है ॥ २९ ॥

(श्लो० २५) शालादिकं सारचूर्णं शालसारादिचूर्णम् ।

(श्लो० २७) सारवतो गणस्य सारोदके शालसारादिगणसारक्वाथे (इति नि० सं०)

कुंभिकाका यत्न ।

धातुं नदीजं जतु शैलजं वा कुंभाह्वये मूत्रयुतं पिबेद्वा ॥
मूत्रस्थितं सैंधवसंप्रयुक्तं मासं पिबेद्वापि हि लोहकिट्टम् ॥३०॥
दग्ध्वार्कक्षकाष्ठैर्मलमायसं वा गोमूत्रनिर्वापितमष्टवारान् ॥
विचूर्ण्य लीढं मधुनाचिरेण कुंभाह्वयं पांडुगदं निहन्यात् ॥ ३१॥

नदीज धातु (सोनामाक्षिक) या शिलाजीतको गोमूत्रके साथ पीना कुंभिकाको नष्ट करता है अथवा लोहेके किट्टको सैंधानमक मिलाकर गोमूत्रमें भिगोवे और एक महीने तक पीवे (कोई ऐसाभी अर्थ करते हैं कि गोमूत्र और सैंधवमें लोहका किट्ट एक महीनेतक भिगोया रक्खे फिर पीवे) ॥३०॥ अथवा लोहके मैल (मंडूर) को बहेडेकी लकडीकी अग्निमें लाल कर करके आठवार गोमूत्रमें बुझावे फिर इसे पीसकर शहद मिलाकर चाटे यह शीघ्रही कुंभिका नामक पांडुको नष्ट करे ३१

सिंधूद्भवं वाग्निसमं च कृत्वा सिक्त्वा च मूत्रे सकृदेव तप्तम् ॥
लोहं च किट्टं बहुशश्च तप्त्वा निर्वाप्य मूत्रे बहुशस्तथैव ॥ ३२॥
एकीकृतं गोजलपिष्टमेतदर्कध्यमावाप्य पचेदुखायाम् ॥
यथा न दह्येत तथा विशुष्कं चूर्णीकृतं पेयमुदश्वितां तत् ॥
तक्रौदनाशी विजयेत रोगं पांडुं तथा दीपयतेऽनलं च ॥ ३३ ॥

सैंधव नमकको अग्निमें लाल करके उसे एकवार ही गोमूत्रमें बुझा लेवे और लोहके किट्ट (अर्थात् मंडूर) को अनेकवार अग्निमें लाल कर करके वारवार गोमूत्रमें बुझावे ॥ ३२ ॥ फिर इन दोनोंको मिलाकर गोमूत्रमें पीस लेवे फिर उन्हें गोमूत्रयुक्त ही हांडीमें डालकर इतना पकावे कि वह जल नहीं जावे किंतु सूख जावे फिर उसका चूर्ण बना लेवे और उदश्वित् (आधे जल मिली छाँछ) के संग पीवे और इसके पचजानेपर छाँछके संग भात खावे यह प्रयोग पांडुरोगको नष्ट करदेताहै तथा जठराग्निको दीपन करताहै ॥ ३३ ॥

लाघरकका यत्न ।

द्राक्षागुडूच्यामलकीरसैश्च सिद्धं घृतं लाघरके हितं च ॥
गौडानरिष्टान्मधुशर्कराश्च मूत्रासवान्क्षारकृतांस्तथैव ॥ ३४ ॥

(श्लो० ३०) शैलजं जतु शिलाजतु। (श्लो० ३२। ३३) उखायां स्थाल्यां निक्षिप्य मुखं पिधाय पचेत् (इति नि० सं०) (श्लो० ३४) गौडान् अभयारिष्टादीन्। मधुशर्कराश्चेति—मधुशब्देन मध्वासवः सच लोहारिष्टप्रभृतिकः। शर्कराशब्देन शर्करासवः मूत्रासवान्कुष्ठचिकित्सोक्तान् क्षारकृतान् आसवान् श्लीपदपठितान्। (इति डल्हनः)

मुनक्का, गिलोय और आँवले इनके रसमें सिद्ध किया घृत लाघरक संज्ञक पांडुमें हित है तथा गुडके अरिष्ट, मधुके अरिष्ट (लोहारिष्ट) तथा शर्कराके अरिष्ट और मूत्रासव तथा क्षारारिष्ट ये सब हितकारक हैं ॥ ३४ ॥

(वक्तव्य) मूत्रासव कुष्ठचिकित्साप्रोक्त और क्षारासव श्रीपदोक्त बनाना तथा गौडअरिष्टसे अभयारिष्टादि लेने और मध्वासवसे लोहारिष्टप्रभृति लेना ॥

पांडुपर पथ्य ।

स्निग्धौत्रसानामलकैरुपेतान्कोलान्वितान्वापि हि जांगलानाम् ॥ सेवेत शोफाभिहितांश्च योगान्पांड्वामयी शालियवांश्च नित्यम् ॥ ३५ ॥

स्निग्ध जंगली जीवोंके मांसरसमें आँवले मिलाकर या बेर मिलाकर सेवन करे (भोजन करे) तथा शोथ रोगके पथ्यमें जो योग लिखे हैं उन्हें सेवन करे अथवा नित्य चावल या जौके भोजन करे ॥ ३५ ॥

पांडुकी साध्यता ।

श्वासातिसारारुचिकासमूर्च्छातृट्छर्दिशूलज्वरशोफदाहान् ॥ तथाविपाकस्वरभेदसादाञ्जयेद्यथास्वं प्रसमीक्ष्य शास्त्रम् ॥ ३६ ॥

यदि पांडुरोगके उपद्रव श्वास, अतिसार, अरुचि, खाँसी, मूर्च्छा, तृषा, छर्दि, शूल, ज्वर, शोथ, दाह तथा भोजन नहीं पचना, स्वरभेद (आवाज बैठ जाना) और थकान (कम जोरी शिथिलता) ये हों (इनमेंसे जो हों) उन्हें शास्त्रको देखकर (इनकी चिकित्सा देखकर जो पांडुसे विरुद्ध हो) ऐसी रीतिसे इनको शांत करे ॥ ३६ ॥

पांडुकी असाध्यता ।

अंतेषु शूनं परिहीनमध्यं म्लानं तथा तेषु च मध्यशूनम् ॥ गुदेऽथ शेफस्यथ मुष्कयोश्च शूनं प्रताम्यंतमसंज्ञकल्पम् ॥ विवर्जयेत्पांडुकिनं यशोर्थी तथातिसारज्वरपीडितं च ॥ ३७ ॥

इति सुश्रुतसं० उत्तरतंत्रे कायचिकित्सायां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

जिसके हाथ, पांव, मुख सूजे हों और मध्यभाग (धड) पतला पडगया हो अथवा हाथ, पांव, मुख पतले पडगये हों और धड सूजगया हो तथा गुदा, लिंग और अंडकोश सूजे हों, जिसे अँधेरी आती हो, जिसका ज्ञान कम पडगया हो

तथा जो अतिसार और ज्वरसे पीडित हो ऐसा पांडुरोगी असाध्य होताहै यश चाहनेवाला वैद्य ऐसे रोगीको त्याग देवे ॥ ३७ ॥

यूनानी हकीम पांडुको "यरकान" कहते हैं उनके मतसे पांडु (पीलिया) जिगर और पित्तके फितूरसे होताहै और हलीमक (कालापन लिये पीलिया) प्रायः तिल्लीके फितूरसे होता है ऐसा मानते हैं ॥

डाक्टरीमें इस पांडुरोगको जोंडिस (Jaundice) कहते हैं ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कायचिकित्सायां चतुश्चत्वारिंशोऽध्यायः ४४॥

पंचचत्वारिंशत्तमोऽध्यायः ४५.

अथातो रक्तपित्तप्रतिषेधं व्याख्यास्यामः ।

यहांसे अगाडी अब हम रक्तपित्तकी चिकित्साका व्याख्यान करतेहैं ।

क्रोधशोकभयायासविरुद्धान्नातपानलान् ॥ कट्वम्ललवणक्षारती-
क्ष्णोष्णातिविदाहिनः ॥ १ ॥ नित्यमभ्यसतो दुष्टो रसः पित्तं च
कोपयेत् ॥ विदग्धं स्वगुणैः पित्तं विदहत्याशु शोणितम् ॥ २ ॥
ततः प्रवर्तते रक्तमूर्द्धं चाधो द्विधाऽपि वा ॥ आमाशयाद्व्रजे-
दूर्द्धमधः पक्वाशयाद्व्रजेत् ॥ ३ ॥ विदग्धयोर्द्वयोश्चापि द्विधा भागं
प्रवर्तते ॥ केचित्सयकृतः प्लीह्नः प्रवदंत्यसृजो गतिम् ॥ ४ ॥

क्रोध, शोक, भय, परिश्रम, विरुद्ध अन्न, धूप, अग्नि, कटु (चरपरे), खट्टे, लवणके रस तथा क्षार (यवक्षारादि या तेजाब जैसे गन्धकका तेजाब, शोरेका तेजाब आदि) तथा तीक्ष्ण पदार्थ और गरम पदार्थ तथा विदाही अर्थात् दाहजनक पदार्थ ॥ १ ॥ इनका नित्य (या अत्यन्त) सेवन करनेसे रस दुष्ट होकर पित्तको कुपित करता है और अपने हेतुओंसे विदग्ध हुआ पित्त फिर शीघ्रही शोणित (रुधिर) को दग्ध करता है (दूषित करताहै) ॥ २ ॥ वह दूषित या मूर्च्छित हुआ रक्त ऊपरको (मुखनासिकादिसे) या नीचेको (गुदालिंगादिसे) या दोनों तरफ प्रवृत्त होता है, आमाशयमें प्राप्त हो तो ऊपरको आता है और पक्वाशयमें हो तो नीचेको जाताहै ॥ ३ ॥ और जो दोनों स्थानोंमें दूषित होता-

---

(श्लो० ३) ततः प्रवर्तते रक्तमिति—रक्तमित्युपलक्षणम् । तेन संसृष्टं पित्तं च । अतएव रक्तं च पित्तं च रक्तपित्तमिति द्वंद्वः । अथवा रक्तं च तत्पित्तं चेति रक्तपित्तं रागप्राप्तं पित्तमित्युच्यते (इति भा० मि०) वृद्धवाग्भटेपि—"कुपितं पित्तलैः पित्तं द्रवं रक्तं च मूर्च्छते ॥ ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुतस्तनुम् ॥ १ ॥ पित्तं रक्तस्य विकृते संसर्गाद्दूषणादपि ॥ गंधवर्णानुवृत्तेश्च रक्तेन व्यपदिश्यते ॥ २॥"

है तो दोनों तरफ निकलताहै । कोई ऐसा कहतेहैं कि यकृत् और प्लीहासे रुधिर प्रवृत्त होता है ॥ ४ ॥

(वक्तव्य) जब अपने हेतुओंसे रस और पित्त दूषित होकर रुधिरको दूषित करते हैं तब वह दूषित रुधिर रुधिरवाहिनी शिराओंमें गमन करके विरुद्धमार्ग हो यकृत्स्थानसे आमाशय या पक्वाशयकी तरफ प्रवृत्त होताहै और इस दूषित रक्तमें पित्तभी मिलकर रक्तवर्ण हो जाता है । कोई ऐसा भी कहते हैं कि पित्तही रक्त हो जाता है (देखो टिप्पणी)

और कई ग्रन्थांतरोंमें ऊर्द्ध अधोगमन पर इसप्रकार लिखते हैं कि-"ऊर्द्धगं कफसंसृष्टमधोगं मारुतानुगम् ॥ द्विमार्गं कफवाताभ्यामुभाभ्यां तत्प्रवर्तते ॥ १ ॥" अर्थात् कफसे संसृष्ट रक्त पित्त होताहै और वह आमाशयमें प्राप्त होकर ऊर्द्ध-गामी होताहै और वायुसे अनुगत हुआ पक्वाशयमें प्राप्त होकर अधोगामी होता-है तथा कफ वायु दोनोंसे संसृष्ट दोनों मार्गोंसे प्रवृत्त होताहै ॥

ऊर्द्धं साध्यमधो याप्यमसाध्यं युगपद्गतम् ॥ ५ ॥

ऊर्द्धगामी मुखनासिकादिकी तरफ प्रवृत्त होनेवाला रक्तपित्त साध्य होता है और अधोगामी गुदालिंगकी तरफ प्रवृत्त होनेवाला याप्य होताहै और दोनों तरफका असाध्य होताहै ॥ ५ ॥

रक्तपित्तका पूर्वरूप ।

सदनं शीतकामित्वं कंठधूमायनं वमिः ॥
लोहगंधिश्च निःश्वासो भवैत्यस्मिन्भविष्यति ॥ ६ ॥

शरीरमें शिथिलता हो, शीत पदार्थोंको जी चाहे, कंठमें धुवांसा घुटे, वमन हो, श्वासमें लोहेकेसी गंध आवे ये लक्षण रक्तपित्तके पूर्वरूपमें होते हैं ॥ ६ ॥

रक्तपित्तकी संख्या ।

बाह्यासृग्लक्षणैस्तस्य संख्यादोषोच्छ्रितीर्विदुः ॥ ७ ॥

इस रक्तपित्तका संख्याभेद और दोषोंकी प्रधानता शोणितवर्णनीय अध्यायमें कहे हुए लक्षणोंसे जानना (वहां इसके सात भेद लिखे हैं) ॥ ७ ॥

रक्तपित्तके उपद्रव ।

दौर्बल्यश्वासकासज्वरवमथुमदाः पांडुतादाहमूर्च्छाः

(श्लो० ७) बाह्यासृग्लक्षणैरिति-शोणितवर्णनीयोक्तैः "फेनिलमरुणम्" इत्यादिभिः तत्र रक्तपित्तस्य संख्या सप्तविधा (इति नि० सं०)

भुक्ते चान्ने विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा ॥
तृष्णा कंठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनं च
द्वेषो भक्तेऽविपाको विरतिरपि रते रक्तपित्तोपसर्गाः ॥ ८ ॥

दुर्बलता, श्वास, खांसी, ज्वर, वमन, मद, पाण्डुता (शरीर पीला पडना), दाह, मूर्च्छा, भोजन करनेके पीछे जलन, बेचैनी, सदा हृदयको अहितकारक पीडा, तृषा, गल बैठ जाना, शिरमें गरमी रहना, थूकमें पीबसा (या दुर्गंध युक्त पानीसा) आना, भोजनसे द्वेष (अरुचि), अन्न न पचना और विश्राम न होना ये रक्तपित्तके उपसर्ग (उपद्रव) होते हैं ॥ ८ ॥

रक्तपित्तकी असाध्यता ।

मांसप्रक्षालनाभं कथितमिव च यत्कर्दमांभोनिभं वा
मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजंबूफलाभम् ॥
यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारा-
स्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥ ९ ॥

मांस धोवनके समान हो या क्वाथसा हो, कीचड़के पानीसा हो, मेद (चरबी) राध मिले रुधिरसा हो, यकृत्के समान वर्णका हो या पकी जामुनके वर्णका हो, काला हो, नीला हो, मुरदेकेसी गन्धवाला हो ऐसा रुधिर निकले तथा जिसमें ऊपर कहे हुए विकार (उपद्रव) हों या जो इन्द्रधनुषके समान रंग विरंगका हो ऐसा रक्तपित्त असाध्य होता है उसे त्याग देना चाहिये ॥ ९ ॥

रक्तपित्तकी चिकित्सामें उपदेश ।

नादौ संग्राह्यमुद्रिक्तं यदसृग्बालिनो यतः ॥
तेत्पांडुग्रहणीकुष्ठप्लीहगुल्मज्वरावहम् ॥ १० ॥

रक्तपित्तके प्रवृत्त हुए उल्वण रुधिरको आरंभहीमें बलवान् रोगीके रोक देना उचित नहीं क्योंकि वह रुका हुआ रुधिर (यदि सूक्ष्म शिराओंद्वारा त्वचाकी तरफ प्रवृत्त होगा तो) पांडुरोग पैदा करेगा और ग्रहणीमें प्राप्त हो तो ग्रहणीको बिगाडेगा तथा शारीरक धातुओंमें प्राप्त हो तो कुष्ठ पैदा कर देगा और जो प्लीहाकी तरफ आवे तो प्लीहवृद्धि और उदरमेंही कहीं इकट्ठा होजावे तो गुल्म पैदा करे (इस प्रकारके अपक्रम आदिसे पुरुषोंके भी रक्तगुल्म होजाता है) और जो रस और स्वेदवहा शिराओंकी तरफ प्रवृत्त हो तो ज्वर पैदा करेगा ॥ १० ॥

रक्तपित्तकी चिकित्सा।

अधःप्रवृत्तं वमनैरूर्द्धमार्गं विरेचनैः ॥
जयेदन्यतरं चापि क्षीणस्य शमनैरसृक् ॥ ११ ॥

नीचेकी तरफ प्रवृत्त हुए बलवान् रोगीके रक्तपित्तका वमन कराके और ऊर्द्ध-गामीको विरेचन देकर शांत करना (तथा अन्य क्रियाओंसे भी शांत करना) और रोगी निर्बल हो तो वमन, रेचन नहीं देना किंतु केवल शमनकारक उपायोंसे शांत करना चाहिये चाहे वह किसी मार्गसे प्रवृत्त हो ॥ ११ ॥

अतिप्रवृत्तदोषस्य पूर्वं लोहितपित्तिनः ॥ अक्षीणबलमांसाग्नेः कर्तव्यमपतर्पणम् ॥ १२ ॥ लंघितस्य ततः पेयां विदध्यात्स्वल्प-तंडुलाम् ॥ तर्पणं पाचनं लेहान्सर्पींषि विविधानि च ॥ १३ ॥

रोगी यदि क्षीण नहीं हो किन्तु बलवान् पुष्ट और दीप्ताग्निवाला हो और उसके रक्तपित्त अति प्रवृत्त हो तो उसे पहले लंघन करावे ॥ १२ ॥ और उचित लंघनके पीछे थोडे चावलोंकी पेया पिलानी चाहिये तथा तर्पण करना, पाचन वस्तु देना, अवलेह देना और अनेक प्रकारसे यथायोग्य सिद्ध किये हुए घृत देने भी उचित हैं ॥ १३ ॥

द्राक्षामधुककाश्मर्यसितायुक्तं विरेचनम् ॥
यष्टीमधुकयुक्तं च सक्षौद्रं वमनं हितम् ॥ १४ ॥

यदि विरेचन देनेका काम पड़े तो मुनक्का, मुलेठी, खंभारी और मिश्री मिलाकर विरेचन देना और जो वमन करानेका काम पड़े तो मुलेठी और शहद मिलाकर वमन कराना ॥ १४ ॥

पयांसि शीतानि रसाश्च जांगलाः सतीनयूषाश्च सशालिषष्टिकाः॥
पटोलशेलूसुनिषण्णयूथिका वटातिमुक्तांकुरमिंदुवारिजम् ॥१५॥

(श्लो० ११) ननु अधोगं वातानुगं भवति, ऊर्ध्वगं च कफानुगतं, तत्कथं तयोः वमनविरेचनैर्युज्यते, सत्यं, व्याधिप्रत्यनीकत्वात् । अन्यतरम् ऊर्ध्वगमधोगं वा क्षीणस्य पुरुषस्य शमनैर्वमनविरेचनैर्जयेत् तथा च तंत्रांतरे-"ऊर्ध्वगं वाप्यधोगं वा क्षीणस्य शमनैर्जयेत् ॥" (इति नि० सं०)

(श्लो० १५) पयांसि शीतानीति-शीतलानि पयांसीति स्पष्टोऽर्थः । परंतु श्रीमता डल्लनेनेति व्याख्यातम्-शीतानि उत्पलादीनि द्रव्याणि तत्कथितशीतानि पयांसि शीतानि तानि तु पित्तप्राये । जांगला रसा एणादिकृताः तेच वातानुबंधे । सतीनयूषा वर्तुलकलाययूषाः ते च कफानुबद्धपित्ते । तदुक्तं भावप्रकाशेपि-"कफानुगे यूषशाकान् दद्याद्वातानुगे रसम् ॥ पथ्यं सतीनयूषेण सर्पिस्तैलाजसक्तुभिः ॥ १ ॥"-

हितं च शाकं घृतसंस्कृतं सदा तथैव धात्रीफलदाडिमान्वितम् ॥ रसाश्च पारावतशंखकूर्मजास्तथा यवाग्वोऽभिहिता घृतोत्तराः ॥ ॥ १६ ॥ संतानिकाश्चोत्पलवर्गसाधिते क्षीरे प्रशस्ता मधुशर्करोत्तमाः ॥ हिमाः प्रदेहा मधुशर्कराश्च ये घृतानि पथ्यानि च रक्तपित्तिनाम् ॥ १७ ॥

शीतल दूध, जंगली जीवोंके मांसका रस, मटरके यूष, शाली और षष्टिक चावल, परवल, लेहसुवे, निषण्ण (सिरयाई) का शाक, यूथिका (जुईका शाक), वट और अतिमुक्त (तिंदुक या तिरिच्छ) इनके कोमल पत्ते, इंदु (कर्पूर या अश्मंतक), वारिज (कमल) ॥ १५ ॥ तथा घृतसे संस्कार दिये हुए शाक तथा आँवले और अनारयुक्त तथा पारावत (परेवा), शंखका जीव और कछुवा इनका मांस तथा घृतयुक्त यवागू ये भी हितकारक हैं ॥ १६ ॥ और उत्पलादि वर्गसे पकाये दूधकी मलाईमें शहद और मिश्री मिलाकर देना तथा ठंढे लेप करना, शहद और मिश्री या खांड (अथवा मधुशर्करा) और घृत ये सब रक्तपित्तरोग वालेको हितकारक हैं ॥ १७ ॥

मधूकशोभांजनकोविदारजैः प्रियंगुकायाः कुसुमैश्च चूर्णितैः ॥ भिषग्विदध्याच्चतुरः समाक्षिकान्हितांय लेहानसृजः प्रशांतये ॥ ॥ १८ ॥ लिह्याच्च दूर्वावटजांश्च पल्लवान्मधुद्वितीयान्सितकर्णिकस्य ॥ हितं च खर्जूरफलं समाक्षिकं फलानि चान्यान्यपि तद्गुणान्यथ ॥ १९ ॥

महुवा, सोहँजना और कचनाल तथा प्रियंगु इन सबके फूल लेवे और इन्हें पीसकर शहद मिलाकर चतुर वैद्य अवलेह बनावे यह अवलेह रक्तपित्तकी शांतिके लिये हितकारक है (कई ऐसा अर्थ करते हैं कि इन चारों प्रकारके पुष्पोंसे चार अवलेह बनावे) ॥ १८ ॥ अथवा दूध और बडकी कोंपल (अंकुर) इनमें शहद मिलाके चाटे अथवा सुफेद कमलके अंकुरोंमें शहद मिलाके चाटे अथवा खजूरके

–इति । "वटातिमुक्तांकुरमिंदुवारिजम्" इत्यत्र 'वटातिमुक्तांकुरसिंधुवारजम्' इति पाठांतरम् । तत्र अतिमुक्तं तिंदुकम् अंकुराः कोमलपल्लवाः । सिंदुवारः निर्गुंडी । परंतु तस्य पित्तकोपकरत्वात् "इंदुवारिजम्" इति पाठः समीचीनः प्रतीयते ।

(श्लो० १८) चतुरो लेहान् विदध्यात् । अथवा चतुरो भिषक् लेहान् विदध्यात् ।

फल (खजूरिया) को शहद सहित चाटे तथा इसी प्रकारके पित्तनाशक अन्य फलोंको भी शहदके संग चाटना योग्य है ॥ १९ ॥

रक्तातिसारप्रोक्तांश्च योगानत्रापि योजयेत् ॥ शुक्लेक्षुकांडमापोथ्य नवे कुंभे हिमांभसा ॥ २० ॥ योजयित्वा [3]क्षिपेद्रात्रावाकाशे सोत्पलं तु तत् ॥ प्रातः स्रुतं क्षौद्रयुतं पिबेच्छोणितपित्तवान् ॥२१॥

रक्तातिसारमें कहे हुए प्रयोगोंको यहां योजना करना ठीक है अथवा सुफेद इक्षुकांड (पौंडेकी गँडेरियों) को कूटकर रस निकाल लेवे फिर उसे कोरे मिट्टीके घडेमें डाल दे और बराबरका जल मिलादे और कमल भी उसमें डालदे और रातको चौडेमें रखदे प्रभात छानकर शहद मिलाके रक्तपित्तवाला मनुष्य पीवे ॥ २० ॥ २१ ॥

[4]पिबेच्छीतकषायं वा जंब्वाम्रार्जुनसंभवम् ॥
उदुंबरफलं पिष्ट्वा पिबेत्तद्रसमेव वा ॥ २२ ॥

अथवा जामुन, आम और कुहा इनके पत्रों (कोमल पल्लवों) के शीतकषायको (मधुयुक्त) पीवे अथवा गूलरके फलको पीसकर या उसका रस निकालकर (मधुयुक्त करके) पीवे ॥ २२ ॥

त्रपुषीमूलकल्कं वा सक्षौद्रं तंडुलांबुना ॥ पिबेदक्षसमं कल्कं यष्टीमधुकमेव वा ॥ २३ ॥ चंदनं मधुकं रोध्रमेकमेवं समं पिबेत् ॥ करंजबीजमेवं वा सिताक्षौद्रयुतं पिबेत् ॥ २४ ॥ मज्जानमिंगुदस्यैवं पिबेन्मधुकसंयुतम् ॥ सुखोष्णं लवणं बीजं कारंजं दधिमस्तुना ॥२५॥ पिबेद्वापि त्र्यहं मर्त्यो रक्तपित्ताभिपीडितः ॥ रक्तपित्तहराः शस्ता षडेते योगसत्तमाः ॥ २६ ॥

त्रपुषी (ककडी) की जडका कल्क बनाके शहद मिलाके चावलोंके पानीके संग पीवे अथवा कर्षभर मुलेठीका कल्क (शहदके संग) पीवे ॥ २३ ॥ अथवा चन्दन, मुलेठी, लोध इनको समान भाग ले (इनका हिम) पीवे अथवा करंजके बीज, मिश्री और शहदके संग (कल्क करके) पीवे ॥ २४ ॥ अथवा हिंगोटकी गिरीको शहदके संग (कल्क करके) पीवे अथवा करंजके बीज, दधिमस्तु और नमक इन्हें जरा निवाया करके तीन दिन रक्तपित्तसे पीडित मनुष्य पीवे ये छह श्रेष्ठ योग रक्तपित्तके नाश करनेवाले हैं ॥ २५ ॥ २६ ॥

नाकसे रुधिर निकल आनेपर यत्न ।

पथ्यैश्चैवावपीडेषु घ्राणतः प्रस्रुतेऽसृजि ॥ २७ ॥

और जो नाकसे रुधिर बहता हो तो पूर्वोक्त येही छहों प्रयोग अवपीडनमें (नस्य देनेमें) श्रेष्ठ हैं ॥ २७ ॥

अधिकरक्तनिकलेपर यत्न ।

अतिप्रस्रुतरक्तो वा क्षौद्रयुक्तं पिबेदसृक् ॥

यकृद्वा भक्षयेदाजमामं पित्तसमायुतम् ॥ २८ ॥

जिसके किसी मार्गसे अधिक रक्त निकल गया हो वह शहद मिलाकर बकरेका रुधिर पान करे अथवा बकरेका यकृत् (जिगर) पित्त समेत कच्चाही खावे ॥ २८ ॥

रक्तपित्तपर अन्ययोग ।

पलाशवृक्षस्वरसे विपक्वं सर्पिः पिबेत्क्षौद्रयुतं सुशीतम् ॥

वनस्पतीनां स्वरसैः कृतं वा सशर्करं क्षीरघृतं पिबेद्वा ॥ २९ ॥

द्राक्षामुशीराण्यथ पद्मकं सितां पृथक्पलांशान्युदके समावपेत् ॥

स्थितं निशां तद्रुधिरामयं जयेत्पीतं पयो वांबुसमं हिताशिनः ॥ ३० ॥

तुरंगवर्च्चःस्वरसं समाक्षिकं पिबेत्सिताक्षौद्रयुतं वृषस्य वा ॥

लिहेत्तथा वास्तुकबीजचूर्णं क्षौद्रान्वितं तंडुलसाह्वयं वा ॥ ३१ ॥

ढाकके स्वरसमें पकाये हुए घृतको शीतल करके शहद मिलाके पीवे अथवा वनस्पति (वट, पिप्पलादि) के स्वरसमें पका हुआ घृत इसी भांति पीवे अथवा दूध, घृत, खांड इन्हें मिलाके पीवे ॥ २९ ॥ मुनक्का, खस, पद्माख, मिश्री इन सबको पल पल भर लेकर पानीमें भिगादे और रातभर भीगने दे और प्रभात (शहद मिलाके) पीवे यह रुधिरके विकार (रक्तपित्त) को शांत करताहै अथवा दूधमें बराबरका पानी मिला (लहसी) बनाके पीवे और हितकारक भोजन करे ॥ ३० ॥ अथवा घोडेकी लीदका रस शहद मिलाके पीवे अथवा बैलके गोबरका रस शहद मिलाके पीवे अथवा बथुवेके बीजोंका चूर्ण शहद मिलाके चाटे अथवा चौलाईको शहदके संग सेवन करे ॥ ३१ ॥

लिह्याच्च लाजांजनचूर्णमेकमेवं सिताक्षौद्रयुतां तुगाख्याम् ॥

(श्लो० ३१) तंडुलसाह्वयं तंडुलीयकम् ।

द्राक्षां सितां तिक्तकरोहिणीं च हिमांबुना वा मधुकेन युक्ताम् ॥
पथ्यामहिंस्रां रजनीं घृतं च लिह्यात्तथा शोणितपित्तरोगी॥३२॥

धानकी खील और अंजन-रसौत (कई सौवीरांजन अर्थात् सुरमा कहतेहैं) इनका चूर्ण बनाकर शहदके संग चाटे अथवा वंशलोचन, मिश्री इन्हें शहदमें मिलाके चाटे अथवा दाख (मुनक्का), मिश्री और कुटकी इनको ठंढे पानीसे पीवे और मुलेठी भी मिलाले अथवा हरडे, अहिंस्रा (बालछड या हींस), हलदी और घृत इन्हें चाटे (शहद युक्त चाटे) रक्तपित्तके रोगीको ये सब योग हितकारक हैं ॥ ३२ ॥

वासाकषायोत्पलमृत्प्रियंगुनेत्रांजनांभोरुहकेशराणि ॥ पीत्वा सिताक्षौद्रयुतानि जह्यात्पित्तासृजो वेगमुदीर्णमाशु ॥३३ ॥ गा-
यत्रिजंब्वर्जुनकोविदारशिरीषरोध्राशनशाल्मलीनाम् ॥ पुष्पाणि शिग्रोश्च विचूर्ण्य लेह्यो मधुवन्वितः शोणितपित्तरोगे ॥ ३४॥

अडूसेका काथ कर उसमें कमल और मिट्टी (मुलतानी मिट्टी या वानी मिट्टी), गोंदी, रसौत और कमलकी केशर इनमें मिश्री और शहद मिलाकर पीवे तो यह शीघ्रही बढे हुए रक्तपित्तके उग्र वेगको जीतलेताहै ॥ ३३ ॥ तथा खैर, अर्जुन, जामुन, कचनाल, शिरस, लोध, विजयसार और सेमल तथा सोहँजना इन सबके फूल पीसकर शहद मिलाके रक्तपित्तके रोगमें चाटना श्रेष्ठ है ॥ ३४ ॥

सक्षौद्रामिंदीवरभस्मवारि करंजबीजं मधुसर्पिषी च ॥ जम्ब्वर्जु-
नाम्रकथितं च तोयं घ्नंति त्रयः पित्तमसृक् च योगाः ॥ ३५ ॥
मूलानि पुष्पाणि च मातुलुंग्याः पिष्ट्वा पिबेत्तंडुलधावनेन ॥
घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा ॥ ३६ ॥
द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करं चेक्षुरसं हिमं वा ॥ शीतो-
पचारं मधुरं च कुर्याद्विशेषतः शोणितपित्तरोगे ॥ ३७ ॥

नीलकमलको जलाकर उसका भस्म शहद मिलाकर चाटे अथवा करंजबीजोंको शहद और घृतसे चाटे अथवा जामुन, कुहा, आम इनका काथ पीवे ये तीन प्रयोग रक्तपित्तको नष्ट करतेहैं ॥ ३५ ॥ अथवा बिजोरेकी जड और उसके फूल पीसकर चावलोंके धोवनके संग पीवे और जो नाकसे रुधिर आता हो तो इस जलको नासिकामें धारण करे अथवा दूधमें खांड मिलाके उसकी नस्य ले ॥ ॥ ३६ ॥ अथवा मुनक्काका रस, दूधका घृत, खांड मिलाके पीवे अथवा ईखका

रस निकालकर ठंढा २ पीवे और अन्य शीतल और मधुर उपचार विशेष करके रक्तपित्तरोगमें करने चाहिये ॥ ३७ ॥

द्राक्षाघृतक्षौद्रसितायुतेन विदारिगंधादिविपाचितेन ॥
द्राक्षां सितां मागधिकां च तुल्यां सशृंगवेरं मधुकं तुगां च॥२०॥
लिह्याद्घृतक्षौद्रयुतां समांशां सितोपलां वा मरिचांशयुक्ताम् ॥
धात्रीकणाविश्वसितोपलाश्च संचूर्ण्य मंडेन पिबेच्च दध्नः ॥ २१ ॥

अथवा सोंठ और पीपल, गुड (पुराने गुड) में मिलाके खावे अथवा मुनक्काको घृत और शहदके संग पीसके चाटे अथवा मुनक्का, मिश्री, पीपल इन्हें समान भाग लेकर या अदरख, मुलेठी, वंशलोचन इन्हें लेके शहद और घृतसे चाटे ॥ २० ॥ अथवा शहद, घृत, मिश्री इनमें चौथाई मिरच मिलाके चाटे अथवा आंवले, पीपल, सोंठ, मिश्री इन्हें पीस चूर्ण बना दहीके मांडसे पीवे ॥ २१ ॥

हरेणुकां मागधिकां च तुल्यां दध्ना पिबेत्कासगदाभिभूतः ॥
उभे हरिद्रे सुरदारु शुंठीं गायत्रिसारं च पिबेत्समांशम् ॥ २२ ॥
वस्तस्य मूत्रेण सुखांबुना वा दंतीं द्रवंतीं च सतिल्वकांशाम् ॥
भृष्टानि सर्पिष्यथ बादराणि खादेत्पलाशानि ससैंधवानि ॥ २३ ॥
कोलप्रमाणं प्रपिबेद्धि हिंगु सौवीरकेणाम्लरसेन वापि ॥
क्षौद्रेण लिह्यान्मरिचानि वाऽपि भार्ङ्गीवचाहिंगुकृता च वर्तिः२४॥

हरेणुका, पीपल इन्हें बराबर लेकर खांसीका रोगी दहीके संग पीवे अथवा दोनों हलदी, देवदारु, सोंठ, खैरसार इन्हें बराबर लेकर ॥ २२ ॥ बकरेके मूत्रसे

(श्लो० २४) अस्य श्लोकस्य चतुर्थपादस्यान्वयोऽग्रिमेण श्लोकेन सह कार्यः । यथा "भार्ङ्गीवचाहिंगुकृता च वर्तिः घृतसंप्रयुक्ता धूमे प्रशस्ता" इत्यन्वयः । अथवा केचिदेवमाहुः—भार्ङ्गीवचाहिंगुकृतां च वर्तिं गुटिकामपि क्षौद्रेण लिह्यात् ।

पीवे अथवा दंती और द्रवंतीको चौथाई लोध मिलाकर गरम पानीसे पीवे अथवा बेरीके पत्तोंको घृतमें भूनकर सैंधानमक मिलाके खावे ॥ २३ ॥ अथवा कोल प्रमाण हींगको सौवीर (कांजी) से या अम्लरससे पीवे (इस समय इसकी मात्रा कम लेनी चाहिये-चने बराबर ही बहुत है) अथवा काली मिरचोंको शहदके संग चाटे अथवा भारंगी, वच और हींग इनकी बत्ती बनाकर धूमपान करे, कई ऐसा अर्थ करते हैं कि इनकी गोली बनाकर खावे) ॥ २४ ॥

खाँसीमें धूमपान ।

धूमे प्रशस्ता घृतसंप्रयुक्ता वेणुत्वगेलालवणैः कृता च ॥ २५ ॥
मुस्तेंगुदीत्वङ्मधुकाह्वमांसीमनःशिलालैश्छगलांबुपिष्टैः ॥
विधाय वर्तीः स पयोनुपानं धूमं पिबेद्वातबलासकासी ॥ २६ ॥

बाँसकी छाल, इलायची, नमक इनकी बत्ती बना घृत मिलाके अथवा नागरमोथा, हिंगोट, तज, मुलेठी, जटामांसी, मैनसिल और हरताल इन्हें बकरेके मूत्रमें पीसकर बत्ती बनाके (घृत चुपडकर) धूमपान करे और ऊपरसे दूध पीवे यह धूमपान वायु और कफकी खांसीमें श्रेष्ठ है ॥ २५ ॥ २६ ॥

पिबेच्च सीधुं मरिचान्वितं वा तेनाशु कासं शममभ्युपैति ॥
द्राक्षांबुमंजिष्ठसुराह्वयाभिः क्षीरं शृतं माक्षिकसंप्रयुक्तम् ॥ २७॥
निदिग्धिकानागरपिप्पलीभिः खादेच्च मुद्गान्मधुना सुसिद्धान् ॥
उत्कारिकां सर्पिषि नागराढ्यां पक्त्वा समूलैस्त्रुटिकोलपत्रैः ॥
एभिर्निषेवेत कृतां च पेयां तन्वीं सुशीतां मधुना विमिश्राम्॥२८॥

अथवा सीधु (मद्य) को काली मिरच मिलाके पीवे इससे शीघ्रही खांसी (कफकी खांसी) शांत होजाती है अथवा मुनक्का, नेत्रवाला, मँजीठ और देवदारु इनसे दूध पकाकर उसमें शहद मिलाके पीवे ॥ २७ ॥ अथवा छोटी कटेली, सोंठ, पीपल इनके काथसे मूँग पकाकर शहदके संग खावे अथवा सोंठ और पीपलामूल, इलायची और कोलपत्र (पत्रज) (कई बेरीके पत्ते कहते हैं) इनके योगसे हलवा बनाकर खावें अथवा ये ही डालकर पतली पेया बनावे उसे ठंढी करके शहद मिलाके पीजावे (लप्सी या पेया गोधूमादि धान्यों या तंडुलादिकी यथायोग्य बनावे उसमें पूर्वोक्त औषधोंका योग कर दे) ॥ २८ ॥

वायुकी खाँसीका यत्न ।

यत्प्लीह्नि सर्पिर्विहितं षडंगं तद्वातकासं जयति प्रसह्य ॥
विदारिगंधादिकृतं घृतं वा रसेन वा वासकजेन पक्वम् ॥ २९ ॥
विरेचनं स्नैहिकमत्र चोक्तमास्थापनं चाप्यनुवासनं च ॥
धूमं पिबेत्स्नैहिकमप्रमत्तः पिबेत्सुखोष्णं घृतमेव चात्र ॥ ३० ॥
हिता यवाग्वश्च रसेषु सिद्धाः पयांसि लेहाः सघृतास्तथैव ॥ ३१ ॥

जो प्लीह रोगमें षडंग घृत कहाहै वह वायुकी खांसीको बलपूर्वक नष्ट करता-है अथवा विदारिगन्धादिक गणसे सिद्ध किया या अडूसेके रससे सिद्ध किया घृत भी श्रेष्ठ है ॥ २९ ॥ विरेचन यहां स्नेहसहित देना उचित है और आस्थापन तथा अनुवासनवस्ति करना ठीक है तथा सावधान होकर स्नेहोंके धूमपान करना तथा गरम घृत पीना भी श्रेष्ठ है ॥ ३० ॥ तथा मांसके रसोंमें पकाईहुई यवागू पिलाना या घृतयुक्त दूध या अवलेह भी श्रेष्ठ होते हैं ॥ ३१ ॥

कफज खाँसीका यत्न ।

प्रच्छर्दनं कायशिरोविरेकास्तथैव धूमाः कवलग्रहाश्च ॥
उष्णाश्च लेहाः कटुका निहन्युः कफं विशेषेण विशोषणं वा ॥३२॥
कटुत्रिकं चापि वदंति पथ्यं घृतं कृमिघ्नस्वरसे विपक्वम् ॥
निर्गुंडिपत्रस्वरसे विपक्वं सर्पिः कफोत्थं वि निहंति कासम् ॥ ३३ ॥
पाठाबिडव्योषविडंगसिंधुत्रिकंटरास्नाहुतभुग्वलाभिः ॥
शृंगीवचांभोधरदेवदारुदुरालभाभार्ङ्ग्यभयाशठीभिः ॥ ३४ ॥
सम्यग्विपक्वं द्विगुणेन सर्पिर्निदिग्धिकायाः स्वरसेन चैतत् ॥
श्वासाग्निसादस्वरभेदभिन्नान्निहंत्युदीर्णानपि पंच कासान् ॥३५॥

वमन कराना, देहका और शिरका विरेचन करना, धूमपान और उष्ण कवल धारण करना तथा ऐसे ही अवलेह चाटना तथा कटुक (चरपरे) द्रव्य सेवन करना और विशेष करके शोषण द्रव्योंका उपयोग करना ये सब यत्न कफको (कफज कासको) हरनेवाले हैं ॥ ३२ ॥ त्रिकटु भी इसमें पथ्य कहते हैं तथा वाय-विडंगके स्वरसमें पकायाहुआ घृत अथवा सिम्हालूके पत्तोंके रसमें पकाया घृत कफकासको नष्ट करदेताहै ॥ ३३ ॥ अथवा पाठा, बिडनमक, त्रिकटु, बिडंग

(श्लो० २९) प्रसह्य बलेन इत्यर्थः ।

सैंधानमक, गोखरू, रास्ना, चित्रक, खरेंटी, काकड़ासींगी, वच, मोथा, देवदारु, दुरालभा (जवासा), भारंगी, हरडे और कचूर इन सबको लेकर सबसे दूना छोटी कटेलीका रस डालकर घृत पकावे यह घृत श्वासरोगों, मंदाग्नि, स्वरभेद तथा भिन्नहुए (क्षतजों) (अथवा स्वरभंगके भेदों) को तथा पांचों प्रकारके उग्र कासों (खांसी) को नष्ट करदेताहै ॥ ३४ ॥ ३५ ॥

पित्तज खाँसीके यत्न।

विदारिगंधोत्पलसारिवादीन्निः क्वाथ्य वर्गान्मधुकं च कृत्स्नम् ॥
घृतं पचेदिक्षुरसांबुदुग्धैः काकोलिवर्गे च सशर्करं तत् ॥
प्रातः पिबेत्पित्तकृते च कासे रतिप्रसूते क्षयजे च कासे ॥३६॥
खर्जूरभार्ङ्गीमगधापियालमधूलिकैलामलकैः समांशैः ॥
चूर्णं सिताक्षौद्रघृतप्रगाढं त्रीन्हंति कासानुपयुज्यमानम् ॥ ३७॥

विदारिगन्धादिगण, उत्पलादि और सारिवादिगण, मधुरगण सब इनका क्वाथ बनाके तथा ईखका रस, जल और दूध भी डाले तथा काकोल्यादि गणका कल्क डालकर घृत पकालेवे इसे नित्य प्रभात मिश्री मिलाकर पान करे यह घृत पित्तकी खांसीको तथा अति मैथुनसे उपजी क्षयज खांसीको दूर करताहै ॥ ॥ ३६ ॥ तथा खर्जूर (खजूरिये), भारंगी पीपल, चिरोंजीके ऊपरका खाद्य पदार्थ, मधूलि (मूर्वा कोई गोधूम और कोई मर्कटक कहते हैं), इलायची, आंवले इनको समान भाग लेकर चूर्ण बनावे इसे मिश्री, शहद और घृतमें सानकर खावे यह तीनों प्रकारकी खांसीको दूर करता है ॥ ३७ ॥

क्षतज और क्षयज खाँसीके यत्न।

रक्ताहरिद्रांजनवह्निपाठामूर्वोपकुल्या विलिहेत्समांशाः ॥
क्षौद्रेण कासे क्षतजे क्षयोत्थे पिबेद्घृतं चेक्षुरसे विपक्वम् ॥३८॥
चूर्णं पिबेच्चामलकस्य वापि क्षीरेण पक्वं सघृतं हिताशी ॥
चूर्णानि गोधूमयवोद्भवानि काकोलिवर्गश्च कृतः सुसूक्ष्मः ॥३९॥
कासेषु पेयास्त्रिषु कासवद्भिः क्षीरेण सक्षौद्रघृतेन वापि ॥
गुडोदकं वा क्वथितं पिबेद्धि क्षौद्रेण शीतं मरिचोपदंशम् ॥ ४०॥

मंजीठ, हलदी, अंजन (रसांजन, कोई सौवीरांजन कहतेहैं), चित्रक, पाठा, मूर्वा, पीपल इन्हें समान भाग लेके शहद मिलाकर क्षतज और क्षयज खांसीमें

(श्लो० ३६) रतिप्रसूते अतिमैथुनजन्ये।

चाटे अथवा ईखके रसमें पकाये हुए घृतको पीवे ॥ ३८॥ तथा आंवलोंके चूर्णको दूधमें पकावे फिर उसे घृतयुक्त करके पान करे और हित भोजन करे अथवा गेहूँ और जौका चूर्ण (रवा) और काकोल्यादिगणका महीन चूर्ण इन्हें दूधसे (दूधमें पकाके) शहद और घृत मिलाके तीनों प्रकारके (पित्तज, क्षतज और क्षयज) खाँसीके रोगमें पीना उचित है अथवा गुडोदक (गुडका क्वाथ) ठंढा करके शहद डालकर काली मिरच मिलाके पीवे ॥ ३९ ॥ ४० ॥

कल्याण गुड़ ।

प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्त्वार्द्धतुलां गुडस्य ॥
चूर्णीकृतैर्ग्रंथिकचव्यजीरव्योषेभकृष्णाहबुषाजमोदैः ॥ ४१ ॥
विडंगसिंधुत्रिफलायवानीपाठाग्निधान्यैश्च पिचुप्रमाणैः॥
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद्यथावत् ॥४२॥
तं भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगंधियुक्तम् ॥
अनेन सर्वे ग्रहणीविकाराः सश्वासकासस्वरभेदशोषाः ॥ ४३ ॥
शाम्यंति चायं चिरमंतरग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ॥
स्त्रीणां च वंध्यामयनाशनः स्यात्कल्याणको नाम गुडः प्रतीतः ४४

आँवलोंका रस तीन प्रस्थ और स्वच्छगुड आधा तुला लेवे और पीपलामूल, चव्य, जीरा, त्रिकटु, गजपीपल, हाऊबेर, अजमोदा ॥ ४१ ॥ विडंग, सैंधानमक, त्रिफला, अजवायन, पाठा, चित्रक, धनिया ये सब पिचु (कर्ष कर्ष) प्रमाण लेकर चूर्ण करले और आठ पल निशोथ लेके पीसले और आठ पलही तैल लेवे और विधिसे पकालेवे ॥ ४२॥ और दालचीनी, इलायची, तेजपात ये यथारुचि डाले और इसमेंसे एक कर्ष भरके अनुमान नित्य खावे इससे ग्रहणीके सब विकार श्वास, खांसी, स्वरभेद और क्षय ये रोग सब दूर होजाते हैं ॥ ४३ ॥ और जठराग्निको तथा नष्ट हुए पुरुषसत्त्वको भी यह बढाताहै तथा स्त्रियोंके वन्ध्यापनको नष्ट करताहै यह कल्याण नामक गुड कहाहै ॥ ४४ ॥

अगस्त्यावलेह ।

द्विपंचमूलेभकणात्मगुप्ताभार्ङ्गीशठीपुष्करमूलविश्वान् ॥
पाठामृताग्रंथिकशंखपुष्पीरास्नाग्न्यपामार्गबलायवासान् ॥ ४५ ॥
द्विपालिकान्नस्य यवाढकं च हरीतकीनां च शतं गुरूणाम् ॥

द्रोणे जलेस्याढकसंयुते च क्काथे कृते पूतचतुर्थभागे ॥ ४६ ॥
पचेत्तुलां शुद्धगुडस्य दत्त्वा पृथक्च तैलात्कुडवं घृताच्च ॥
चूर्णं च तावन्मगधोद्भवाया देयं च तस्मिन्मधु सिद्धशीते॥४७॥
रसायनात्कल्कमतो विलिह्याद्वे चाभये नित्यमथांशु हन्यात् ॥
तद्राजयक्ष्मग्रहणीप्रदोषशोफाग्निमांद्यस्वरभेदकासान् ॥ ४८ ॥
पांड्वामयश्वासशिरोविकारान्हृद्रोगहिक्काविषमज्वरांश्च ॥
मेधाबलोत्साहमतिप्रदं च चकार चैतद्भगवानगस्त्यः ॥ ४९ ॥

दशमूल, गजपीपल, केवांच, भारंगी, कचूर, पुष्करमूल, सोंठ, पाठा, गिलोय, पीपलामूल, शंखपुष्पी, रास्ना, चित्रक, ओंगा, खरेंटी और जवासा ॥ ४५ ॥ ये सब दो २ पल लेकर चूर्ण करे और जौ एक आढक ले और हरड बडीबडी १०० लेवे इन (यव और हरीतकी) को द्रोणभर पानीमें सिजावे, चतुर्थांश शेष रहे पर छान ले ॥ ४६ ॥ फिर शुद्ध गुड एक तुला लेकर इसमें पकावे और ४ पल तैल (तिलका) और ४ पल घृत और ४ पल ही पीपलका चूर्ण डाले वे हरडे भी डालदे और जब सिद्ध होके ठंढा हो तब इतनाही शहद डाल दे ॥ ४७ ॥ इस रसायनमेंसे दो हरडे नित्य खावे और उस लेहमेंसे भी चाट लिया करे यह राजयक्ष्मा, ग्रहणीके दोष, शोथ, मंदाग्नि, स्वरभंग और खांसी इन सबको नष्ट करे ॥ ४८ ॥ तथा पांडुरोग, श्वास, शिरके विकार, हृद्रोग, हुचकी और विषम-ज्वर इन्हें भी नष्ट करे तथा बुद्धि, बल, उत्साह और धारणाशक्ति इन्हें बढावे यह रसायन प्रयोग भगवान् अगस्त्य ऋषिने निर्माण किया है ॥ ४९ ॥

कुलीरशुक्तीचटकैणलावान्निःक्काथ्य वर्गैर्मधुरैस्तथान्यैः ॥
पचेद्घृतं तत्तु निषेव्यमाणं हन्यात्क्षतोत्थं क्षयजं च कासम्॥५०॥
शतावरीनागबलाबलादिभिर्घृतं विधेयं च हिताय कासिनाम् ॥५१॥

इति सुश्रुतसं०उत्तरतंत्रे कायचिकित्सायां द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥

केकडा, जलकी सीप, चिड़ा, हिरन, लवा इन्हें तथा अन्य मधुरवर्ग, काकोल्यादिगण इन सबका काथ करके घृत पकावे इस घृतका सेवन करनेसे क्षतज और क्षयज खांसी नष्ट होजाती है ॥ ५० ॥ तथा शतावरी, नागबला (गुलशकरी), बला (खरेंटी) (और 'आदि' शब्दसे अतिबला, महाबला भी लेनी इनसे सिद्धकिया हुआ घृत खांसीके रोगवालोंके लिये हितकारक है ॥ ५१ ॥

यूनानी हकीम खांसीको "सुआल" या "सुरफा" कहते हैं ।

और डाक्टरीमें खांसीको "काफ" (Calf) और सूखी खांसीको "होपिंग-काफ़" कहते हैं ।

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कायचिकित्सायां द्विपंचाशत्तमोऽध्यायः ॥५२॥

त्रिपंचाशत्तमोऽध्यायः ५३.

अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम स्वरभेद (अवाज बैठजाने) के प्रतिषेधके अध्यायका व्याख्यान करते हैं ॥

स्वरभेदके हेतु और संख्या ।

अत्युच्चभाषणविषाध्ययनाभिघातशीतादिभिः प्रकुपिताः पवनादयस्तु ॥ ते शब्दवाहिधमनीषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ १ ॥

अत्यन्त ऊँचे स्वरसे बोलने (पुकारने अथवा गाने) से, विषसे, चिल्लाकर पढनेसे, चोट आदिसे और शीतल पदार्थोंके सेवन करनेसे वातादिक दोष कुपित होकर शब्दवाहिनी धमनियोंमें स्थित होकर स्वर (अवाज) को बिगाड़ देते हैं इसे स्वरभेद या स्वरभंग कहते हैं यह छः प्रकारका होता है (जैसे वायुका, पित्तका, कफका, सन्निपातका, क्षयका और मेदोदोषका) ॥ १ ॥

वातादि स्वरभेदके लक्षण ।

वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं शनैर्वदति गद्गदवत्स्वरं च ॥ पित्तेन पीतवदनाक्षिपुरीषमूत्रो ब्रूयाद्गलेन च विदाहसमन्वितेन ॥ ॥ २ ॥ कृच्छ्रात्कफेन सततं कफरुद्धकंठो मंदं शनैर्वदति वापि दिवा विशेषात् ॥ सर्वात्मके भवति सर्वविकारसंपदव्यक्तता च वचसस्तमसाध्यमाहुः ॥ ३ ॥ धूप्येत वाक्क्षयकृते क्षयमाप्नुयाच्च वागेष वापि हतवाक्परिवर्जनीयः ॥ अंतर्गतस्वरमलक्ष्यपदं चिरेण मेदोन्वयाद्वदति दिग्धगलौष्ठतालुः ॥ ४ ॥

वायुके स्वरभेदमें नेत्र, मुँह, मूत्र और मल इन सबमें कालापन मालूम देताहै, टूटे शब्द धीरे धीरे बोले, गधेकासा स्वर हो और पित्तके स्वरभेदमें मुँह, नेत्र, मल, मूत्र ये सब पीले पडजावें तथा बोलते समय गलेमें जलनसा होवे ॥ २ ॥

कफके स्वरभंगमें सदा कंठ कफसे भरासा रहे और मंद मंद स्वरसे धीरे धीरे बोले, दिनमें कुछ ज्यादे होजावे और सब दोषोंके सान्निपातिक स्वरभेदमें सबके लक्षण और विकार होते हैं और जो वचनमें अव्यक्तता हो (बिलकुल समझा नहीं जावे) तो वह असाध्य होता है ॥ ३ ॥ क्षयज स्वरभेदमें वाणी बोलते समय धुवांसा भरजाताहै और वाणी क्षीण होती चलीजाती है और इसमें भी यदि बिलकुल आवाज नहीं निकले तो असाध्य होता है और मेदके स्वरभेदमें भीतर ही भीतर शब्द बेमालूमसा होता है और देरसे शब्द निकलता है और होंठ, गला और तालु ये लिपेसे (चिकने) रहते हैं ॥ ४ ॥

स्वरभेदकी असाध्यता ।

क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः ॥
मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति ॥५॥

क्षीण मनुष्यके, वृद्धके, दुबले आदमीके जो स्वरभंग होजावे, जो बहुत दिनका पुराना होजावे तथा जो जन्महीसे स्वर बिगडा हुआ होवे, मेदवाले मनुष्यके तथा जो सन्निपातसे उपजा हुआ हो इतने प्रकारके स्वरभेद सिद्ध नहीं होते ॥ ५ ॥

स्वरभेदकी चिकित्साका आरंभ ।

स्निग्धान्स्वरातुरनरानपकृष्टदोषान्संयोजयेद्वमनरेचनवस्तिभिश्च ॥
नस्यावपीडमुखधावनधूमलेहैः संपादयेच्च विविधैः कवलग्रहैश्च ॥६॥
यः श्वासकासविधिरादित एव चोक्तस्तं चाप्यशेषमवतारयितुं यतेत॥
वैशेषिकं च विधिमूर्द्धमतो वदामि तद्वैस्वरातुरहितं निखिलं निबोध७

स्वरभेदके रोगियोंको स्नेहन कराके वमन, विरेचन और वस्तिकर्म विधिपूर्वक करके दोषोंको दूर करे और फिर नस्य, अवपीडन, मुखधावन (मुखको भीतरसे धोना अर्थात् कुल्ले करना),धूमपान और अवलेह तथा अनेक प्रकारके कवलग्रहोंका उपयोग करना श्रेष्ठ है ॥ ६ ॥ तथा जो विधि श्वास और खाँसीके विषयमें कह आये हैं उन सबके करनेका यहांपर यत्न करे (अर्थात् श्वासकासोक्त सब विधि यहां भी कर सकते हैं) और इससे अगाडी अब हम विशेष करके स्वरभेदके रोगियोंको हितकारक विधि कहते हैं उसे पूर्णतया सुनो ॥ ७ ॥

वायुके स्वरभंगका यत्न ।

स्वरोपघातेनिलजे भुक्तोपरि घृतं पिबेत् ॥ कासमर्दकवार्ताकुमार्क-

वस्वरसैर्युतम् ॥ ८ ॥ पीतं घृतं हन्त्यनिलं सिद्धमार्तगले रसे ॥ यवक्षाराजमोदाभ्यां चित्रकामलकेषु वा ॥९॥ देवदार्वग्निकाभ्यां वा सिद्धमाज्यं समाक्षिकम् ॥ सुखोदकानुपानो वा ससर्पिष्को गुडौदनः ॥ १० ॥

वायुके स्वरभंगमें भोजनके ऊपरसे कसोंधी, बडी कटेली, भंगरा इनके रससे युक्त (रससे सिद्ध किये) घृतको पीवे ॥ ८ ॥ अथवा आर्तगल (नीले फूलके कुरंट) के रससे सिद्ध किया घृत पीवे अथवा जवाखार, अजमोदा तथा चित्रक और आंवले इनसे सिद्ध किया घृत पीवे ॥९॥ अथवा देवदारु चित्रक इनसे सिद्ध किया बकरीका घृत शहद मिलाकर पान करे और गुडके मीठे चावल घृतयुक्त बनाकर उन्हे भोजन करे ऊपरसे निवाया पानी पीलिया करे ॥ १० ॥

क्षीरानुपानं पित्ते तु पिबेत्सर्पिरतंद्रितः ॥ अश्नीयाच्च ससर्पिष्कं यष्टीमधुकपायसम् ॥ ११ ॥ लिह्यान्मधुरकाणां वा चूर्णं मधुघृताप्लुतम् ॥ शतावरीचूर्णयोगं बलाचूर्णमथापि वा ॥ १२ ॥ पिबेत्कटूनि मूत्रेण कफजे स्वरसंक्षये ॥ लिह्याद्वा मधुतैलाभ्यां भुक्त्वा खादेत्कटूनि च ॥ १३ ॥

पित्तके स्वरभेदमें घृत पीकर ऊपरसे दूध पियाकरे अथवा सावधान होकर मुलेठीकी खीर बनाके घृत मिलाकर खावे ॥ ११ ॥ अथवा मधुर द्रव्यों (काकोल्यादि) का चूर्ण शहद और घृत मिलाके चाटे अथवा शतावरीके चूर्णको या खरेंटीके चूर्णको शहद और घृतके संग चाटे ॥ १२ ॥ कफके स्वरभंगमें कटुक द्रव्यों (त्रिकटु आदि) को गोमूत्रके संग पीवे अथवा शहद और तैल मिलाके इसके संग त्रिकटुको चाटे तथा भोजन करके ऊपरसे चरपरे पदार्थ (मिरच, पीपल आदि) खाया करे ॥ १३ ॥

स्वरोपघाते मेदोजे कफवद्विधिरिष्यते ॥ सर्वजे चापि क्षयजे प्रत्याख्यायाचरेत्क्रियाम् ॥ १४ ॥ शर्करामधुमिश्राणि शृतानि मधुरैः सह ॥ पिबेत्पयांसि यस्यो च्चैर्वदतोऽभिहतः स्वरः ॥ १५ ॥

इति सुश्रुतसं०उत्तरतंत्रे कायचिकित्सायां त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

(श्लो० ९) आर्तगलः नीलपुष्पकुरंटः । डल्हनस्तु आर्तगलः ककुभ इत्याह ।

मेदके स्वरभेदमें कफस्वरभेदकेसी विधि करना श्रेष्ठ है और सन्निपातके स्वरभेदमें तथा क्षयके स्वरभेदमें (आराम हो या न भी हो ऐसा) कहकर चिकित्सा करे ॥ १४ ॥ और जिसके ऊँचे स्वरसे बोलने, गाने, पढने आदिसे स्वरभंग होगया हो उसे मधुरद्रव्योंसे औटाया हुआ दूध मिश्री और शहद मिलाकर पीना चाहिये ॥ १५ ॥

यूनानी हकीम स्वरभंगको "फसादुस्सौत" कहतेहैं डाक्टरीमें इसे "होर्सन्यस" (Hoorsness) कहतेहैं ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कायचिकित्सायां त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

चतुःपंचाशत्तमोऽध्यायः ५४.

अथातः कृमिरोगमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम कृमिरोगके अध्यायका व्याख्यान करतेहैं ।

कृमिरोगके लक्षण ।

अजीर्णाध्यशनासात्म्यैर्विरुद्धमलिनाशनैः॥ अव्यायामदिवास्वप्नगुर्वतिस्निग्धशीतलैः ॥१॥ माषपिष्टान्नविदलबिसशालूकसेरुकैः ॥ पर्णशाकसुराशुक्तदधिक्षीरगुडेक्षुभिः ॥ २ ॥ पलालानूपपिशितपिण्याकपृथुकादिभिः ॥ स्वाद्वम्लद्रवपानैश्च श्लेष्मा पित्तं च कुप्यति ॥ ३ ॥ कृमीन्बहुविधाकारान्करोति विविधाश्रयान् ॥ आमपक्वाशयस्तेषां प्रसवः प्रायशः स्मृतः ॥ ४ ॥

अजीर्णके रहनेसे, भोजनपर भोजन करनेसे, बेमाफकतके भोजनसे, विरुद्ध और मलिन भोजनसे, परिश्रम न करने (पडे या बैठे रहने) से, दिनके सोनेसे, गरिष्ठ अति चिकना, ठंढा खानेसे ॥ १ ॥ उडद पिट्ठीके पदार्थ, विदल (जिनके दो भाग हों ऐसे अन्न) विशेष खानेसे, बिस (कमलकी जड), कमलकंद और कसेरु इत्यादि और पत्तोंके शाक, मदिरा, सिरका, दही, दूध, गुड, ईखके पदार्थ॥ ॥ २ ॥ तिलका चूरा (या मांस), जलकिनारेके जीवोंका मांस, खल और पृथुक (दोवार उबाला या पकाया हुआ अन्न) इनके विशेष खानेसे, मिठाई, खटाई, पतले पन्ने अधिक खाने पीनेसे, कफ और पित्त कुपित हो जातेहैं ॥ ३ ॥ और अनेक प्रकारके कृमियोंको जिनके अनेक स्थान हैं पैदा करतेहैं परन्तु विशेष करके इनकी उत्पत्तिका स्थान आमाशय और पक्वाशयही होताहै (अर्थात् कृमि उक्त कारणोंसे विशेष करके आमाशय और पक्वाशयमें ही पैदा होतेहैं) ॥ ४ ॥

(श्लो० ३) पृथुकादिभिरिति–पृथुकम्–"द्विस्विन्नमन्नं पृथुकम्" (इति ज० स्तो०)

कृमियोंके भेद।

विंशतेः कृमिजातीनां त्रिविधः संभवः स्मृतः ॥
पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥

कृमि बीस प्रकारके होतेहैं और इनकी उत्पत्ति तीन भांतिसे होतीहै पुरीषसे या कफसे या रुधिरसे इनके लक्षण अगाडी कहतेहैं ॥ ५ ॥

पुरीषज कृमि।

अथवा वियवाः किप्याश्चिप्या गंडूपदास्तथा ॥ चुरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः ॥ ६ ॥ श्वेताः सूक्ष्मास्तुदंत्येते गुदं प्रति सरंति च ॥ तेषामेवापरे पुच्छैः पृथवश्च भवंति हि ॥ ७ ॥ शूलाग्निमांद्यपांडुत्वविष्टंभबलसंक्षयाः ॥ प्रसेकारुचिहृद्रोगविड्भेदास्तु पुरीषजैः ॥ ८ ॥ रक्ता गंडूपदा दीर्घा गुदकंडूनिपातिनः ॥ शूलाटोपं शकृद्भेदपक्तिनाशकराश्च ते ॥ ९ ॥

अथव, वियव, किप्य, चिप्य, गंडूपद और चुरव तथा द्विमुख ये सात प्रकारके कृमि पुरीष (विष्ठा) में (या विष्ठासे) पैदा होतेहैं ॥ ६ ॥ ये पुरीषज कृमि सुपेद पतले होतेहैं और गुदामें चुभनसी पैदा करतेहैं और गुदाकी तरफ गमन भी करतेहैं इनमेंसे दूसरी भांतिके कृमि पूँछवाले और अन्य मोटे (कद्दूदानेसे) भी होतेहैं ॥ ७ ॥ ये शूल, मन्दाग्नि, पांडुरोग, विष्टंभ (कब्जियत) और बलका नाश करतेहैं तथा मुँहसे पानी आना, अरुचि, हृद्रोग और विड्भेद ये उपद्रव भी इन पुरीषज कृमियोंहीसे होतेहैं ॥ ८ ॥ और इनहीमें जब लंबे लंबे लाल गिंडोवे होते हैं तब गुदामें खाज, शूल, पेट अफराना, मल फटना और पाचनशक्ति नष्ट होना इत्यादि उपद्रव करतेहैं ॥ ९ ॥

(वक्तव्य) पुरीषज कृमि कहनेसे आहारनलका (आमाशय, पक्वाशय, मेदा और आँतडे तथा मलाशय) मात्रके कृमि जानने ॥

कफज कृमि।

दर्भपुष्पा महापुष्पाः प्रलूनाश्चिपिटास्तथा ॥ पिपीलिका दारुणाश्च कफकोपसमुद्भवाः ॥ १० ॥ रोमशा रोममूर्द्धानः सपुच्छाः श्यावमंडलाः ॥ मूढधान्यांकुराकाराः शुक्लास्ते तनवस्तथा ॥ ११ ॥

(श्लो० ५) रक्तजत्वेन स्वेदजा अपि ग्राह्याः ।

मज्जादा नेत्रलेढारस्तालुश्रोत्रभुजस्तथा ॥ शिरोहृद्रोगवमथुप्रतिश्यायकराश्च ते ॥ १२ ॥

दर्भपुष्प, महापुष्प, प्रलून, चिपिट, पिपीलिका और दारुण ये छः प्रकारके कफकोपसे उत्पन्न होनेवाले कृमि होते हैं ॥ १० ॥ ये रोमवाले होते हैं, इनके शिरपर भी रोम होते हैं, पूँछभी होती है, काले मंडलवाले और बोयेहुए धान्यके अंकुर जैसे सुपेद और पतले होते हैं ॥ ११ ॥ ये कृमि मज्जाको खाते हैं, नेत्रोंकोभी चाटजाते हैं, तालु और कानोंको भी खाते हैं, शिरके रोम तथा हृदयके रोग, वमन, जुखाम इन व्याधियोंको करते हैं ॥ १२ ॥

रक्तज कृमि।

केशरोमनखादाश्च दंतादाः किक्किशास्तथा ॥ कुष्ठजाश्च परीसर्पी ज्ञेयाः शोणितसंभवाः ॥ १३ ॥ ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा ॥ रक्ताधिष्ठानजान्प्रायो विकारान्जनयंति ते ॥ १४ ॥

केशोंमें होनेवाले कृमि, रोमोंमें होनेवाले, नखूनोंमें होनेवाले और इन्हेंही खाने, वाले तथा दांतोंके कीडे और किक्किश, कुष्ठज और परिसर्पि या सात प्रकारके कृमि रक्तसे (रक्तके मैल, पसीने आदिसे) पैदा होनेवाले हैं ॥ १३ ॥ ये कुछ सुरखी लिये कालेसे प्रायः होते हैं, चिकने और मोटे भी इनमें होते हैं ये प्रायः रक्तस्थानमें होनेवाले विकार (कुष्ठ, फुन्सी, खाज आदि) उत्पन्न करते हैं ॥ १४ ॥

(वक्तव्य) केशादकृमि बालोंकी जड़में होते हैं जिनसे बाल गिरजाते हैं बाहर पसीने, मैल आदिसे होनेवाले जूँ और लीख आदि इनसे पृथक् होते हैं ॥

माषपिष्टान्नलवणगुडशाकैः पुरीषजाः ॥ मांसमाषगुडक्षीरदधिशुक्तैः कफोद्भवाः ॥ विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवंति हि ॥ १५ ॥ ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ॥ भक्तद्वेषोऽतिसारश्च संजातकृमिलक्षणम् ॥ १६ ॥ दृश्यास्त्रयोदशाद्यास्तु कृमीणां परिकीर्तिताः ॥ केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्जयेत् ॥ १७ ॥

उडद पिट्ठीके अन्न, लवण, गुड और शाक इनसे (इनके विशेष सेवनसे) पुरीषके कृमि होते हैं और मांस, उड़द, गुड़, दूध, दही, सिरका इनसे कफके कृमि होते हैं तथा विरुद्ध भोजन, अजीर्ण और शाकादिसे रुधिरके कृमि उत्पन्न

होते हैं ॥ १५ ॥ यदि ज्वर होआवे, वर्ण विगड जावे, शूल हो, हृदय दूखे, शिथिलता रहे, भ्रम हो, अरुचि और अतिसार ये भी हों तो जानो कि इसके कृमिरोग उत्पन्न हुआ ॥ १६ ॥ इन बीस प्रकारके कृमियोंमेंसे आदिके १३ प्रकारके कृमि तो दिखलाई देते हैं और केशादको आदि लेके तीन दिखलाई नहीं दे सकते और आरम्भमें कहेहुए दो असाध्य होते हैं ॥ १७ ॥

एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरम् ॥ सुरसादिविपक्वेन सर्पिषा वान्तमादितः ॥ १८ ॥ विरेचयेत्तीक्ष्णतरैर्यो गैरास्थापयेच्च तम् ॥ यवकोलकुलत्थानां सुरसादेर्गणस्य च ॥ १९ ॥ विडंगस्नेहयुक्तेन क्वाथेन लवणेन च ॥ २० ॥

इनमेंसे कोईसे कृमि मालूम पडें तभी उनके नष्ट करनेकी इच्छावाला वैद्य रोगीको स्नेहन करावे और फिर सुरसादिगणसे पकायेहुए घृतसे वमन करावे ॥ १८ ॥ और फिर तीक्ष्ण योगोंसे विरेचन करावे फिर जव, बेर, कुलथी और सुरसादिगणके क्वाथ और वायविडंगसे सिद्ध किये स्नेह और लवण इनसे आस्थापनवस्ति करे ॥ १९ ॥ २० ॥

प्रत्यागते निरूहे तु नरं स्नातं सुखांबुना ॥ युंज्यात्कृमिघ्नैरशनैस्ततः शीघ्रं भिषग्वरः ॥ २१ ॥ स्नेहेनोक्तेन चैनं तु योजयेत्स्नेहवस्तिना ॥ ततः शिरीषकिणिहीरसं क्षौद्रयुतं पिबेत् ॥ २२ ॥ केबूकस्वरसं वापि पूर्ववत्तीक्ष्णभोजनः ॥ पलाशबीजस्वरसं कल्कं वा तंडुलांबुना ॥ २३ ॥

जब निरूहण वस्ति उलटी निकल चुके (साफ होजावे) तब रोगीको निवाये पानीसे स्नान करावे और फिर कृमिनाशक भोजन शीघ्रही वैद्य खिलावे (अर्थात कृमिनाशक द्रव्योंके संस्कारसे बना भोजन देवे) ॥ २१ ॥ और फिर उक्त स्नेह (विडंगादिसे सिद्ध किये हुए) से अनुवासनवस्ति भी करे फिर शिरस और किणिही (कटभी) इनके रसमें शहद मिलाकर कुछ दिन पिलावे ॥ २२ ॥ अथवा केबूक वृक्षके स्वरसको शहद मिलाके पिलावे और पूर्वोक्त रीतिसे तीक्ष्ण भोजन करे तथा ढाकके बीजों (पलाशपापडे) के स्वरसको या कल्कको चावलोंके पानीके संग पिलावे ॥ २३ ॥

पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ॥ पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजम् ॥ २४ ॥ लिह्यादश्वशकृच्चूर्णं विडंगं वा समा-

क्षिकम् ॥ पत्रैर्मूषिकपर्ण्या वा सुपिष्टैः पिष्टमिश्रितैः ॥ २५ ॥ खादेत्पूपालिकान्पक्वान्धान्याम्लं च पिबेदनु ॥ सुरसादिगणे तैलं पक्वं वा पानमिष्यते ॥ २६ ॥ विडंगचूर्णपिष्टाभ्यां तस्मिन्भक्ष्यन्तु कारयेत् ॥ तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ॥ २७ ॥

नींबके पत्तोंका रस शहद मिलाके पीवे अथवा सिरयाईका रस या सुरसादिगणका क्वाथ (शहद डालके) पीवे ॥ २४ ॥ अथवा घोडेकी लीदका चूर्ण या वायविडंगका चूर्ण शहदके संग चाटे अथवा मूसापर्णीके पत्तोंको पीस ले और उसमें जौकी पिट्ठी मिलाकर पकोडी पूरी आदि बनावे उन्हें खाकर ऊपरसे धान्याम्ल (कांजी) पीवे अथवा सुरसादिगणसे पकायाहुआ तैल पान करे ॥ ॥ २५ ॥ २६ ॥ अथवा वायविडंगके चूर्णको पिट्ठीमें (या आटेमें) मिलाकर उसके पाक (खानेकी वस्तु) बनावे अथवा बिडंगके क्वाथमें तिलोंको खूब भिगोकर उनका तैल निकलवाकर उपयोग करे ॥ २७ ॥

इत्थविधः शकृच्चूर्णं सप्तकृत्वः सुभावितम् ॥ विडंगानां कषायेण त्रैफलेन तथैव च ॥ २८ ॥ क्षौद्रेण लीढ्वानु पिबेद्रसमामलकोद्भवम् ॥ अक्षाभयारसं चापि विधिरेषोऽयसामपि ॥ २९ ॥ पूतिकस्वरसं वापि पिबेद्वा मधुना सह ॥ पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥ ३० ॥ सप्तरात्रं पिबेद्घृष्टं त्रपु वा दधिमस्तुना ॥ पुरीषजान्कफोत्थांश्च हन्यादेवं कृमीन्भिषक् ॥ ३१ ॥

सेहकी मेंगनी (विष्ठा) के चूर्णको सातवार विडंगके क्वाथकी भावना देवे और फिर सात भावना त्रिफलाके क्वाथकी देवे ॥ २८ ॥ फिर इसे शहदमें मिलाकर चाटे और ऊपरसे आंवलोंका रस पीवे तथा हरडे और बहेडेका रस भी पीवे (अर्थात् त्रिफलाका रस ऊपरसे पीवे) यही विधि सब लोहों (धातुओंके चूर्ण) खानेकी है (कि पहले लोहादिके चूर्णमें विडंगके क्वाथकी और त्रिफलाके क्वाथकी भावना देकर शहदसे चाटे ऊपरसे त्रिफलाका रस पीवे) ॥ २९ ॥ अथवा करंजका रस शहदयुक्त पीवे अथवा बकरीके मूत्रसे पिप्पलीमूल पीवे ॥ ॥ ३० ॥ अथवा राँगको घिसकर सात दिन तक दहीके पानीसे पीवे इन विधियोंसे वैद्य पुरीषज और कफज कृमियोंको नष्ट करे ॥ ३१ ॥

(श्लो० २५) पिष्टमिश्रितौरिति—यवपिष्टमिश्रितैः । पिष्टकथनेन यवपिष्टं ज्ञेयम् ।

शिरोहृद्घ्राणवक्त्राक्षिसंसृतांश्च पृथग्विधान् ॥ विशेषेणाञ्जनैर्नस्यै-रवपीडैश्च साधयेत् ॥ ३२ ॥ शकृद्रसं तुरंगस्य सुशुष्कं भावये-दतिं ॥ निःक्वाथेन विडंगानां चूर्णं प्रधमनं तु तत् ॥ ३३ ॥ अय-श्चूर्णान्यनेनैव विधिना योजयेद्भिषक् ॥ सकांस्यनीलं तैलं च नस्यं स्यात्सुरसादिके ॥ ३४ ॥

शिर, हृदय, नासिका, मुख और नेत्रोंमें होजानेवाले कई प्रकारके कृमियोंको विशेषकर अंजनों, नस्यों और अवपीडों आदिसे साधन करे ॥ ३२ ॥ घोडेकी लीदका रस सुखाकर उसमें विडंगके क्वाथकी भावना देवे और फिर सुखाकर पीसकर उसका प्रधमन नस्य देवे ॥ ३३ ॥ और इसी विधिसे लोहेके चूर्णकी भी उपयोजना करे अथवा वैद्य सुरसादिगणसे सिद्ध किये तैलमें कांसीकी स्याही मिलाकर नस्य देवे ॥ ३४ ॥

इंद्रलुप्तविधिश्चापि विधेयो रोमभोजिषु ॥ दंतादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥ ३५ ॥ रक्तजानां समुद्दिष्टं कुर्यात्कुष्ठचि-कित्सिते ॥ सुरसादिं तु सर्वेषु सर्वथैवोपयोजयेत् ॥ ३६ ॥

रोमपंक्तियोंमें होनेवाले कृमियोंके लिये इंद्रलुप्तकी विधि करना श्रेष्ठ है और दांतोंके खानेवालों (दांतोंके कृमियों) के लिये मुखरोगमें कहीहुई कृमिदंतकी विधि करना उचित है ॥ ३५ ॥ और रक्तज कृमियोंके लिये कुष्ठमें कहे हुए विधान करे परन्तु सुरसादिगणका उपयोग तो सब प्रकारके कृमियोंमें सब तरहसे जहां जैसा उचित हो सर्वत्र ही करना उचित होताहै ॥ ३६ ॥

कृमिरोगमें पथ्य ।

प्रव्यक्ततिक्तकटुकं भोजनं च हितं भवेत् ॥
कुलत्थक्वाथसंसृष्टं क्षीरपानं च पूजितम् ॥ ३७ ॥

जिनमें चरपरापन और कडुवापन प्रगट हो ऐसे भोजन करने प्रायः हितकारक होतेहैं और कुलथीके क्वाथसे संस्कार किया हुआ दूध पीना ठीक है ॥ ३७ ॥

क्षीराणि मांसानि घृतानि चैव दधीनि शाकानि च पर्णवंति ॥
समांसतोस्लान्मधुरान्हिमांश्च कृमीञ्जिघांसुः परिवर्जयेत्तु ॥ ३८ ॥

इति सुश्रुतसं०उत्तरतंत्रे कायचिकित्सायां चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥

सब प्रकारके दूध, घृत और दही तथा पत्तोंके शाक, खटाई मिठाई और ठंढे पदार्थ कृमिरोग नष्ट करनेकी वांछावाले रोगियोंको सामान्यतासे ही नहीं खाने चाहिये किंतु त्याग देने चाहिये ॥ ३८ ॥

(वक्तव्य) शार्ङ्गधराचार्य बाईस प्रकारके कृमि लिखते हैं जिनमें बाहर शरीरपर बालोंमें होनेवाले जूँ, लीख जुदे लिखते हैं और स्नायुक (न्हारवे) रोगको भी कफरक्तज कृमि लिखतेहैं ॥

यूनानीवाले पेटके केचुवोंको "दीदानां" कहतेहैं और कद्दूदानोंको "हुब्बुल्किरा" कहतेहैं और न्हारूको "अरकेमुदनी" या "रिशता" कहते हैं सब भांतिके कृमियोंको साधारणतासे इनके यहां भी किरमही कहतेहैं ॥

और डाक्टरीमें ऊपर बालोंमें होनेवाले जूँ, लीख आदि कृमियोंको "अपीजुवा" कहते हैं और पेटमें होनेवालोंको "ऐंटजुवाँ" तथा "वर्मस्" कहतेहैं ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे कायचिकित्सायां चतुःपंचाशत्तमोऽध्यायः ॥५४॥

पंचपंचाशत्तमोऽध्यायः ५५.

अथात उदावर्तप्रतिषेधमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम उदावर्तके प्रतिषेधके अध्यायका व्याख्यान करतेहैं ।

उदावर्तका हेतु ।

अधश्चोर्द्धं च भावानां प्रवृत्तानां स्वभावतः ॥ न वेगान्धारयेत्प्राज्ञो वातादीनां जिजीविषुः ॥ १ ॥ वातविण्मूत्रजृंभाश्रुक्षवोद्गारवमीन्द्रियैः ॥ व्याहन्यमानैरुदितैरुदावर्तो निरुच्यते ॥ २ ॥ क्षुत्तृष्णाश्वासनिद्राणामुदावर्तो विधारणात् ॥ तस्याभिधास्ये व्यासेन लक्षणं च चिकित्सितम् ॥ ३ ॥

जीवनकी वांछा रखनेवाले बुद्धिमान्को चाहिये कि नीचेको और ऊपरको स्वभावसे प्रवृत्त होनेवाले वातादिक वेगोंको कभी नहीं रोंके ॥ १ ॥ वे वेग ये हैं कि अधोवायु, मल (दस्त), मूत्र, जँभाई, आंसू, क्षव (छींक)(या हिक्का), डकार, वमन और वीर्य इनके उद्गत होनेपर रोंक लेनेसे उदावर्त रोग होजाताहै ॥

(श्लो० २) उदावर्त इति—ऊर्ध्वं वातविण्मूत्रादीनाम् आवर्तो भ्रमणं यस्मिन् स उदावर्तः। वातोत्र अधःप्राप्तोऽपानवायुः । क्षवः क्षवथुः । डल्हनस्तु हिक्का इत्याह । इंद्रियशब्देन शुक्रं बोद्धव्यम् ।

(श्लो० ३) ननु अधोवेगावरोधादपानप्रकोपे उदावर्तसंभवो युक्तः । परंतु अश्रुजृंभादिकानामूर्ध्ववेगानामवरोधे कथमुदावर्तस्य संभवः । ऊर्ध्ववेगावरोधेपि वायोः प्रकोपोपहतेनापानेन उदावर्तस्य संभवः ।

॥ २ ॥ तथा क्षुधा, तृषा, श्वास, निद्रा इनके (विशेष या अयोग्य) रोंकनेसे भी उदावर्त होजाताहै अब अगाड़ी विस्तारसे इसके जुदे २ लक्षण और चिकित्सा वर्णन करतेहैं ॥ ३ ॥

उदावर्तकी संख्या।

त्रयोदशविधश्चासौ भिन्न एतैस्तु कारणैः ॥
अपथ्यभोजनाच्चापि वक्ष्यते च यथाऽपरः ॥ ४ ॥

पूर्वोक्त वातविण्मूत्रादिके कारणोंसे यह उदावर्त रोग तेरह प्रकारका होताहै तथा एक भांतिका उदावर्त अपथ्य भोजनसे भी होजाताहै ॥ ४ ॥

अपानवायुके रोंकनेका उदावर्त।

आध्मानशूलौ हृदयोपरोधं शिरोरुजं श्वासमतीव हिक्काम् ॥
कासप्रतिश्यायगलग्रहांश्च बलासपित्तप्रसरं च घोरम् ॥
कुर्यादपानोभिहतः स्वमार्गे हन्यात्पुरीषं मुखतः क्षिपेद्वा ॥ ५ ॥

अधोवायुके रोंकनेसे इतने उपद्रव होते हैं—पेट अफरना, शूल, हृदयका रुक-जाना, शिरमें दर्द, श्वास, अत्यन्त हुचकी, खांसी, जुखाम, गल रुकना, कफ और पित्तका उद्रेक घोर होना तथा अपने मार्गसे रुकाहुआ अपानवायु विष्ठाको रोक देता है अथवा मुखमार्गसे विष्ठाका वमन होता है ॥ ५ ॥

मलके रोंकनेका उदावर्त।

आटोपशूलौ परिकर्तनं च संगः पुरीषस्य तथोर्द्ध्ववातः ॥
पुरीषमास्यादपि वा निरेति पुरीषवेगेऽभिहते नरस्य ॥ ६ ॥

पेट अफरना, शूल होना, कतरनेकेसी पीडा होना, मलकी किटीसी बँधकर बंद होजाना तथा वायुका ऊर्द्धगमन होना, मुखसे विष्ठाका वमन होना दस्तके वेग रोकेजानेसे मनुष्यके इतने उपद्रववाला उदावर्त होता है ॥ ६ ॥

मूत्रके रोंकनेका उदावर्त।

मूत्रस्य वेगेऽभिहते नरस्तु कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पम् ॥
मेढ्रे गुदे वंक्षणमुष्कयोश्च नाभिप्रदेशेष्वथ वापि मूर्ध्नि ॥ ७ ॥
आनद्धवस्तिश्च भवंति तीव्राः शूलाश्च शूलैरिव भिन्नमूर्तेः ॥ ८ ॥

मूत्रका वेग रोंकनेसे मनुष्यके कष्टसे थोडा थोडा मूत्र आता है तथा लिंग, गुदा, वंक्षण (नलों), अंडकोश, नाभि और शिरमें तीव्र शूल चलने लगते हैं और वस्ति-स्थान फलजाता है और ऐसी पीडा होती है जैसे कोई शूलोंसे धवलता हो ॥ ७ ॥ ८ ॥

जृंभाके रोंकनेका उदावर्त ।

मन्यागलस्तंभशिरोविकारा जृंभोपघातात्पवनात्मकाः स्युः ॥
श्रोत्राननघ्राणविलोचनोत्थाँ भवंति तीव्रांश्च तथा विकाराः ॥ ९ ॥

जृंभा (जंभाई) के रोकनेसे मन्यास्थान और गलमें स्तंभ, शिरमें विकार और वातके रोग तथा कानके, मुँहके, नाकके और नेत्रोंके तीव्र रोग होजाते हैं ॥ ९ ॥

अश्रुनिरोधज और क्षवथुनिरोधज उदावर्त ।

आनंदजं शोकसमुद्भवं वा नेत्रोदकं प्राप्तममुंचतो हि ॥
शिरोगुरुत्वं नयनामयाश्च भवंति तीव्राः सह पीनसेन ॥ १० ॥
भवंति गाढं क्षवथोर्विघातांच्छिरोक्षिनासाश्रवणेषु रोगाः ॥
कंठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथवा प्रवृत्तिः ॥ ११ ॥

आनन्दसे अथवा शोकसे आये हुए नेत्रोंके जल (आंसुओं) को जो नहीं निकलने देवे (रोंक ले) उसके शिरमें भारीपन और तीव्र नेत्रोंके रोग और पीनसरोग होजाते हैं ॥ १० ॥ क्षवथु (छींक) के रोंकनेसे शिरमें, नेत्रोंमें, नासिकामें और कानोंमें भारी रोग होजाते हैं, कंठ और मुँह भरेसे होजाते हैं पीडा भी होती है, वायुका शब्द या प्रवृत्ति ये भी होते हैं ॥ ११ ॥

उद्गार-छर्दि-शुक्रज-उदावर्तोंके लक्षण ।

उद्गारवेगे विहते भवंति जंतोर्विकाराः पवनप्रसूताः ॥
छर्देर्विघातेन भवेच्च कुष्ठं येनैव दोषेण विदग्धमन्नम् ॥ १२ ॥
मूत्राशये वा गुदमुष्कयोश्च शोफो रुजा मूत्रविनिग्रहश्च ॥
शुक्राश्मरी तत्स्रवणं भवेद्वा ते ते विकारा विहते तु शुक्रे ॥१३॥

डकारके रोकनेसे मनुष्यके वायुके विकार होते हैं (और कई "कण्ठास्यपूर्णत्वं" इस उक्त श्लोकार्द्धको इसीके संग लगाकर यह अर्थ करते हैं कि कंठ और मुखकी पूर्णता, अतिपीडा, वायुका शब्द और अप्रवृत्ति ये डकार रोंकनेके उदावर्तमें होते हैं), वमनके रोंकनेमें कुष्ठ होजाता है और इससे अन्न विदग्ध होजाता है ॥ १२ ॥ और स्खलित होतेहुए वीर्यके रोकनेसे मूत्राशय (मसाने) में, गुदामें, वृषणोंमें

(श्लो० ११) अस्योत्तरार्धं "कंठास्यपूर्णत्वम्" इत्यादिकं केचित् अग्रिमे उद्गारोदावर्ते कथयंति एवमेव भावमिश्रेणापि पठितम् । परंतु डल्हनमिश्रेण क्षवथुविनिग्रहोदावर्तेपि व्याख्यातम् । डल्हनमिश्रमते क्षवथुः हिक्का इत्यपि विचित्रम् ।

शोथ और पीडा होती है, मूत्र रुकता है, शुक्रकी पथरी होजाती है और शुक्र झिरने लगजाता है, तत्संबंधी अनेक विकार (कृच्छ्रादि) होजाते हैं ॥ १३ ॥

(वक्तव्य) हमने पहले कंठास्यपूर्णत्वादि लक्षण क्षवथुनिरोधज उदावर्तमें डल्हन मिश्रकी व्याख्याके अनुसार लिखाहै परन्तु वास्तवमें यह अग्रिम उद्गारावरोधके साथ ही उचित है (देखो टिप्पणी) ॥

क्षुधा-तृषा-श्वास-और निद्रा रोंकनेके उदावर्तोंके लक्षण ।

तंद्रांगमर्दावरुचिः श्रमश्च क्षुधोभिघातात्कृशता च दृष्टेः ॥
कंठास्यशोषः श्रवणावरोधस्तृष्णाभिघातात्हृदये व्यथा च ॥ १४ ॥
श्रांतस्य निःश्वासविनिग्रहेण हृद्रोगमोहावथवापि गुल्मः ॥
जृंभांगमर्दोक्षिशिरोक्षिजाड्यं निद्राभिघातादथवापि तंद्रा ॥ १५ ॥

क्षुधा रोकनेसे तन्द्रा, अंगोंका टूटना (अंगडाई), अरुचि और श्रम होतेहैं तथा दृष्टिमें दुर्बलता ये उपद्रव होतेहैं और तृषाके रोकनेसे कंठ और मुखका सूखना, कानोंका रुक जाना और हृदयमें व्यथा ये उपद्रव होतेहैं ॥ १४ ॥ परिश्रम करके थके मनुष्यके श्वास रोकनेसे हृद्रोग, मोह (मूर्च्छा) अथवा गुल्म होजाताहै और निद्राके अयोग्य रोकनेसे जँभाई आना, अंग टूटना, शिर और आँखोंमें जडता (भारीपन) होना तथा तन्द्रा (ऊंघसी आना) ये उपद्रव होतेहैं ॥ १५ ॥

उदावर्तकी असाध्यता ।

तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् ॥
शकृद्वमंतं मतिमानुदावर्तिनमुत्सृजेत् ॥ १६ ॥

तृष्णासे पीडित, क्लेशयुक्त, क्षीण, शूलयुक्त और विष्ठाका वमन करता हुआ ऐसा उदावर्तका रोगी असाध्य (त्यागने योग्य) होताहै ॥ १६ ॥

उदावर्तकी चिकित्सा ।

सर्वेष्वेतेषु विधिवदुदावर्तेषु कृत्स्नशः ॥
वायोः क्रियां विधातव्या स्वमार्गप्रतिपत्तये ॥
सामान्यतः पृथक्त्वेन क्रियां भूयो निबोध मे ॥ १७ ॥

इन सब प्रकारके उदावर्तोंमें समग्रतया ऐसी क्रिया करनी चाहिये जिससे अपने २ मार्गोंमें ठीक २ वायुका संचार होवे (क्योंकि इसमें प्रधान कारण वायुही हुआ करताहै) सामान्यतासे तो मुख्य चिकित्सा सबकी यही है और विशेषतासे सबकी जुदी २ चिकित्सा सुनो (उसे हम अगाडी कहतेहैं ॥ १७ ॥

अधोवायु और पुरीषके उदावर्तकी चिकित्सा।

आस्थापनं मारुतजे स्निग्धे स्विन्ने विशिष्यते ॥
पुरीषजे तु कर्तव्यो विधिरानाहिको भवेत् ॥ १८ ॥

अधोवायु रुकनेके उदावर्तमें स्नेहन, स्वेदन कराकर आस्थापनवस्ति करना श्रेष्ठ है और दस्त रुकनेके उदावर्तमें आनाह (अफारे) की विधि करनी उचित होतीहै ॥ १८ ॥

मूत्रोदावर्तकी चिकित्सा।

सौवर्चलाढ्यां मदिरां मूत्रे त्वभिहते पिबेत् ॥ एलामप्यथ मद्येन क्षीरं वापि पिबेन्नरः ॥ १९ ॥ धात्रीफलानां स्वरसं सजलं वा पिबेत्र्यहम् ॥ रसमश्वपुरीषस्य गर्दभस्याथ वा पिबेत् ॥ २० ॥ मांसोपदंशं मधु वा पिबेद्वा सीधुं गौडिकम् ॥ भद्रदारु घनं मूर्वां हरिद्रां मधुकं तथा ॥ २१ ॥ कोलप्रमाणानि पिबेदांतरिक्षेण वारिणा ॥ दुस्पर्शास्वरसं वापि कषायं कुंकुमस्य च ॥ २२ ॥ एर्वारुबीजं तोयेन पिबेद्वा लवणीकृतम् ॥ पंचमूलीश्रृतं क्षीरद्राक्षारसमथापि वा ॥ २३ ॥ योगांश्च वितरेत्तत्र पूर्वोक्तानश्मरीभिदः ॥ मूत्रकृच्छ्रक्रमं वापि कर्यान्निरवशेषतः ॥ भूयो वक्ष्यामि योगांश्च मूत्राघातोपशांतये ॥ २४ ॥

मूत्र रुकनेके उदावर्तमें मदिरामें काला नमक मिलाके पीवे अथवा मद्यको इलायची मिलाकर या दूध मिलाके पीवे ॥ १९ ॥ अथवा आंवलोंके स्वरसमें पानी मिलाके तीन दिन पीवे अथवा घोडेकी लीदका रस या गधेकी लीदका रस (पानी मिलाके) पीवे ॥ २० ॥ मद्य पीकर (सीधु या गौडी मद्य पीकर) मांस खावे अथवा भद्रदारु, नागरमोथा, मूर्वा, हलदी और मुलेठी इनको दो दो टंक लेकर वर्षाके पानीसे पीवे अथवा जवासेका स्वरस तथा केसरका काथ पीवे ॥ ॥ २१ ॥ ॥ २२ ॥ अथवा ककडीके बीज पानीके संग जरासा नमक मिलाकर पीवे अथवा पंचमूल (लघुपंचमूल) के संग पकाया दूध या दाखका रस पीवे ॥ २३ ॥ अथवा पूर्वोक्त पथरीके भेदन करनेवाले योगोंका उपयोग करे अथवा आद्योपांत मूत्रकृच्छ्रका क्रम करे और मूत्राघात (मूत्र बंद होने) की शांतिके लिये हम अगाडी योग वर्णन करेंगे (वे भी यहां यथायुक्त उपयोगमें आसकते हैं) ॥ २४ ॥

जृंभाके उदावर्तादिकी चिकित्सा ।

स्नेहस्वेदैरुदावर्तं जृंभाजं समुपाचरेत् ॥ अश्रुमोक्षेश्रुजे कार्यः स्निग्धस्विन्नस्य देहिनः ॥२५॥ तीक्ष्णांजनावपीडाभ्यां तीक्ष्णगंधोपहिंसनैः ॥ वर्तिप्रयोगैरथवा क्षवशक्तिं प्रवर्तयेत् ॥ २६ ॥ तीक्ष्णौषधप्रधमनैरथवाऽऽदित्यरश्मिभिः ॥ २७ ॥

जंभाईके रुकनेवाले उदावर्तमें स्नेहन, स्वेदन करना और अश्रु रुकनेके उदावर्तमें स्निग्ध स्वेदन कराके अश्रु निकालदेने उचित हैं ॥ २५ ॥ और छींक रुकनेके उदावर्तमें तीक्ष्ण अंजन करने, अवपीडन नस्य देने, तीक्ष्ण वस्तु सुँघानी अथवा नाकमें बत्ती डालकर छींक लेनी ठीक है तथा तीक्ष्ण औषधोंकी प्रधमन नस्य लेना या सूर्यकी तरफ देखकर सूर्यकी किरणोंका प्रकाश नाकमें पहुँचाके छींक लेना हित है ॥ २६ ॥ २७ ॥

उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् ॥ सुरां सौवर्चलवतीं बीजपूर्णरसान्विताम् ॥ २८ ॥ छर्द्यांघातं यथादोषं सम्यक्स्नेहादिभिर्जयेत् ॥ सक्षारलवणोपेतमभ्यंगं चात्र दापयेत् ॥ २९ ॥

डकार रुकनेके उदावर्तमें क्रमयुक्त स्निग्ध धूमपान करे और सुरा (मदिरा) में कालानमक तथा बिजोरे नींबूका रस मिलाकर पीवे ॥ २८ ॥ और वमन रुकनेके उदावर्तमें दोषके अनुसार स्नेहनोंसे उसे जीते और जवाखार नमक मिले (तैलादिकी) मालिश करे ॥ २९ ॥

शुक्रज उदावर्तका यत्न ।

वस्तिशुद्धिकरावापं चतुर्गुणजलं पयः ॥
आवारिनाशात्क्वथितं पीतवंतं प्रकामतः ॥
रमयेयुः प्रियां नार्यः शुक्रोदावर्तिनं नरम् ॥ ३० ॥

शुक्रावरोधज उदावर्तमें वस्ति शुद्ध करनेवाले द्रव्य (गोक्षुरादि) डालकर चौगुना पानी डालकर दूधको उबाले और पानी जलनेतक उबलने दे फिर उसे भरपेट पिलाकर प्यारी स्त्रियोंसे रमण करावे ॥ ३० ॥

(वक्तव्य) इस समयका सुजाक रोग प्रायः इस शुक्रज उदावर्तसे मिलता है ॥

(श्लो० ३०) शुक्रोदावर्ते रमणाय नार्योऽत्र श्यामाऽभिप्रेताः । गौराणां तु अतिरमणं कृच्छ्रकरम् । तदुक्तं हारीते मूत्रकृच्छ्रे "गौरस्त्रीसेवनेनापि रक्तं वापि प्रवर्तते" इति ।

क्षुधा रोंकने आदिके उदावर्तोंकी चिकित्सा ।

क्षुद्विघाते हितं स्निग्धमुष्णमल्पं च भोजनम् ॥ तृष्णाघाते पिबेन्मंथं यवागूं वापि शीतलाम् ॥ ३१ ॥ भोज्यो रसेन विश्रांतः श्रमश्वासातुरो नरः॥निद्राघाते पिबेत्क्षीरं स्वप्याच्चेष्टकथारतः३२॥

क्षुधा रोंकनेके उदावर्तमें चिकना गरम गरम थोड़ा भोजन देना उचित है और तृषा रोंकनेके उदावर्तमें मंथ पीना या ठंढी यवागू पीना चाहिये ॥ ३१ ॥ श्रमसे बढेहुए श्वासको रोंकनेके उदावर्तमें मांसरसके संग भोजन करावे और निद्रा रोंकनेके उदावर्तमें दूध पीकर अच्छी २ बातें (कहानियें) सुनता हुआ इच्छापूर्वक सोवे ॥ ३२ ॥

आध्मानोत्थेषु रोगेषु यथास्वं प्रयतेत हि ॥
यच्च यस्मिन्भवेत्प्रातं तच्च तस्मिन्प्रयोजयेत् ॥ ३३ ॥

उदावर्तमें जो प्रायः अफारा होता है और उससे जो जो शूल आदि रोग होते हैं उनका यथायोग्य प्रयत्न करे जो जो जिस जिस रोगमें यत्न कहे हैं उन रोगोंके यहां होनेमें वही यत्न करने चाहिये ॥ ३३ ॥

अपथ्यभोजनका उदावर्त ।

वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ॥ भोजनैः कुपितः सद्य उदावर्तं करोति हि ॥ ३४ ॥ वातमूत्रपुरीषासृक्कफमेदोवहानि वै ॥ स्रोतांस्युदावर्तयति पुरीषं चातिवर्तयेत् ॥ ३५ ॥ ततो हृद्बस्तिशूलार्तो गौरवारुचिपीडितः ॥ वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ॥ ३६ ॥ श्वासकासप्रतिश्यायदाहमोहवमिज्वरान् ॥ तृष्णाहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥ लभते च बहूनन्यान्विकारान्वातकोपजान् ॥ ३७ ॥

रूखे भोजन करनेसे, कसेले, चरपरे और कडुवे पदार्थ विशेष खानेसे कोठेका वायु (अपानवायु) कुपित होकर सद्यः ही उदावर्त पैदा करताहै ॥ ३४ ॥ वायु, मूत्र, विष्ठा, रुधिर, कफ, मेद इनके बहनेवाले स्रोतोंमें उदावर्त (ऊर्द्ध विपरीत गति और भ्रमण) करदेताहै और वायु ऊर्द्धगामी होजाताहै और बहुतसे दस्त आकर ॥ ३५ ॥ फिर हृदय और वस्तिमें शूल होताहै, भारीपन और अरुचिकी पीडा होतीहै तथा अधोवायु, मूत्र और दस्त कष्टसे आतेहैं ॥ ३६ ॥ और श्वास,

खांसी, प्रतिश्याय, दाह, मोह, वमन, ज्वर, तृषा, हुचकी, शिरमें पीडा, मन और श्रवण (शब्द सुनने) का भ्रम ये उपद्रव होतेहैं तथा अन्य वायुके बहुतसे विकार भी होजातेहैं जैसे कंप आदि ॥ ३७ ॥

(वक्तव्य) कभी तो यह व्याधि दस्त बहुतसे आ आ कर बढतीहै और कभी दस्त, पेशाब, अधोवायु ये बंद होकर बढतीहै ॥

उदावर्तकी चिकित्सा ।

तत्तैलं लवणाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत् ॥ दोषतो भिन्नवर्च्चस्कं भुक्तं चाप्यनुवासयेत् ॥ ३८ ॥ न चेच्छांतिं प्रयात्येवमुदावर्तः सुदारुणः ॥ अथैनं बहुशः स्विन्नं युंज्यात्स्नेहविरेचनैः ॥ ॥ ३९ ॥ पाययेत त्रिवृत्पीलुयवानीरम्लपानकैः ॥ हिंगुकुष्ठवचासर्जिविडंगं वा द्विरुत्तरम् ॥ ४० ॥ योगावेतावुदावर्तं शूलं चापि नियच्छतः ॥ ४१ ॥

इस उदावर्तवाले रोगीको लवण मिले तैलका मर्दन कराके स्निग्ध कियेहुएको स्वेदन करावे और निरूहण वस्ति करे और दोषके कारणसे पुरीष भिन्न होगया हो तो उसे उचित भोजन कराकर अनुवासनवस्ति करे ॥ ३८ ॥ और यदि दारुण बढाहुआ उदावर्त हो और इस विधिसे शांत न हो तो रोगीको बहुतसा स्वेदित करके स्नेहका (एरंडतैलादिका) विरेचन देवे ॥ ३९ ॥ और निशोथ, पीलु, अजवायन इन्हें खट्टे पन्नोंके संग पीलेवे अथवा हींग, हींगसे दूनी कूट, कूटसे दूनी वच, वचसे दूनी सज्जीखार और इससे दूनी विडंग इन्हें लेवे ॥४० ॥ ये दोनों योग उदावर्त और शूलको नष्ट करदेतेहैं ॥ ४१ ॥

देवदार्वग्निकं कुष्ठं वचां पथ्यां पलंकषाम् ॥ पौष्करांणि च मूलानि तोयस्यार्द्धाढकं पचेत् ॥ ४२ ॥ पादावशिष्टं तत्पीतमुदावर्तं व्यपोहति ॥ मूलकं शुष्कमार्द्रं च वर्षाभूः पंचमूलकम् ॥ ४३ ॥ आरेवतफलं चाप्सु पक्त्वा तेन घृतं पचेत् ॥ तत्पीयमानं शमयेदुदावर्तमशेषतः ॥४४॥ वचामतिविषां कुष्ठं यवक्षारं हरीतकीम् ॥ कृष्णां निर्दहनीं चापि पिबेदुष्णेन वारिणा ॥ ४५ ॥ इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचाम् ॥ कुष्ठं किण्वाग्निकौ चापि पिबेत्तुल्यानि पूर्ववत् ॥ ४६ ॥

देवदारु, चित्रक, कूट, वच, हरडे, गूगल और पुष्करमूल इन्हें आधे आढक (दो प्रस्थ) पानीमें पकावे ॥ ४२ ॥ चौथाई शेष रहनेपर उतार ले और इसे पीवे यह उदावर्तको नष्ट करताहै और मूलक (कोई मूली कहतेहैं कोई पीपला-मूल मानतेहैं) मूली माननेवाले सूखी मूली और गीली मूली ऐसा अर्थ करतेहैं और पिप्पलीमूल माननेवाले पीपलामूल और अदरख ऐसा अर्थ करतेहैं और साँठी, बृहत्पंचमूल और किरमालेकी फली इन्हे पानीमें क्वाथ करके उसमें घृत पकावे यह घृत पीना सब उदावर्तोंको नष्ट करताहै ॥ ४३ ॥ ४४ ॥ तथा वच, अतीस, कूट, जौखार, हरडे, पीपल और निर्दहनी (अरणी) इनको गरम जलसे पीवे ॥ ४५ ॥ अथवा इक्ष्वाकु (कटुतुंबी) की जड, मैनफल, इंद्रायन, अतीस, वच, कूट, किण्व (मद्यका बीज) और चित्रक इनको पहलेके भांति गरम पानीसे पीवे ॥ ४६ ॥

मूत्रेण देवदार्वग्नित्रिफलाबृहतीः पिबेत् ॥ ४७ ॥ यवप्रस्थं फलैः सार्द्धं कंटकार्या जलाढके ॥ पक्त्वार्द्धं प्रस्थशेषं तु पिबेद्धिंगुसमन्वितम् ॥ ४८ ॥ मदनालाबुबीजानि पिप्पलीं सनिदिग्धिकाम् ॥ संचूर्ण्य प्रथमेन्नाड्यो विशत्येतद्यथा गुदम् ॥ ४९ ॥

अथवा देवदारु, चित्रक, त्रिफला और बडी कटेली इन्हें गोमूत्रके संग पीवे ॥ ॥ ४७ ॥ अथवा एक प्रस्थ जौ और कटेलीके फल मिलाके एक आढक जलमें पकावे और आधा प्रस्थ शेष रहनेपर हींग मिलाके इसमेंसे पीवे ॥ ४८ ॥ अथवा मैनफल, कडवी तोंबीके बीज, पीपल और कटेली इन्हें पीस चूर्ण बनाकर नालीसे गुदामें फूँके (अर्थात् नालीमें भरके नाली गुदामें देकर ऐसे फूँक मारे जिससे वह चूर्ण गुदामें चला जावे । यह भी उदावर्तनाशक है) ॥ ४९ ॥

चूर्णं निकुंभकंपिल्लश्यामेक्ष्वाकग्निकोद्भवम् ॥ कृतवेधनमार्गघ्नो लवणानां च साधयेत् ॥ ५० ॥ गवां मूत्रेण ता वर्तीः कारयेत्तु गुदानुगाः ॥ सद्यः शर्मकरावेतौ योगावमृतसंभवौ ॥ ५१ ॥

इति सुश्रुतसं०उत्तरतंत्रे कायचिकित्सायां पंचपंचाशत्तमोऽध्यायः ॥५५॥

अथवा दंती, कमेला, निशोथ, कडवी तुंबी, चित्रक, कडवी तोरी और पीपल तथा पांचों नमक इनको गोमूत्रमें पीसकर बत्ती बनावे और गुदामें प्रवेश करदे ये दोनों योग (एक ऊपरवाली नालीसे गुदामें औषध पहुँचना और दूसरे यह बत्ती) उदावर्त रोगवालेके लिये अमृतके समान हैं और तत्काल आराम करनेवाले हैं ॥ ५० ॥ ५१ ॥

इति पं०मुरलीधरवि०सुश्रुतसं०भा०टी०उत्तरतंत्रे कायचिकित्सायां पंचपंचाशत्तमोऽध्यायः ॥९५॥

षट्पंचाशत्तमोऽध्यायः ५६.

अथातो विसूचिकाप्रतिषेधमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम विसूचिका (हैजे) के प्रतिषेधका व्याख्यान करतेहैं ।

विसूचीका हेतु और निरुक्ति ।

अजीर्णमामं विष्टब्धं विदग्धं चैवदीरितम् ॥ विसूच्यलसकौ तस्माद्भवेच्चापि विलंबिका ॥ १ ॥ सूचीभिरिव गात्राणि तुदन्संतिष्ठतेऽनिलः ॥ यस्याजीर्णेन सा वैद्यैरुच्यते तु विसूचिका॥२॥

पहले जो आम विष्टब्ध और विदग्ध अजीर्ण कहा जा चुका है उसीसे विसूची, अलस और विलंबिका रोग होतेहैं ॥ १ ॥ जिसके अजीर्णमें सूईके चुभनेकेसी पीडा देता हुआ वायु स्थित होजावे (न नीचेको अधोवायुसे निकले न ऊपरको डकारसे) तब उसे वैद्य विसूचिका कहतेहैं ॥ २ ॥

न तां परिमिताहारा लभंते विदितागमाः ॥ मूढास्तामजितात्मानो लभंतेऽशनलोलुपाः ॥ ३ ॥

जो विचारपूर्वक प्रमाणका यथायोग्य भोजन करनेवाले बुद्धिमान् होतेहैं उन्हें यह व्याधि नहीं होती और जो मूर्ख अजितेंद्रिय और खानेके लालची विशेष होतेहैं उनको हुआ करतीहै ॥ ३ ॥

विसूचिकाके उपद्रवसहित लक्षण ।

मूर्च्छातिसारौ वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृंभदाहाः ॥ वैवर्ण्यकंपौ हृदये रुजश्च भवंति तस्यां शिरसश्च भेदः ॥ ४ ॥

इस विसूचीरोगमें मूर्च्छा, अतिसार, वमन, प्यास, शूल, भ्रम, उद्वेष्टन, जंभाई, दाह, वर्ण बिगडजाना, कंप होना, हृदयमें पीडा और शिरमें वेदना ये लक्षण होते हैं ॥ ४ ॥

अलसके लक्षण ।

कुक्षिरानह्यतेऽत्यर्थं ताम्यत्यथ च कूजति ॥ निरुद्धो मारुतश्चापि कुक्षावुपरि धावति ॥ ५ ॥ वातवर्चोनिरोधश्च कुक्षौ यस्य भृशं भवेत् ॥ तस्यालसकमाचष्टे हिक्कोद्गारौ तु यस्य तु ॥ ६ ॥

(श्लो० ३) विदितागमाः आयुर्वेदज्ञाः । अजितात्मानः क्षुद्रमनसः अजितेंद्रियाश्च । (श्लो० ५) कुक्षौ उपरि धावतीति कुक्षौ उदरे च उपरि उपरि धावतीत्यर्थः ।

कूख अत्यन्त फूलजावे, अँधेरीसी आवे, आंतें बोलें, अधोवायु रुकजावे और कूखोंमें ऊपर ऊपरको चढे ॥ ५ ॥ वायु और दस्त रुकजावें और कूखमें दरद हो, हुचकी और डकारें आवें ये लक्षण जिसके हों उसके अलस रोग (विसूचिकाका भेद) जानना ॥ ६ ॥

विलंबिकाके लक्षण ।

दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्तते नोर्द्धमधश्च यस्य ॥
विलंबिकां तस्य विवर्जनीयामाचक्षते शास्त्रविदः पुराणाः ॥ ७ ॥

जिसके कियाहुआ भोजन कफ और वायुसे दुष्ट होकर न ऊपरको वमनसे निकलताहै और न नीचेको दस्तसे निकलताहै उसके शास्त्रज्ञ पुराने वैद्य असाध्य (त्यागने योग्य) विलंबिका (बंध हैजा) कहतेहैं ॥ ७ ॥

यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः ॥
दोषेण येनावततं स्वलिंगैस्तं लक्षयेदामसमुद्भवैश्च ॥ ८ ॥

जिस जगह आम (विना पका भोजन) होताहै उसी स्थानमें विकारसे विशेष पीडा होतीहै (वहां ही दरद होतीहै) और जिस दोषसे वह व्याप्त होवे उसीके लक्षणोंसे उसे जानना चाहिये जो जो आमके दोषसे उपद्रव होतेहैं उन्हें इसी भांति जानना चाहिये ॥ ८ ॥

विसूचीकी असाध्यता ।

यः श्यावदंतौष्ठनखोऽल्पसंज्ञश्छर्यर्दितोऽभ्यंतरयातनेत्रः ॥
क्षामस्वरः सर्वविमुक्तसंधिर्यायान्नरोऽसौ पुनरागमाय ॥ ९ ॥

जिसके दांत, होंठ, नख ये काले पडजावे, संज्ञा घटजावे, वमनकी पीडासे नेत्र भीतरको घुसजावें, आवाज बैठजावे, सब संधियां ढीली पडजावें ऐसा विसूचीका रोगी मृत्युको प्राप्त होवे ॥ ९ ॥

विसूचीकी चिकित्साका निर्देश ।

साध्यासु पार्ष्ण्योर्दहनं प्रशस्तमग्निप्रतापो वमनं च तीक्ष्णम् ॥
पक्वे ततोऽन्ने तु विलंघनं स्यात्संपाचनं चापि विरेचनं वा ॥ १० ॥

साध्यविसूची और अलसादिमें पार्ष्णिस्थान (टकने) में दाग देना श्रेष्ठ होता है और अग्निसे तपाना, तीक्ष्ण वमन कराना और भोजन पकनेपर लंघन कराना और पकता न हो तो पाचन औषध देना अथवा विरेचन देके निकाल देना उचित है ॥ १० ॥

विशुद्धदेहस्य हि सर्व एव मूर्च्छातिसारादिरुपैति शांतिम् ॥
आस्थापनं चापि वदंति पथ्यं सर्वासु योगामपरान्निबोध ॥ ११ ॥

जब वमन, रेचनादिसे शरीर शुद्ध होजाताहै तब मूर्च्छा, अतिसारादिक उपद्रव शांत होजातेहैं और इस अवस्थामें आस्थापनवस्तिको भी पथ्य कहतेहैं इनके सिवाय सबके लिये और योग सुनो ॥ ११ ॥

पथ्यावचाहिंगुकलिंगगृंजसौवर्चलैः सातिविषैश्च चूर्णम् ॥
सुखांबुपीतं विनिहंत्यजीर्णं शूलं विसूचीमरुचिं च सद्यः ॥ १२ ॥

हरडे, वच, हींग, इन्द्रजौ, लहसन, कालानमक और अतीस इनका चूर्णकर गरम पानीसे पीवे यह अजीर्ण, शूल, विसूची और अरुचि इनको तत्काल नष्ट करताहै ॥ १२ ॥

क्षारागदं वा लवणं विडं वा गुडप्रगाढानथ सर्षपान्वा ॥
अम्लेन वा सैंधवहिंगुयुक्तौ सबीजपूर्णौ सघृतौ त्रिवर्गौ ॥ १३ ॥
कटुत्रिकं वा लवणैरुपेतं पिबेत्स्नुहीक्षीरविमिश्रितं तु ॥
कल्याणकं वा लवणं पिबेत्तु यदुक्तमादावनिलामयेषु ॥ १४ ॥

कल्पस्थानके दुंदुभिस्वनीयाध्यायोक्त क्षारागदका उपयोग करे अथवा विडनमक खावे अथवा गुडमें सरसों मिलाके अम्लरससे पीवे अथवा सैंधव, हींग, बिजोरा, घृत और त्रिवर्ग (कई त्रिफला, कई त्रिगन्ध कहतेहैं, कोई त्रिफला, त्रिकटु दोनों कहतेहैं) को मिलाकर सेवन करे ॥ १३ ॥ अथवा त्रिकटुमें नमक और थोहरका दूध मिलाके पीवे अथवा कल्याणलवण जो वातव्याधिमें कहाहै उसे पीवे ॥ १४ ॥

कृष्णाजमोदक्षवकाणि वापि तुल्यौ पिबेद्वा मगधानिकुंभौ ॥
दंतीयुतं वा मगधोद्भवानां कल्कं पिबेत्क्रोष्टवतीरसेन ॥
उष्णाभिरद्भिर्मगधोद्भवानां कल्कं पिबेन्नागरकल्कयुक्तम् ॥ १५ ॥
व्योषं करंजस्य फलं हरिद्रे मूलं समं वाप्यथ मातुलुंग्याः ॥
छायाविशुष्का गुटिकाः कृतास्ता हन्युर्विसूचीं नयनांजनेन ॥ १६॥

(श्लो० १२) गृंजं लशुनम् । केचित्पलाण्डुमाहुः । (श्लो० १३) त्रिवर्गौ द्विवचनवशेन त्रिफलात्रिकटुकौ एव ज्ञेयौ ।

पीपल, अजमोद और क्षवक (राई) इनको अथवा पीपल और दंतीको बराबर पीवे अथवा दंती और पीपलके कल्कको कडवी तोरीके रससे पीवे अथवा पीपल और सोंठके कल्कको गरम पानीसे पीवे ॥ १५ ॥ और त्रिकटु, करंजके फल, दोनों हलदी और विजोरेकी जड इनको समान भाग लेकर गोली बनाके छायामें सुखाले इनका नेत्रोंमें अंजन लगानेसे विसूची नष्ट होवे ॥ १६ ॥

भोजनका उपदेश।

सुवामितं साधु विरेचितं वा सुलंघितं वा मनुजं विदित्वा ॥
पेयादिभिर्दीपनपाचनीयैः सम्यक् क्षुधार्तं समुपक्रमेत ॥ १७ ॥

अच्छी तरह वमन हुआ या विरेचन दिया या लंघन किया इत्यादि प्रकारसे शुद्ध हुए मनुष्यको सब तरह ठीक क्षुधा लगी ऐसा जानकर उसे दीपन, पाचन और पेयादि भोजन देने चाहिये ॥ १७ ॥

आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ॥
प्रवर्तमानं न यथास्वमेनं विकारमानाहमुदाहरंति ॥ १८ ॥
तस्मिन्भवत्यामससमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः ॥
आमाशये शूलमथो गुरुत्वं हृल्लासउद्गारविघातनं च ॥ १९ ॥
स्तंभः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा च शकृद्वमिश्र ॥
श्वासश्च पक्वाशयजे भवंति लिंगानि चात्रालसकोद्भवानि ॥ २० ॥

यदि क्रमसे संचित हुए आम या मल विगुण वायुसे रुककर यथायोग्य प्रवृत्त नहीं होते तो इसे आनाहका विकार कहते हैं ॥ १८ आमके दोषसे हुए आनाहमें तृषा, प्रतिश्याय, शिरमें गरमी, आमाशयमें शूल और भारीपन, जी मिचलाना और डकारें बंद होना ये लक्षण होते हैं ॥ १९ ॥ कमर, पीठ, दस्त और मूत्र ये बंद होजावें, शूल और मूर्च्छा हो और विष्ठाकेसी वमन हो, श्वास हो ये लक्षण पक्वाशयज (पुरीषज) आनाहके हैं तथा येही लक्षण अलसके भी होते हैं (अथवा इसीसे अलसके लक्षण पैदा होजाते हैं अर्थात इसीसे अलस होजाता है) ॥ २० ॥

आनाहकी चिकित्सा।

आमोद्भवे वातमुपक्रमेत संसर्गभक्तक्रमदीपनीयैः ॥
अथेतरं यो न शकृद्भवे तमामं जयेत्स्वेदनपाचनैश्च ॥ २१ ॥

(श्लो० २१) संसर्गभक्तक्रमः पेयादिक्रमः (इति नि० सं०) इतरं पक्वाशयानाहम्।

आमज आनाहमें पेयादिक्रमसे जो दीपन हो वायुको शांत करे और दूसरेमें जो विष्ठाकी वमन न करता हो उसके आमको स्वेदन और पाचनोंसे पकावे ॥ २१ ॥

विसूचिकायां परिकीर्तितानि द्रव्याणि वैरेचनिकानि यानि ॥
तान्येव वर्तीर्विंतरेद्विचूर्ण्य महिष्यजावीभगवां तु मूत्रैः॥ २२॥
स्विन्नस्य पायौ विनिवेश्य ताश्च चूर्णानि चैषां प्रधमेत्तु नाड्या ॥२३॥

विसूचिकामें जो विरेचन द्रव्य (दंती आदि) कहे हैं उन्हें ही पीसकर भैंस, बकरी, भेड, हथिनी और गौ इनके मूत्रसे बत्ती बनावे और रोगीको स्वेदन कराकर उसकी गुदामें वह बत्ती प्रविष्टकरे अथवा इस चूर्णको नाली द्वारा गुदामें प्रधमन करे ॥ २२ ॥ २३ ॥

सूत्रेण संसाध्य यथाविधानं द्रव्याणि यान्यूर्द्ध्वमधश्च यांति ॥
क्वाथेन तेनाशु निरूहयेच्च मूत्रार्द्धयुक्तेन समाक्षिकेन ॥ २४ ॥
त्रिभंडियुक्तं लवणप्रकुंचं दत्त्वा विरिक्तक्रममाचरेच्च ॥
एष्वेव तैलेन च साधितेन प्राप्तं यदि स्यादनुवासयेच्च ॥ २५ ॥

इति सुश्रुतसं०उत्तरतन्त्रे कायचिकित्सायां षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥

जो कांपताहुआ दांतोंके मींचे, श्वास जल्दी जल्दी लेवे, मुँहसे झाग आवें और जो ऐसा कहे कि काला काला भयंकर कोई मेरे पीछे दौडा आता है (या सामने काला ही काला दीखता है) ॥ १० ॥ तब मुझे बेहोशी होती है ये वायुके अपस्मारके लक्षण हैं और जो ताप, तृषा, पसीना और मूर्च्छा इनसे पीडित हो और अंगोंको धुनता हुआ बेहोश होजावे ॥ ११ ॥ और ऐसा कहे कि पीले रंगका कोई भयंकर रूपसा मेरे पीछेसे (या आगेसे) दौडा आताहै तब मुझे बेहोशी होजातीहै ये लक्षण पित्तके अपस्मारके होतेहैं ॥ १२ ॥

शीतहृल्लासनिद्रार्तः पतन्भूमौ वमन्कफम् ॥ यो ब्रूयाद्विकृतं सत्त्वं शुक्लं मामनुधावति ॥ १३ ॥ ततो मे चित्तनाशः स्यात्सोऽपस्मारः कफात्मकः ॥ हृदि तोदस्तृडुत्क्लेदस्त्रिष्वप्येतेषु संख्यया ॥ १४ ॥ प्रलापः कूजनं क्लेशः प्रत्येकं तु भवेदिह ॥ सर्वलिंगसमावायः सर्वदोषप्रकोपजे ॥ १५ ॥

जो शीत हल्लास (मुँहमें पानी भर आना) और निद्रासे पीडित हो पृथ्वीमें गिरताहुआ मुँहसे झाग डाले और ऐसा कहे कि सुपेद रंगका कोई भयंकरसा रूप मेरे पीछेसे (या आगेसे) दौडा आताहै ॥ १३ ॥ तब मैं बेहोश होजाताहूं ये लक्षण कफके अपस्मारके होतेहैं और सन्निपातके अपस्मारमें हृदयमें पीडा, तृषा, उत्क्लेद ये तीनों दोषोंके चिह्न होवें और प्रलाप, कूजन (अव्यक्त शब्द) और क्लेश ये भी प्रत्येक होतेहैं तथा सब दोषोंके मिले अन्य लक्षण (जैसे सब रंगका विकृत रूप दीखे या कभी कैसा कभी कैसा दीखे) ॥ १४ ॥ १५ ॥

अपस्मारोत्पत्तिमें मतान्तर ।

अनिमित्तागमाद्व्याधेर्गमनादकृतेऽपि च ॥
आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजम् ॥ १६ ॥

कोई ऐसा भी कहते हैं कि विना कारणही इसके उत्पन्न होनेसे और विना प्रतिकार किये ही इस व्याधिके दूर होजानेसे तथा आगमसे (किसी शास्त्रके प्रमाणसे) यह व्याधि दोषज (वातादि दोषोंसे उपजनेवाली) नहीं किंतु अमानुष भूतादिजन्य या मानस विकारसे होनेवाली है ॥ १६ ॥

मतान्तरका खण्डन ।

क्रमोपयोगाद्दोषाणां क्षणिकत्वात्तथैव च ॥ आगमाद्वैश्वरूपाच्च सैषा तु निर्वर्त्यते बुधैः ॥ १७ ॥ वर्षत्यपि यदा देवे भूमौ बीजानि कानिचित् ॥ शरदि प्रतिरोहंति तथा व्याधिसमुद्भवः ॥ १८ ॥ स्थायिनः केचिदल्पेन कालेनाभिप्रवर्द्धिताः ॥ दर्शयन्ति विकारांस्तु विश्वरूपान्निसर्गतः १९ ॥ अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु ॥ तस्य कार्यो विधिः सर्वो य उन्मादेषु वक्ष्यते २० ॥

श्रीधन्वंतरिजी कहतेहैं कि प्रथम तो यह वातादिदोषोंके क्रमके उपयोगसे उत्पन्न होती है (अर्थात् वातादि-वायु, जल, शीत, उष्णादिके उपयोग होनेसे पैदा होती है) इससे अनिमित्तागम नहीं रही, दूसरे यह क्षणिक स्वभावहीसे होतीहै अर्थात् जब दोषोंका वेग हटजाताहै तब स्वयं शांत होजातीहै इससे विना

(श्लो० १६) अनिमित्तागमात् आकस्मिकोद्भवात् । प्रतीकारे अकृते च गमनात् नायं दोषजो व्याधिरिति वदंति । किंतु भूतादिजन्यः मनोभवश्च इति वदंति । आगमाच्च मंत्रशास्त्रादौ अस्य प्रतीकारबाहुल्याच्च । (श्लो० १७) दोषाणां क्रमोपयोगात् संचयादिक्रमेण विकारजननयोगात् तथा दोषाणामेव क्षणिकत्वात् । आगमात् आयुर्वेदात् । वैश्वरूपाच्च वातपित्तश्लेष्मणां सर्वत्र सद्भावात् ।

यत्नके चलीजानाही चाहिये, तीसरे आगमसे अर्थात् शास्त्रकारोंने इसे दोषज चार भांतिका लिखाहीहै, चौथे यह कि ये वातादि दोष विश्वरूप सर्वत्र सब जगह रहनेवाले हैं इससे इनके विना कुछ होही नहीं सकता इसलिये वैद्योंने इसे दोषजही माना है और यही ठीक भी है ॥ १७ ॥ इसमें फिर यह शंका होसकतीहै कि भला जी आराम रहनेके दिनोंमें वे दोष कहाँ चलेजातेहैं ? इसका समाधान यह है कि जैसे पृथ्वीमें पडेहुए कोई बीज मेह वर्षनेपर भी शरदऋतुमें ही उगते हैं (नहीं तो पृथ्वीमें दबेपडे रहतेहैं) इसी भांति वे वातादि दोषभी कारण और समयपाकर कुपित होतेहैं तब व्याधिका दर्शन होताहै ॥ १८ ॥ और जैसे कोई बीज स्थायी (देरसे उगते) हैं और कोई थोडेही समयमें उगकर बढजातेहैं इस प्रकार इन वातादि दोषोंमेंसे भी अपने स्वभावसे कोई शीघ्र और कोई देरसे विकार दिखातेहैं ॥ १९ ॥ इन्हीं कारणोंसे यह अपस्मार महाव्याधि दोषोंहीसे उत्पन्न होनेवाली है अन्यथा नहीं और इसकी चिकित्सा भी (दोषोंकेही अनुसार) जैसे उन्मादमें कही जावेगी वैसे करनी उचित है ॥ २० ॥

मृगीकी सामान्य चिकित्सा ।

पुराणसर्पिषः पानमभ्यंगश्चैव पूजितः ॥ उपयोगो ग्रहोक्तानां योगान्नां तु विशेषतः ॥२१॥ शिग्रुकट्वंगकिण्वं हि निंबत्वग्रससाधितम् ॥ चतुर्गुणे गवां मूत्रे तैलमभ्यंजने हितम् ॥२२॥ गोधानकुलनागानां पृषतर्क्षगवामपि ॥ पित्तेषु सिद्धं तैलं च पानाभ्यंगेषु पूजितम् ॥ २३ ॥ तीक्ष्णैरुभयतो भागैः शिरश्चापि विशोधयेत् ॥ पूजां रुद्रस्य कुर्वीत तद्गणानां च नित्यशः ॥ २४ ॥

पुराना घृत पिलाना और मर्दन करना श्रेष्ठ है तथा जो उपयोग ग्रहोंके लिये कहेहैं उनका भी यहां विशेषकर उपयोग करे ॥ २१ ॥ तथा सोहँजना, अरलू, सुराबीज, नींबकी छाल और रस (या नींबकी छालका रस) इनमें चौगुना गोमूत्र डालकर तैल पकावे और उसका मर्दन करे ॥ २२ ॥ अथवा गोह, नौला, सर्प और साबर, रीछ, गौ इनके पित्तोंमें सिद्ध किया तैल पान और अभ्यंगमें श्रेष्ठ है॥ ॥ २३ ॥ तथा तीक्ष्ण योगोंसे वमन और विरेचन देकर नीचे ऊपरसे शोधन करे और शिरका भी शोधन (नस्य देकर) करे तथा नित्य शिवजीकी और उनके गणोंकी पूजा किया करे ॥ २४ ॥

(श्लो० २२) किण्वं श्वेतस्यंद (इति डल्हनः)

वातादिके अपस्मारकी चिकित्सा।

कुलत्थयवकोलानि शणबीजं पलंकषाम् ॥ जटिलां पंचमूल्यौ द्वे पथ्यां चोत्काथ्य यत्नतः ॥ वस्तमूत्रयुतं सर्पिः पिबेत्तद्वातिके हितम् ॥ २५ ॥ काकोल्यादिप्रतीवापं सिद्धं वा प्रथमे गणे ॥ पयोमधुसितायुक्तं घृतं तत्पैत्तिके हितम् ॥ २६ ॥ कृष्णावचामुस्तकाद्यैर्युक्तमारग्वधादिकैः॥ पक्वं तन्मूत्रवर्गेषु श्लेष्मापस्मारिणे हितम् ॥ २७ ॥

कुलथी, जौ, बेर, शणके बीज, लाख, जटामांसी, दशमूल और हरडे इनका काथ कर बकरेका मूत्र मिला घृत सिद्ध कर ले इसे वायुके अपस्मार रोगमें पीना हितकारक होता है ॥ २५ ॥ प्रथम विदारिगंधादिगणमें काकोल्यादिका प्रतिवाप देकर घृत पकालेवे फिर इस घृतमें दूध, शहद, मिश्री मिलाकर पीना पित्तके अपस्मारमें हित है ॥ २६ ॥ और आरग्वधादि गणमें पीपल, वचा और मोथा आदि डालकर और मूत्रवर्ग मिलाकर घृत पकावे यह कफके अपस्मारमें हितकारक है ॥ २७ ॥

सिद्धार्थक घृत।

सुरद्रुमवचाकुष्ठसिद्धार्थव्योषहिंगुभिः ॥ मंजिष्ठारजनीयुग्मसमंगात्रिफलांबुदैः ॥ २८ ॥ करंजबीजशैरीषगिरिकर्णीहुताशनैः ॥ सिद्धं सिद्धार्थकं नाम सर्पिर्मूत्रचतुर्गुणम् ॥ २९ ॥ कृमिकुष्ठगरश्वासबलासविषमज्वरान् ॥ सर्वभूतग्रहोन्मादानपस्मारांश्च नाशयेत् ॥ ३० ॥

देवदारु, वच, कूट, सुपेद सरसों, त्रिकटु, हींग, मँजीठ, दोनों हलदी, लज्जालू, त्रिफला, नागरमोथा ॥ २८ ॥ करंजबीज, शिरसके बीज, गिरिकर्ण (श्वेतस्यंद) और चित्रक इनमें चौगुना गोमूत्र मिलाकर घृत पकाले ॥ २९ ॥ यह घृत कृमि, कुष्ठ, विष, श्वास, कफ, विषमज्वर, सब भूतग्रह, उन्माद और अपस्मार इतने रोगोंको नष्ट करता है इसका नाम सिद्धार्थ घृत है ॥ ३० ॥

पंचगव्य घृत।

दशमूलेंद्रवृक्षत्वङ्मूर्वाभार्ङ्गीफलत्रयैः ॥ संपाकश्रेयसीसप्तपर्ण्यपामार्गपीलुभिः ॥३१॥ एतैः कल्कैश्च भूनिंबपूतीकव्योषचित्रकैः ॥

त्रिवृत्पाठानिशायुग्मं साारिवाद्वयपौष्करैः ॥ ३२ ॥ कटुकामदयंत्युग्रानीलिनीकृमिशत्रुभिः ॥ सर्पिरेभिश्च गोक्षीरदधिमूत्रशकृद्रसैः ॥ ३३ ॥ साधितं पंचगव्याख्यं सर्वापस्मारभूतनुत् ॥ चातुर्थिकक्षयश्वासानुन्मादांश्च नियच्छति ॥ ३४ ॥

दशमूल, कुड़ाकी छाल, मूर्वा, भारंगी, त्रिफला, किरमाला, हरडे, सातला, ओंगा और पीलू ॥ ३१ ॥ इनका कल्क करे और चिरायता, करंज, त्रिकटु, चित्रक, निशोथ, पाठा, दोनों हलदी, दोनों सारिवा, पुष्करमूल ॥ ३२ ॥ कुटकी, मदयंती, वच, नीलिनी, विडंग ये भी मिलादे इनमें गौका दूध, गौका दही, गौका मूत्र और गौके गोबरका रस डालकर गौकाही घृत सिद्ध करे ॥ ३३ ॥ यह पंचगव्य नामक घृत सब अपस्मार, भूत, चौथिया ज्वर, क्षय, श्वास और उन्मादको नष्ट करता है ॥ ३४ ॥

वातिकं वस्तिभिश्चापि पैत्तिकं तु विरेचनैः ॥
कफजं वमनैर्द्धीमानपस्मारमुपाचरेत् ॥ ३५ ॥

वायुके अपस्मारको वस्तिकर्मसे और पित्तके अपस्मारको, विरेचनसे कफके अपस्मारको वमनसे वैद्य उपचार करे ॥ ३५ ॥

भार्ङ्गीशृते पचेत्क्षीरे शालितंडुलपायसम् ॥ त्र्यहं शुद्धाय तद्भोज्यं वराहायोपकल्पयेत् ॥ ३६ ॥ ज्ञात्वा च मधुरीभूतं तं विषस्यं तदुद्धरेत् ॥ त्रीन्भागांतस्य चूर्णस्य किण्वभागेन संसृजेत् ॥ ३७ ॥ मंडोदकार्थं देयश्च भार्ङ्गीक्वाथः सुशीतलः ॥ शुद्धकुंभे निदध्याच्च संभारं तं सुरां ततः ॥ ३८ ॥ जातगंधां जातरसां पाययेदातुरं भिषक् ॥ शिरा विध्येदथ प्रोक्षा मांगल्यानि च धारयेत् ॥ ३९ ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे एकषष्टितमोऽध्यायः ॥ ६१ ॥

(श्लो० ३६ से ३९ तक) भार्ङ्गीशृत इत्यादि-भार्ङ्गीशृते क्षीरे शालितंडुलपायसं पचेदिति संबंधः। तत्र चतुर्थांशं भार्ङ्गीकल्कं दत्त्वा चतुर्गुणेन जलेन क्षीरं साधयेत् । शुद्धाय त्रिदिनमुपोषिताय वराहाय तत्पायसं भोक्तुं प्रकल्पयेत् । मधुरीभूतं श्लेष्मसंसृष्टं विदाहावस्थानप्राप्तम् । अन्ये तु मधुरीभूतं विषीभूतं व्याख्यानयंति । यतो मधुररसे विषविशेषो वर्तते अथ पायसं कथं विषविशेषं भवतीति चेत् आधारप्रभावात्—विषीभूतं च वराहस्यैव लालास्रावमूर्च्छादिलिंगैर्ज्ञातव्यम् । तं वराहं विषस्याजीर्णविषीभूतमुद्धरेत् । तस्य उद्धृतस्य अन्नस्य शोधितचूर्णीभूतस्य त्रीन्भागान् किण्वभागेन संसृजेत् । मंडोदकार्थं संधानार्थं भार्ङ्गीक्वाथो देयः शुद्धे संस्कृते कुंभे संधाय यावत् सम्यक्सुराभावं प्राप्नोति—जातरसां तामपस्मारातुरं पाययेत् (इति नि० सं०)

भारंगीमें औटाये हुए दूधसे (भारंगीका चूर्ण चतुर्थांश डालकर दूधमें चौगुना पानी डालके पकावे जब दूधमात्र शेष रहे तब) उसमें शाली चावलोंकी खीर पकावे और एक सूकरको जो तीन दिनका भूँखा हो उसे वह खीर खिलावे और जब वह पेटमें मधुरभावको प्राप्त हो तब उस विषभागको प्राप्त हुई खीरको निकाल ले फिर तीन भाग इस चूर्णमें एकभाग सुराका बीज मिलादे ॥ ३६ ॥ ॥ ३७ ॥ और मण्डोदक (मद्यके जल) के जगह उसमें भारंगीका काथही ठण्ढा करके डालदे और एक शुद्ध पूर्वोक्त संस्कार किये घडेमें उसे भर दे और जबतक वह मद्य बने तबतक भरारहने दे ॥ ३८ ॥ और जब उसमें मद्यकी गंध और रस आजावे (मद्य बनजावे) तब इसमेंसे वैद्य मृगीके रोगीको पिलाया करे और यथार्थ हो तो यथायोग्य शिरावेधन भी करे और पूर्वोक्त मंगल धारण करे (अर्थात् मांगलिक पदार्थों सिद्धार्थकपुष्पादिको धारण करे) ॥ ३९ ॥
यूनानीवाले मृगीको "मुरआ" कहते हैं और डाक्टरीमें इसे एपेलेपसी कहते हैं ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे भूतविद्यायामेकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ६२.

अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम उन्मादप्रतिषेधके अध्यायका व्याख्यान करतेहैं ।

मदयंत्युद्गता दोषा यस्मादुन्मार्गमाश्रिताः ॥
मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः ॥ १ ॥

इस व्याधिमें जोकि प्रतिलोम मार्गोंमें समाश्रित हुए दोष ऊर्द्धगामी होकर मद उत्पन्न करते हैं इससे यह मानस व्याधि उन्माद कहलातीहै (इसे भाषामें बावलापन या दीवानगी और खफगांन वगैरह कहतेहैं) ॥ १ ॥

(वक्तव्य) ये उन्माद और अपस्मारादि व्याधि मन और बुद्धिकी विकृतिसे होतीहैं इन्हें वैद्यकमें प्रायः हृदयके विकारसे मानतेहैं परन्तु यदि विचार कर देखें तो हमारे वैद्यकके सिद्धांतसे यह मूर्द्धाजन्य (दिमागसे होनेवाली) भी प्रतीत होतीहै क्योंकि महर्षि धन्वंतरिजीने पहलेही लिखा है कि-"उन्मार्गमाश्रिता उद्गता दोषा मदयंति" अर्थात् प्रतिलोम मार्गमें ऊपरको प्राप्त हुए दोषः जब ऊर्द्धगामी होतेहैं तब मद करतेहैं अर्थात् मूर्द्धामें पहुँचतेहैं तब मद करतेहैं(उन्माद पैदा करते हैं) और यदि ऐसा कहो कि उन्मार्गाश्रित और ऊर्द्धगामी होकर दोषोंका हृदयमें ही प्राप्त होना समझिये तो हृद्रोगमें जहां अवश्यमेव दोष हृद-

थको दूषित करतेहैं वहां उन्मार्गमाश्रित और उद्रत होकर दोषोंका हृदयमें प्राप्त होना महर्षिजीने नहीं लिखा जैसा कि इन व्याधियोंमें लिखा, दूसरे यह कि इन व्याधियोंमें शिरका शोधन प्रथमहीसे लिखाहै और हृदय रोगमें शिरके शोधनकी विशेष आवश्यकता नहीं इससे यह सिद्ध होताहै कि उन्माद दोनों तरहसे होताहै हृदयसे भी होसकताहै और मूर्द्धासे भी ॥

उन्मादके भेद ।

एकैकशः समस्तैश्च दोषैरत्यर्थमूर्च्छितैः ॥ मानसेन च दुःखेन स पंचविध उच्यते ॥ २ ॥ विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् ॥ स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्ति च ॥ ३ ॥

एक एक वातादि दोषसे ऐसे तीन तो ये और चौथा सन्निपातसे ये वातादि दोष जब अत्यन्त मूर्च्छित होतेहैं तब यह होताहै और पांचवां मनके दुःखसे, इस भांति यह उन्माद पांच प्रकारका हुआ ॥२॥ और छठा विष (अथवा तीक्ष्ण नशे) से होजाताहै इसमें यथायोग्य दोषोंके अनुसार चिकित्सा होतीहै और यह जबतक ताजा होताहै या बढाहुआ नहीं होता (अर्थात् ज्यादे नहीं बढता) तब तक इसकी मदसंज्ञा होतीहै ॥ ३ ॥

उन्मादका पूर्वरूप ।

मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपतर्पणम् ॥ अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम् ॥ ४ ॥ वायुनोन्मथनं चापि भ्रमश्चंक्रमतस्तथा ॥ यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति ॥ ५ ॥

कभी मोह और कभी उद्वेग हो, कानोंमें शब्द हो और शरीर दुबला होजावे, अत्यंत उत्साहसे रहे, अन्नमें रुचि न हो और स्वप्नमें कलुषित (खराब) भोजन खावे ॥ ४ ॥ और वायुसे (हृदयका) मथनसा होना मालूमदे और कुम्हारके चाककी तरह घूमनासा हुआ करे जिसके ये लक्षण हों उसे थोडेही दिनमें उन्माद होजावेगा (ऐसा जानना चाहिये ये उन्मादके पूर्वरूप हैं) ॥ ५ ॥

वातोन्मादके लक्षण ।

रूक्षच्छविः परुषवाग्धमनीततो वा श्वासातुरः कृशतनुः स्फुरि-

(श्लो० ३) स च अप्रवृद्धः तरुणः मदसंज्ञां बिभर्ति । डल्हनमते तु मदसंज्ञा विषजस्योन्मादस्यैव अप्रवृद्धत्वे भवति । भावमिश्रमते उन्मादमात्रस्य अप्रवृद्धस्य तरुणस्य नवीनस्य मदसंज्ञा भवतीति (श्लो० ५) चंक्रमतः कुलालचक्रस्थितस्येव भ्रमः (इति डल्हनः) अन्ये च क्रमतः क्रमाद् भ्रमः क्रमेण भ्रमबुद्धिरित्याहुः । (श्लो० ६) धमनीततः धमनीभिः स्फुटत्वेन व्याप्तः ।

तांगसंधिः ॥ आस्फोटयन्पठति गायति नृत्यशीलो विक्रोशति भ्रमति चाप्यनिलप्रकोपात् ॥ ६ ॥

शरीरकी कांति रूखी हो, कठोर शब्द बोले और नसें कडी होजावें, श्वाससे पीडित हो, शरीर दुबला पडजावे, शरीरकी संधियोंमें फरकन हो, तोड तोड कर पढे और गान तथा नृत्य भी करने लगे, गाली देवे और भ्रमता फिरे ये लक्षण वायुके उन्मादमें होते हैं ॥ ६ ॥

पित्तोन्मादके लक्षण।

तृट्स्वेददाहबहुलो बहुभुग्विनिद्रश्छायाहिमानिलजलांतविहारसेवी ॥ तीक्ष्णो हिमांबुनिचयेपि सवह्निशंकी पित्तादिवा नभसि पश्यति तारकाश्च ॥ ७ ॥

तृषा, पसीना, दाह ये बहुत रहें, बहुत खावे, निद्रा नहीं आवे, छाया, ठंढक, पवन, पानी इनमें विहार करना चाहे, तीक्ष्णता हो, बरफ और पानी इनके समूहमें भी अग्निकी शंका करे और दिनमें भी आकाशमें तारेसे देखे ये पित्तज उन्मादके लक्षण हैं ॥ ७ ॥

कफोन्माद और सन्निपातोन्मादके लक्षण।

छर्व्यग्निसादसदनारुचिकासयुक्तो योषिद्विविक्तरतिरल्पमतिप्रकारः ॥ निद्रापरोल्पकथनोल्पभुगुष्णसेवी रात्रौ भृशं भवति चापि कफप्रकोपात् ॥ ८ ॥ सर्वात्मके त्रिभिरपि व्यतिमिश्रितानि रूपाणि वातकफपित्तकृतानि विद्यात् ॥ संपूर्णलक्षणमसाध्यमुदाहरंति सर्वात्मकं क्वचिदपि प्रवदंति साध्यम् ॥ ९ ॥

वमन हो, अग्नि मंद होजाय, शिथिलता, अरुचि और खांसी ये भी हों स्त्रियोंसे रहस्यमें रमण करना चाहे, बुद्धि मंद होजावे, निद्रा बहुत आवे, कम बोले, थोडा खावे, गरम पदार्थोंका सेवन करे, रात्रिमें अधिक होजावे ये कफोन्मादके लक्षण हैं ॥ ८ ॥ सन्निपातके उन्मादमें वायु, पित्त, कफ तीनों दोषोंके लक्षण और रूप मिले हुए होते हैं यह संपूर्ण लक्षणों (उपद्रवों) से युक्त हो तो असाध्य होताहै और कभी यह सन्निपातका उन्माद साध्य भी होताहै ॥ ९ ॥

(श्लो० ८) योषिद्विविक्तरतिः: योषिति सुविविक्ते एकांते रती रमणं यस्य सः। (श्लो० ९) त्रिभिः वातादिभिः व्यतिमिश्रितानि मिश्रितानि रूपाणि सर्वात्मके भवंतीति।

शोकोन्माद और विषोन्मादके लक्षण ।

चौरैर्नरेंद्रपुरुषैरारिभिस्तथान्यैर्वित्रासितस्य धनबांधवसंक्षयाद्वा ॥ गाढं क्षते मनसि चं प्रियया रिरंसोर्जायेत चोत्कटतरो मनसो विकारैः ॥ १० ॥ चित्रं स जल्पति मनोनुगतं विसंज्ञो गायत्यथो हसति रोदिति चापि मूढः ॥ रक्तेक्षणो हतबलेंद्रियभः सुदीनः श्यावाननो विषकृतेन भवेद्विसंज्ञः ॥ ११ ॥

चोरोंने और राजा या राजपुरुषोंने, शत्रुओंने जिसे बहुत त्रास दिया हो या जिसके धनपुत्रादिक नष्ट होगये हों या जिसके मनपर तीक्ष्ण आघात पहुँचा हो या प्यारी स्त्रीसे रमणकी अत्यंत वांछा हो इन बातोंसे मनमें उत्कट विकार होजाता है जिससे मनुष्य उन्मत्त होकर चित्रविचित्र बातें कहता है अथवा मनके अनुकूल मिथ्या प्रलाप करता है, कभी गाने लगता है, कभी हँसता है, कभी मूढ होकर रोने लगता है ये लक्षण मनके दुःखसे हुए उन्मादमें होते हैं और विषके उन्मादमें नेत्र लाल होजाते हैं, बल, इंद्रिय और कांति ये नष्ट होजाते हैं, मनुष्य दीन होजाता है, चेहरा काला पडजाता है और बेहोश होजाता है ॥ १० ॥ ११ ॥

उन्मादकी चिकित्सा ।

स्निग्धं स्विन्नं तु मनुजमुन्मादार्तं विशोधयेत् ॥ तीक्ष्णैरुभयतो भागैः शिरसश्च विरेचनैः ॥ १२ ॥ विविधैरवपीडैश्च सर्षपस्नेहसंयुतैः ॥ योजयित्वा च तच्चूर्णं घ्राणे नस्यं तु योजयेत् ॥ १३ ॥ सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः ॥ सर्षपानां च तैलेन नस्याभ्यंगौ हितौ सदा ॥ १४ ॥

उन्मादके रोगीको स्नेहन, स्वेदन करके तीक्ष्ण वमन, विरेचन देकर ऊपर नीचे दोनों तरफसे खूब शोधन करे और शिरोविरेचनसे शिरका भी खूब शोधन करे ॥ १२ ॥ अनेक प्रकारका अवपीडन सरसोंके तैलमें मिलाकर देवे और सरसोंहीका चूर्ण मिलाकर नासिकामें नस्य दे ॥ १३ ॥ और कुत्ते तथा गौके मांसको सडाकर उसकी निरंतर धूनी देवे तथा सरसोंके तेलका नस्य देना और उसीका मर्दन करना सदा उन्मादवालेको हितकारक है ॥ १४ ॥

(श्लो० १३) तच्चूर्णं सर्षपचूर्णम् (इति नि० सं०)

अन्य यत्न ।

दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य च ॥ भीमाकारैर्नरैर्नागैर्दान्तै-
र्व्याघ्रैश्च निर्विषैः ॥ १५ ॥ भीषयेत्सततं पाशैः कशाभिर्वाथ
ताडयेत् ॥ यंत्रयित्वा सुतसं वा त्रासयेत्तं तृणाग्निना ॥ १६ ॥
प्रतुदैर्दारयेच्चैनं मर्माघातं विवर्जयेत् ॥ सापिधाने जरत्कूपे
सततं वा निवासयेत् ॥ १७ ॥

इसे अद्भुत वस्तु दिखलावे तथा प्यारे मनुष्य या प्यारी चीजका नाश होगया ऐसा झूठ मूठ ही उससे कहदे अथवा भयानक मनुष्योंसे, हाथियोंसे, दांतसे काटनेवालोंसे और निर्विष सर्पोंसे डरावे ॥ १५ ॥ अथवा रस्सोंसे बांध कर डरावे अथवा चाबुक मारे या मारनेका भय देवे अथवा बांधकर उसको तृणकी अग्नि लेजाकर डरावे ॥१६॥ अथवा बाज, सिकरे आदिसे नोचावे परन्तु मर्मपर आघात न पहुँचे इस बातका ध्यान रक्खे अथवा मुँह ढके हुए अँधेरे कुएमें कुछ दिन पडा रक्खे (प्रायः ऐसा करनेसे दिल ठिकाने आजाया करताहै)॥१७॥

त्र्यहात्र्यहाद्यवागूं च दद्यात्सक्तुं जलेन वा ॥
केवलानंबुयुक्तान्वा कुल्माषान्वा बहुश्रुतः ॥
हृद्यं यदीपनीयं च तत्पथ्यं तस्य योजयेत् ॥ १८ ॥

तीन तीन दिनमें इसे यवागू खानेको देवे अथवा जलके संग घुले हुए सत्तू देवे अथवा केवल या जलके साथ कुल्माष (बांकली) देवे और बहुश्रुत वैद्यको चाहिये कि हृदयप्रिय और दीपन जो हों उन्हे अग्निबलके अनुसार भोजनार्थ पथ्य देवे ॥ १८ ॥

महाकल्याण घृत ।

विडंगत्रिफलामुस्तमंजिष्ठादाडिमोत्पलैः ॥ श्यामैलवालुकैला-
भिश्चंदनामरदारुभिः॥ १९ ॥ वर्हिष्ठरजनीकुष्ठपर्णिनीसारिवाद्वयैः॥
हरेणुकात्रिवृद्दंतीवचातालीशकेशरैः ॥ २० ॥ द्विक्षीरं साधितं
सर्पिर्मालतीकुसुमैः सह ॥ गुल्मकासज्वरश्वासक्षयोन्मादनि-

(श्लो० १६) कशाभिः चर्मयष्टिभिः । कशा चर्मयष्टिः "कोडा" इति लोके । (श्लो० १७) सापिधाने जरत्कूपे छायायुक्ते निर्जले कूपे । (श्लो० १९ से २३ तक) एषां श्लोकानां पदच्छेदान्वयादिकं पूर्वं ज्वराध्याये कृतमेव ; अत्र बहुषु पुस्तकेषु लिखितत्वान्मयापि लिखिताः परंतु वास्तवेनैषां लिखितेन पुनरुक्तिरेव ।

वारणम् ॥ २१ ॥ एतदेव हि संपक्वं जीवनीयोपसंभृतम् ॥ चतुर्गुणेन दुग्धेन महाकल्याणमुच्यते ॥ २२ ॥ अपस्मारं ग्रहं शोषं क्लैब्यं कार्श्यमबीजताम् ॥ घृतमेतन्निहंत्याशु ये चादौ गदिता गदाः ॥२३॥

विडंग, त्रिफला, मोथा, मँजीठ, अनार, कमल, प्रियंगु, एलवालुक, इलायची, चन्दन, देवदारु ॥ १९ ॥ नेत्रबाला, हलदी, कट, पृश्निपर्णी, सारिवा, हरेणु, निशोथ, दंती, वच, तालीशपत्र और नागकेशर ॥ २० ॥ इनमें दोनों दूध (गौ और बकरीका (और कई दुगना दूध ऐसा मानते हैं) डाले और मालतीके पुष्प डालकर घृत पकाले यह (कल्याण घृत पहले ज्वरमें कहाभी जा चुका है), गुल्म, खांसी, ज्वर, श्वास, क्षय और उन्माद इन्हें दूर करता है ॥ २१ ॥ और इसी घृतको जीवनीयगणकी औषधोंके साथ चौगुने दूधसे पकावे तो यह महाकल्याण घृत होजाता है ॥ २२ ॥ यह मृगी, ग्रहदोष, शोष, नपुंसकता, कृशता और निर्वीर्यता इन रोगोंको तथा जो पहले कहे (कल्याणघृतोक्त) रोगोंको भी दूर करता है ॥ २३ ॥

फलघृत ।

बर्हिष्ठकुष्ठमंजिष्ठाकुकैलानिशाह्वयैः ॥ तेनेदं त्रिफलाहिंगुवाजिगंधामरद्रुमैः ॥ २४ ॥ वचाजमोदाकाकोलीमेदामधुकपद्मकैः ॥ सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम् ॥ २५ ॥ बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसाम् ॥ ख्यातं फलघृतं स्त्रीणां वंध्यानां चाशु गर्भदम् ॥ २६ ॥

नेत्रबाला, कूट, मँजीठ, कुटकी, इलायची, हलदी, त्रिफला, हींग, असगंध, देवदारु ॥ २४ ॥ वच, अजमोदा, काकोली, मेदा, मुलेठी और पद्माख इनमें घृत पकावे और चौगुना दूध डाले तथा खांड भी डाले यह फलघृत ग्रहपीडित बालकोंको तथ दुष्टबुद्धिवाले और अल्पबुद्धिवाले पुरुषोंको श्रेष्ठ है तथा वंध्या स्त्रियोंको शीघ्रही गर्भ देनेवाला है ॥ २५ ॥ २६ ॥

अन्यप्रयोग ।

ब्राह्मीमैंद्रीं विडंगानि व्योषं हिंगु सुरां जटाम् ॥ विषघ्नीं लशुनं रास्नां विशल्यां सुरसां वचाम् ॥ २७ ॥ ज्योतिष्मतीं नागविन्ना-

---

(श्लो० २४ से २६ तक) एतत्फलघृतपाठोपि समाश्चिप्तः प्रतीयते । तत्र तेनेदमिति अलग्रम् अशुद्धं वा प्रतीयते ।

मनंतामभयां तथा ॥ सौराष्ट्रीं च समांशानि गजमूत्रेण पेषयेत् ॥ ॥ २८ ॥ छायाविशुष्कास्तद्वर्तीर्योजयेद्विधिकोविदः ॥ अवपीडेऽञ्जनेऽभ्यंगे नस्ये धूमे प्रलेपने ॥ २९ ॥

ब्राह्मी, इंद्रायण, विडंग, त्रिकटु, हींग, सुरा (सुराह्व देवदारु), जटामांसी, (बालछड़), हलदी, लहसन, रास्ना, विशल्या (गिलोय), तुलसी, वच ॥ २७ ॥ मालकांगनी, नागविन्ना (इंद्रायनका भेद नागदमनी), उत्पलसारिवा, हरडे, फटकडी इनको समान भाग लेकर हाथीके मूत्रमें पीसे ॥ २८ ॥ और गोली बनाके छायामें सुखाले इन्हें विधि जाननेवाला वैद्य इस उन्माद रोगमें अवपीडनमें, अंजनमें, मर्दनमें, नस्यमें, धूनी देनेमें और लेपमें सब जगह उपयोग करे ॥ २९ ॥

उन्मादचिकित्सामें विशेष उपदेश ।

उरोपांगललाटेषु शिराश्चास्य विमोक्षयेत् ॥ अपस्मारक्रियां चापि ग्रहोदिष्टां च कारयेत् ॥ ३० ॥ शांतदोषं विशुद्धं च स्नेहवस्तिभिराचरेत् ॥ शोकशल्यं व्यपनयेदुन्मादे पंचमे भिषक् ॥ ३१ ॥ उन्मादेषु च सर्वेषु कुर्याच्चित्तप्रसादनम् ॥ मृदुपूर्वां मदेष्वेवं क्रियां विद्वान्प्रयोजयेत् ॥ ३२ ॥ विषजे मृदुपूर्वां च विषघ्नीं कारयेक्रियाम् ॥ ३३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे भूतविद्यायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

हृदय, अपांग तथा ललाट इन स्थानोंमें उन्मादवालेका शिरामोक्षण करे तथा अपस्मारोक्त और ग्रहोक्त क्रिया भी करे ॥ ३० ॥ जब दोष शांत होजावे और शोधनादिसे शुद्ध होजावें तब स्नेहवस्ति करे और पांचवें शोकके उन्मादमें शोकरूपी शल्यको ज्ञानादिसे दूर करे ॥ ३१ ॥ सब भांतिके उन्मादोंमें चित्तका प्रसन्न करना मुख्य है और जो मद हो उसमें विद्वान वैद्य पहले मृदु (हलकी) क्रिया करे ॥ ३२ ॥ और विषजन्य उन्मादमें मृदुतापूर्वक विष दूर करनेवाली क्रिया करनी चाहिये ॥ ३३ ॥

यूनानी हकीम मूर्छा (दिमागसे होनेवाले उन्मादको "जनूं" कहते हैं और दिलके फितूर (धड़कने या बे ठिकाने जरा टहलजानेसे) होनेवालेको "खफगान" कहते हैं और उन्मादके सूक्ष्मांगमदको " मिराक " कहते हैं ॥

डाक्टरीमें दिमागसे होनेवाले उन्मादको "इन्सानिटी" (Insanity) कहतेहैं और दिल धड़कनेसे होनेवालेको "पलपेटीशन" (Palpetition) कहतेहैं और एकप्रका-

रके सूक्ष्म उन्मादको "मेलनकोलिया" (Melancoliya) कहतेहैं जिसे यूनानी "मीली खोलिया" कहतेहैं ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतंत्रे भूतविद्यायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

॥ इति भूतविद्या समाप्ता ॥

त्रिषष्टितमोऽध्यायः ६३.

अथातो रसभेदविकल्पमध्यायं व्याख्यास्यामः ।

यहांसे अगाड़ी अब हम रसके भेदकल्पनाके अध्यायका व्याख्यान करते हैं (अर्थात् पहले जो छः रस वर्णन कियेगये हैं उनके मिलनेसे कितने भेद होतेहैं इसका वर्णन करतेहैं)

दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः ॥ त्रिषष्ट्या रसभेदानां तत्प्रयोजनमुच्यते ॥ १ ॥ अविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिषष्टिधा ॥ रसभेदान्त्रिषष्टिं तु वीक्ष्य वीक्ष्यावचारयेत् ॥ २ ॥ एकैकेनानुगमनं भागशो यदुदीरितम् ॥ दोषाणां तत्र मतिमान्त्रिषष्टिं तु प्रयोजयेत् ॥ ३ ॥

दोषोंका जो पंद्रह प्रकारका प्रसर (कोप या उफान) पहले वर्णन किया (उसके अगाड़ी त्रेसठ भेद कहेंगे अर्थात् उल्वणता और हीनतादिसे दोषोंके त्रेसठ भेद होतेहैं) उनमें रसोंके त्रेसठ भेदोंका प्रयोग करना रसभेद कहनेका प्रयोजन है ॥ १ ॥ अविदग्ध और विदग्ध (एक वस्तुमें समवाय संबन्धसे कई रसोंका योग हो और संयोगसे रसोंका योग हो इसप्रकारसे) रसोंके त्रेसठ भेद होतेहैं इन त्रेसठ प्रकारके रसभेदोंको (दोषोंके अनुसार) देख देख कर प्रयोग करे ॥ २ ॥ एक एकके अनुगत होकर जो विभागपूर्वक भेद कहे जातेहैं उनसे त्रेसठ प्रकारके दोषभेदोंको योजना करे ॥ ३ ॥

दोदो रसोंके योगसे भेद ।

यथाक्रमं प्रवृत्तानां द्विकेषु मधुरो रसः ॥ पंचानुकमते योगान्म्लश्चतुर एव च ॥ ४ ॥ त्रींश्चानुगच्छति रसो लवणः कटुको द्वयम् ॥ तिक्तः कषायमन्वेति त द्विकाः दश पंच च ॥ ५ ॥

(श्लो० १) रसभेदकथने प्रयोजनमाह—त्रिषष्टिप्रकाराणामपि रसभेदानामुपयोगार्थं दोषभेदा उक्ताः। तेन दोषभेदानां त्रिषष्टिरपि गृह्यते (श्लो० २) अविदग्धा असंयुक्ता समवायतो भिद्यंत इत्यर्थः। विदग्धा संयुक्ता रसांतरसंयोगात् भिद्यंते तत्र यथासंभवं केचित् संयोगतः केचित्समवायतः इत्यादिभेदेन द्रव्यांतरद्वारेण कथ्यंते (इति नि० सं०)

मधुर, अम्ल, लवण, कटु, तिक्त, कषाय इन छह रसोंके यथाक्रम प्रवृत्त होनेमें दो २ रसोंके योग करनेमें मधुररस पांचोंसे मिलता है और पांच भेद होतेहैं तथा अम्ल चारोंसे मिलता है, लवण तीनोंसे मिलता है, कटुक दोसे मिलता है और तिक्त केवल एकहीसे मिलता है ऐसे दो दो रसके मेलसे १५ भेद होजाते हैं ॥ ४ ॥ ५ ॥

तद्यथा—मधुराम्लः । मधुरलवणः । मधुरतिक्तः । मधुरकटुकः । मधुरकषायः । एते पंचानुक्रांता मधुरेण ॥ ६ ॥ अम्ललवणः । अम्लकटुकः । अम्लतिक्तः । अम्लकषायः । एते चत्वारोऽनुक्रांता अम्लेन ॥ ७ ॥ लवणकटुकः । लवणतिक्तः । लवणकषायः । एते त्रयोऽनुक्रांता लवणेन ॥ ८ ॥ कटुतिक्तः । कटुकषायः । द्वावेतावनुक्रांतौ कटुकेन ॥ ९ ॥ तिक्तकषायः । एक एवानुक्रांतस्तिक्तेन ॥ १० ॥ एते पंचदश द्विकसंयोगा व्याख्याताः ॥ ११ ॥

दो दो रसोंके मेलसे पंद्रह भेद इस भांति होतेहैं जैसे १ मीठा खट्टा । २ मीठा नमकीन । ३ मीठा कडुवा । ४ मीठा चरपरा । ५ मीठा कसेला । इस भांति मधुरसे पांच रस मिलकर ये पांच भेद होतेहैं ॥ ६ ॥ फिर १ खट्टा नमकीन । २ खट्टा चरपरा । ३ खट्टा कडुवा । ४ खट्टा कसेला । इसभांति खट्टेमें मिलकर चार भेद हुए ॥ ७ ॥ फिर १ नमकीन चरपरा । २ नमकीन कडुवा । ३ नमकीन कसेला इस भांति नमकीनमें मिलके ये तीन भेद हुए ॥ ८ ॥ फिर १ कटु अर्थात् चरपरेमें कडुवा । २ चरपरेमें कसेला । इसभांति चरपरेसे मिलाके ये दो भेद हुए ॥ ॥ ९ ॥ फिर १ तिक्त अर्थात् कडुवा, कसेला दो मिलकर एकही भेद हुआ ॥ ॥ १० ॥ इस प्रकार दो दो रसोंके परस्पर सबमें सबके मेलसे पंद्रह भेद कहेहैं ॥ ११ ॥

तीन तीन रसोंके योगसे २० भेद ।

त्रिकं वक्ष्यामः । आदौ प्रयुज्यमानस्तु मधुरो दशगच्छति ॥ षडम्लो लवणस्तस्माद्द्वौ त्वेकं रसः कटु ॥ १२ ॥

अब तीन तीन रसोंके मिलनेसे जिस प्रकार भेद होतेहैं उन्हें कहतेहैं । प्रथम प्रयुज्यमान हुए मधुर रसके दश भेद होतेहैं और खट्टेसे मिलकर छः भेद होतेहैं और लवणसे मिलके तीन भेद होतेहैं और कटुकसे मिलकर एक ही होताहै ॥ १२ ॥

मधुराम्ललवणः । मधुराम्लकटुकः। मधुराम्लतिक्तः । मधुराम्लकषायः । मधुरलवणकटुकः । मधुरलवणतिक्तः । मधुरलवणकषायः । मधुरकटुकतिक्तः । मधुरकटुककषायः मधुरतिक्तकषायः । एवमेषां त्रिकसंयोगानां दशानामादौ मधुरः प्रयुज्यते ॥ १३ ॥ अम्ललवणकटुकः । अम्ललवणतिक्तः । अम्ललवणकषायः । अम्लकटुकषायः । अम्लकटुतिक्तः । अम्लतिक्तकषायः । एवमेषामादावम्लः प्रयुज्यते ॥ १४ ॥ लवणकटुतिक्तः । लवणकटुकषायः । लवणतिक्तकषायः। एवमेषां त्रयाणामादौ लवणः प्रयुज्यते ॥ १५ ॥ कटुतिक्तकषायः । एवमेकस्यादौ कटुकः प्रयुज्यते ॥ १६ ॥ एवमेते त्रिकसंयोगा विंशतिर्व्याख्याताः ॥ १७ ॥

तीन तीन रसोंके मेलसे २० भेद इस भांति होतेहैं जैसे–१ मीठा खट्टा खारा।२ मीठा खट्टा चरका । ३ मीठा खट्टा कडुवा । ४ मीठा खट्टा कसेला । ५ मीठा खारा चरपरा । ६ मीठा खारा कडुवा । ७ मीठा खारा कसेला । ८ मीठा चरका कडुवा । ९ मीठा चरका कसेला । १० मीठा कडुवा कसेला । इस भांति तीन रसोंके योगोंमें दश भेद ये ऐसे हैं जिनके आदिमें मधुर रस मिलताहै ॥ १३ ॥ फिर १ खट्टा खारा चरका। २ खट्टा खारा कडुवा । ३ खट्टा खारा कसेला । ४ खट्टा चरका कसेला । ५ खट्टा चरका कडुवा । ६ खट्टा कडुवा कसेला । इस भांति तीन रसोंके योगमें छः भेद ये ऐसेहैं जिनके आदिमें अम्ल रस मिलताहै ॥ १४ ॥ फिर १ खारा चरका कडुवा । २ खारा चरका कसेला । ३ खारा कडुवा कसेला । इस प्रकार ये तीन भेद ऐसेहैं जिनके आदिमें लवण रस मिलाहै ॥ १५ ॥ फिर १ चरपरा कडुवा कसेला । यह एक ऐसाहै जिसके आदिमें कटुक रस मिलाहै ॥ १६ ॥ इस प्रकारसे तीन रसोंके संयोगके ये बीस भेद कहेहैं ॥ १७ ॥

चार चार रसोंके योगके १५ भेद ।

चतुष्कान् वक्ष्यामः । चतुष्करससंयोगान्मधुरो दश गच्छति ॥
चतुरोऽम्लस्तु गच्छेच्च लवणस्त्वेकमेव तु ॥ १८ ॥

अब चार चार रसोंके मिलनेसे जिस प्रकार भेद होतेहैं उन्हें कहतेहैं इन चार रसोंके संयोगोंमें मधुर रस दशोंके आदिमें आताहै और अम्लरस

चारोंके आदिमें आताहै और लवण एक भेदके आदिमें आताहै ऐसे ये १५ भेद होतेहैं ॥ १८ ॥

(वक्तव्य) रसके योगोंमें मधुर जैसे यहां दशके आदिमें आया इत्यादि इनमें आदिमें आनेकी कोई बात नहीं यह केवल गणनाके क्रमके लियेहै नहीं तो आदि, अंत, मध्य कुछ नहीं रसमें रसोंके मेलसे ही भेद होतेहैं ॥

मधुराम्ललवणकटुकः । मधुराम्ललवणतिक्तः । मधुराम्ललवणकषायः । मधुराम्लकटुकतिक्तः । मधुराम्लकटुकषायः । मधुरलवणतिक्तकटुकः । मधुराम्लतिक्तकषायः । मधुरलवणकटुकषायः । मधुरकटुतिक्तकषायः । मधुरलवणतिक्तकषायः । एवमेषां दशानामादौ मधुरः प्रयुज्यते ॥ १९ ॥ अम्ललवणकटुतिक्तः । अम्ललवणकटुकषायः । अम्ललवणतिक्तकषायः । अम्लकटुतिक्तकषायः । एवमेषां चतुर्णामम्लः ॥ २० ॥ लवणकटुतिक्तकषायः । एवमेकस्यादौ लवणः ॥ २१ ॥ एवमेते चतुष्करससंयोगा पंचदश कीर्तिताः ॥ २२ ॥

१ मीठा खट्टा खारा कटुक । २ मीठा खट्टा खारा तिक्त । ३ मीठा खट्टा खारा कसेला । ४ मीठा खट्टा कटु तिक्त । ५ मीठा खट्टा कटु कषाय । ६ मीठा खारा तिक्त कटु । ७ मीठा खट्टा तिक्त कषाय । ८ मीठा खारा चरका कसेला । ९ मीठा चरपरा कडुवा कसेला । १० मीठा नमकीन कडुवा कसेला । इसभांति दशोंके आदिमें मधुररस मिलाहै ॥ १९ ॥ फिर १ खट्टा खारा चरका कडुवा । २ खट्टा खारा चरका कसेला । ३ खट्टा खारा कडुवा कसेला । ४ खट्टा चरका कडुवा कसेला । इसभांति चारोंके आदिम अम्ल रस है ॥ २० ॥ और १ खारा चरका कडुवा कसेला । इस भांति आदिमें लवण एकहीमें है ॥ २१ ॥ इस प्रकारसे चार रसोंके संयोगसे पंद्रह १५ भेद हुए ॥ २२ ॥

पांच पांच रसोंके योगके ६ भेद ।

पंचकान्वक्ष्यामः । पंचकान्पंच मधुरः एकमम्लस्तु गच्छति ॥ २३ ॥

अब पांच पांच रसोंके मिलनेसे जिस प्रकार भेद होतेहैं उन्हें कहतेहैं ॥ इन पांच रसोंके संयोगमें मधुररस पांचोंके आदिमें आताहै और अम्ल एकहीके आदिमें (इस भांति ६ भेद हैं) ॥ २३ ॥

मधुराम्ललवणकटुतिक्तः । मधुराम्ललवणकटुकषायः । मधुराम्ललवणतिक्तकषायः । मधुराम्लकटुतिक्तकषायः । मधुरलवणकटुतिक्तकषायः । एवमेषां पंचानां पंचरससंयोगानामादौ मधुरः प्रयुज्यते ॥ २४ ॥ अम्ललवणकटुतिक्तकषायः । एवमेकस्यादावम्लः प्रयुज्यते॥२५॥एवमेते षट् पंचसंयोगा व्याख्याताः॥२६॥

१ मीठा खट्टा खारा चरका कडुवा । २ मीठा खट्टा खारा चरका कसेला । ३ मीठा खट्टा खारा कडुवा कसेला । ४ मीठा खट्टा चरका कडुवा कसेला । ५ मीठा खारा चरका कडुवा कसेला । इस भांति पांच रसोंके योगोंमेंसे पांचोंके आदिमें मधुर रस मिला है ॥ २४ ॥ फिर १ खट्टा खारा चरका कडुवा कसेला । इसप्रकार एकके आदिमें अम्लरस मिलाहै ॥ २५ ॥ इस प्रकार पांच पांच रसोंके योगके छः भेद हुए ॥ २६ ॥

षड्भिरेकं वक्ष्यामः । एकस्तु षड्भिसंयोगो मधुराम्ललवणकटुतिक्तकषायः । एवमयमेकः षड्भिसंयोगः ॥ २७ ॥

छहों रसोंके मेलको भी कहतेहैं-छहोंरसोंके मिलनेसे एक ही भेद होताहै जैसे-मीठा खट्टा खारा चरका कडुवा और कसेला । इसप्रकार यह एकही छः रसोंके संयोगका भेद है ॥ २७ ॥

एकैकश्च षड्रसा भवंति । मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति ॥ २८ ॥ भवति चात्र-

और जुदे जुदे एक एक रस छह ही हैं जैसे-मीठा खट्टा खारा चरपरा कडुवा और कसेला ॥ २८ ॥ इस विषयमें श्लोक है-

एषा त्रिषष्टिर्व्याख्याता रसानां रसचिंतकैः ॥
दोषभेदे त्रिषष्टिस्तु प्रयोक्तव्या विचक्षणैः ॥ २९ ॥

इति सुश्रुतसंहितायामुत्तरतंत्रे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

रसभेदके जाननेवाले वैद्योंने रसोंके ये त्रेसठ भेद वर्णन किये हैं इन्हें बुद्धिमान दोषभेदोंमें त्रेसठ ही यथायोग्य बरतें (ये ६३ भेद इस भांति होतेहैं १५ दो दो रसके । २० तीन तीन रसके । १५ चार चार रसके । ६ पांच पांच रसके और १ छहों रसका । तथा ६ जुदे जुदे रस । ऐसे ये सब ६३ हुए) ॥ २९ ॥

(वक्तव्य१) रसोंके संयोगमें प्रधानता अप्रधानता न्यूनाधिकता और अंशांशोंको विचार किया जावे तो अनन्त भेद होसकतेहैं जिनकी कदापि गणना नहीं होसकती ।

(वक्तव्य २) इन रसोंके संयोगके साथ डल्हनमिश्रजीने कुछ उदाहरण भी लिखे हैं जैसे कपित्थ मधुराम्ल है । कुत्ते और शृगालका मांस मधुर कटुक है इत्यादि तथा कीरके मांससे युक्त सुरा अम्ल तिक्तकषाय है इत्यादि परंतु मिलेहुए इन स्वादोंके पदार्थ रसोंकी न्यूनाधिकतासे असंख्य हैं उन्हें वैद्य स्वयं जानसकते-हैं अथवा किसी अन्यको खिलाकर या आप ही चाखकर जानसकतेहैं और संयोगज वस्तुओंमें संयोग और संस्कारसे जानसकते हैं इनके लिखनेकी विशेष आवश्यकता नहीं इसीसे हमने वे उदाहरण नहीं लिखे क्योंकि वैद्य उन्हें स्वयं जानसकते हैं ॥

इति पं० मुरलीधरवि० सुश्रुतसं० भा० टी० उत्तरतन्त्रे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः ६४.

अथातः स्वस्थवृत्तमध्यायं व्याख्यास्यामः ।

यहांसे अगाडी अब हम स्वस्थवृत्त (अर्थात् तंदुरस्त मनुष्योंके वर्त्ताव) के अध्यायका व्याख्यान करते हैं ॥

स्वस्थके लक्षण ।

समदोषः समाग्निश्च समधातुमलक्रियः ॥
प्रसन्नात्मेंद्रियमनाः सुस्थ इत्यभिधीयते ॥ १ ॥

जिसके वातादि दोष समान हों (कोई उल्वण और क्षीण न हो) तथा जठराग्नि भी सम हो (मंदाग्नि, तीक्ष्णाग्नि, विषमाग्नि न हों) जिसके सातों धातु और मल सम हों (कोई धातु अतिबढी या घटी न हो, मल भी बढा या क्षीण न हो) और क्रिया भी समान हो (अर्थात् जागना, सोना, बोलना, चलना, फिरना ये कम या बहुत बढे न हों) और आत्मा (जीवात्मा) मन और इंद्रिय ये प्रसन्न हों (अर्थात् इंद्रियोंकी शक्ति भी यथायोग्य हो) ऐसे मनुष्यको सुस्थ (स्वस्थ अर्थात् निरोगी या तन्दुरुस्त कहते हैं ॥ १ ॥

सूत्रस्थाने समदिष्टः सुस्थो भवति यादृशः ॥ तस्य यद्रक्षणं तद्धि चिकित्सायाः प्रयोजनम् ॥ २ ॥ तस्य यद्वृत्तमुक्तं हि रक्षणं हि समासतः ॥ तस्मिन्नर्थाः समासोक्ता विस्तरस्तस्य वक्ष्यते ॥ ३ ॥

सूत्रस्थानके दोषधातुमलक्षयवृद्धिविज्ञानीयाध्यायमें जैसा स्वस्थ बताया है उसकी रक्षा रख रोग नहीं होने देना यही चिकित्साशास्त्रका (मुख्यतासे)

श्लो० १) सुखेन नैरोग्येण तिष्ठति इति सुस्थः रोगरहितः । 'सुस्थ' इत्यत्र स्वस्थ इति वा पाठः । तत्र स्वेन स्वभावेन सुखेन वा तिष्ठतीति स्वस्थः नैरोग्यः (इति श० स्तो०)

प्रयोजन है ॥ २ ॥ स्वस्थ मनुष्योंके वर्त्ताव (विहार, आहार आदि) वहां चिकित्सास्थानके अनागतव्याधिप्रतिषेधनीयाध्यायमें) तथा और कई जगह संक्षेपसे कहेगये अब उनको यहांपर और विस्तारसे वर्णन करते हैं ॥ ३ ॥

स्वास्थ्यरक्षाका निर्देश ।

यस्मिन्यस्मिन्ऋतौ ये ये दोषाः कुप्यंति देहिनाम् ॥
तेषु तेषु प्रदातव्या रसास्ते ते विजानता ॥ ४ ॥

जिन जिन ऋतुओंमें जो जो दोष मनुष्योंके देहमें कुपित होते हैं (यह बात भी हम पहले सूत्रस्थानके ऋतुचर्याध्यायमें कहचुके हैं) जानकार वैद्यको चाहिये कि उन्हीं उनकी शांति करनेवाले जो रस हैं वे उन ऋतुओंमें मनुष्योंके लिये देने चाहिये ॥ ४ ॥

ऋतुभेदसे आहारविहारादिका विस्तारसे वर्णन ।

वर्षाऋतुका वर्त्ताव ।

प्रक्लिन्नत्वाच्छरीराणां वर्षासु खलु देहिनाम् ॥
मंदेऽग्नौ कोपमायांति संहर्षान्मारुतादयः ॥ ५ ॥

वर्षाकी ऋतुमें मनुष्योंके शरीर गीले (नम) रहतेहैं जिससे अग्नि मन्द हो जाती है और संहर्ष (रोमहर्ष हो होकर अथवा नमवायुके कारण वातादिक दोष कोपको प्राप्त होतेहैं) ॥ ५ ॥

तस्मात्क्लेदविशुद्ध्यर्थं दोषसंहरणाय च ॥ कषायतिक्तकटुकै रसैर्युक्तमथाद्रवम् ॥ ६ ॥ नातिस्निग्धं नातिरूक्षमुष्णं दीपनमेव च ॥ देयमन्नं नृपतये यज्जलं चोक्तमादितः ॥ ७ ॥ तप्तावरतमंभो वा पिबेन्मधु समायुतम् ॥ अह्नि मेघानिलाविष्टेऽत्यर्थशीतांबुसं-

---

(श्लो० ४) ते रसास्तेषु तेषु दोषेषु शांतिकराः । (श्लो० ५) प्रक्लिन्नत्वात् अत्यंतार्द्रत्वात् । संहर्षात् रोमांचत्वात् । अथवा वायोः । संहृष्यत्यनेन इति संहर्षो वायुः (इति शब्दस्तोमः) मारुतादय वातपित्तकफाः कोपमायांति । ननु वर्षासु संचयरूपं पित्तं कुपितमस्ति नेतरौ तत्कथं ' कुप्यंति मारुतादय' इत्युक्तम् । प्रावृट्प्रकुपितो वायुर्वर्षास्वपि कुपित एव वर्तते । कफश्च मेघनिःस्यंदादिहेतुभिः असंचितोपि कुप्यति अतो युक्त एवः दोषत्रयकोपः । अथवा अग्निमांद्यादोषत्रयकोपः (इति नि० सं०) (श्लो० ७) देयमन्नं नृपतये इत्यत्र नृपतये इत्युपलक्षणं किंतु मनुष्येभ्यो इत्यर्थः । यज्जलमादि- तश्चोक्तम् आंतरिक्षं तद्वर्षाया अंते आश्वयुजि पेयं वर्षारंभे तु तस्य दूषणयुक्तत्वात्कदापि न पेयमिति भावः। (श्लो० ८) तप्तावरतं क्वथितशीतीकृतम् ।

कुले ॥ ८ ॥ तरुणत्वाद्विदाहं च गच्छंत्योषधयस्तदा ॥ मतिमां-स्तन्निमित्तं च नैव व्यायाममाचरेत् ॥ ९ ॥

तिस लिये क्लेदनताकी शुद्धिके लिये और दोषोंके शांत रखनेके लिये कसैले-कडुवे और चरपरे रसोंसे युक्त अद्रव जो (विशेष पतले नहीं हो ऐसे) पदार्थ (खाने चाहिये) ॥ ६ ॥ जो न बहुत चिकने (तरवतर) और न बहुत रूखे हों ऐसे गरमागरम और अग्नि दीपन करनेवाले भोजनादि राजाको (बडे आदमि-योंको) खानेको दिलावे और जल जैसा पहले उत्तम कहाहै वैसा दिलावे ॥ ॥ ७ ॥ अथवा पानीको औटाकर उसे ठंढाकरके दिलावे या शहद मिलाकर पीवे मेघ (बादल), हवा इनसे व्याप्त और ठंढे पानीसे संयुक्त ऐसे दिनोंमें नवीन होनेसे औषधें (शाक, फलादि) विदाहको प्राप्त होतीं (अर्थात् सब पित्त और जलन पैदा करनेवाली होतीहैं इस लिये बुद्धिमान् अत्यन्त परिश्रम इन दिनोंमें नहीं करे) क्योंकि अति व्यायामसे विदाह अधिक बढताहै परन्तु निर्व्यायाम भी नहीं रहे जिससे अग्नि और भी मंद होजातीहै ॥ ८ ॥ ९ ॥

अत्यंबुपानावश्यायग्राम्यधर्मातपांस्तथा ॥ १० ॥ भूवाष्पपरिहा-रार्थं शयीत च विहायसि ॥ शीते सांग्नौ निर्वाते च गुरुप्रावरणे गृहे ॥ ११ ॥ यायान्नागवधूभिश्च प्रशस्तागुरुभूषितः ॥ दिवास्व-प्नमजीर्णं च वर्जयेत्तत्र यत्नतः ॥ १२ ॥

ज्यादे पानी पीना, ओसमें रहना, सोना, मैथुन करना (अतिमैथुन) और धूप इन्हें त्याग देवे ॥ १० ॥ और पृथ्वीकी भाफ (सीलके अवखरे या मेलेरिया) से बचे रहनेके किये अधर सोवे (अर्थात् पृथ्वीपर न सोवे ऊपरकी मंजिलके चौवारेमें पलँगोंपर सोवे और ऐसे स्थानोंमें रहे जो ठंढे हों परन्तु उनमें अग्नि जरूर रहती हो तथा तेज हवा नहीं आतीहो और वहां भी भारी कपडा ओढ-कर सोया करे ॥ ११ ॥ और श्रेष्ठ अगुरु शरीरपर लगाके हस्तिनी स्त्रियोंसे संगम करे और दिनका सोना तथा अजीर्णकारक भोजन इन दिनोंमें अवश्य त्याग दे ॥ १२ ॥

(श्लो० ९) "नैव व्यायाममाचरेत्" इत्यत्र 'नातिव्यायाममाचरेत्' इति पाठांतरम् । (श्लो० १०) अवश्यायाः रात्रिनिपातिनः सूक्ष्मजलकणाः (श्लो० ११) विहायसीति-विहायः-शब्देनात्र गृहोपरिभूः अभिप्रेता । अन्ये मंचादिकं मन्यंते । शीते साग्नौ अग्नियुते शीतगृहे । गुरुप्रावरणो गुरुवस्त्रावृतः सन् । केचित् गुरुप्रावरणे गृहे दृष्टाच्छादितगृहे इति मन्यंते (श्लो० १२) नागवधूभिः हस्तिनीस्त्रीभिः (इति नि० सं०)

शरदृतुका बरताव।

सेव्याः शरदि यत्नेन कषायस्वादुतिक्तकाः ॥ क्षीरेक्षुविकृतक्षौद्रशालिमुद्गादिजांगलाः ॥ १३ ॥ सलिलं च प्रसन्नत्वात्सर्वमेव तदा हितम् ॥ सरःस्वाप्लवनं चैव कमलोत्पलशालिषु ॥ प्रदोषे शशिनः पादाश्चंदनं चानुवासनम् ॥ १४ ॥ तिक्तस्य सर्पिषः पानैरसृक्स्रावैश्च युक्तितः॥वर्षासूपचितं पित्तं हरेच्चापि विरेचनैः १५

शरद् ऋतुमें यत्नसे कसेले, मीठे और कडुवे रसोंका सेवन करना चाहिये तथा दूध (खीर), ईखके विकार (खांड, मिश्री), शहद, चावल, मूंग आदि धान्य और जंगली जीवोंका मांस सेवन करे ॥ १३ ॥ और शरदमें सब जल निर्मल होजातेहैं इससे उस समय उन सबका पान करना हित है और जिनमें कमल खिले हों ऐसे तडागोंमें तैरना अच्छा होताहै और सामको चन्द्रमाकी किरण (चांदनी) सेवन करना और चन्दन लगाना श्रेष्ठ है ॥ १४ ॥ और वर्षाके संचित हुए पित्तको तिक्त घृत पीकर अथवा फस्त खुलाकर (शिरामोक्षसे) और विरेचनसे (जुलाब लेकर) निकाल देना चाहिये ॥ १५ ॥

नो पेयं तीक्ष्णमम्लोष्णं क्षारं स्वप्नं दिवातपम् ॥ रात्रिजागरणं चैव मैथुनं चापि वर्जयेत् ॥ १६ ॥ स्वादुशीतजलं मद्यं शुचि स्फटिकनिर्मलम् ॥ शरच्चंद्रांशुनिर्धौतमगस्त्योदयनिर्विषम्॥१७॥ प्रसन्नत्वाच्च सलिलं सर्वमेव तदा हितम् ॥ सचंदनं वा कर्पूरं वासश्चामलिनं लघु ॥ १८ ॥ भजेच्च शारदं माल्यं सीधोः पानं च युक्तितः ॥ पित्तप्रशमनं यच्च तच्च सर्वं समाचरेत् ॥ १९ ॥

तीक्ष्ण, खट्टा, गरम क्षार ये नहीं पीने चाहिये, दिनमें सोना और रातको जागना और मैथुन इन्हें भी त्याग देना चाहिये ॥ १६ ॥ मीठा, ठंढा पानी और निर्मल मद्य पीना उचित है तथा शरद्के चन्द्रमाकी किरणोंसे धोया हुआ और अगस्त्य मुनि (तारे) के उदयसे निर्विष हुआ सुन्दर स्फटिक जैसा निर्मल जल सभी होजाताहै ॥ १७ ॥ जब सभी जलमात्र स्वच्छ होजाताहै तो सभी पीनेमें इन दिनोंमें अच्छा है और चन्दन कपूरसे सुगंधित निर्मल और हलके वस्त्र पहरने योग्य हैं ॥ १८ ॥ और शरद्ऋतुके पुष्प रखना तथा युक्तिसे सीधु नामक

(श्लो० १४) आप्लवनं तरणम् । शशिनः पादा चंद्रस्य किरणाः प्रदोषे सेव्याः न तु सर्वरात्रौ
(श्लो० १८) "सचंदनं वा कर्पूरम्" इत्यत्र 'सचंदनं सकर्पूरम्' इति वा पाठः ।

मद्य पीना तथा और और जो पित्तशामक आहार विहार, हैं वे सब इस ऋतुमें करने उचित हैं ॥ १९ ॥

हेमंत ऋतुका बरताव ।

हेमंतः शीतलो रूक्षो मंदसूर्यानिलाकुलः ॥ ततस्तु शीतमासाद्य वायुस्तत्र प्रकुप्यति ॥ २० ॥ कोष्ठस्थः शीतसंस्पर्शादंतः पिंडीकृतो ऽनिलः ॥ रसमुच्छोषयत्याशु तस्मात्स्निग्धं तदा हितम् ॥ २१ ॥ हेमंते लवणक्षारतिक्ताम्लकटुकोत्कटम् ॥ ससर्पिस्तैलमहिमम-शनं हितमुच्यते ॥ २२ ॥ तीक्ष्णान्यपि च पानानि पिबेदगुरु-भूषितः ॥ तैलाभ्यक्तः सुखोष्णे च वारिकोष्ठेऽवगाहयेत् ॥ २३ ॥ सांगारयामे महति कौशेयास्तरणास्तृते ॥ शयीत शयने वापि वृतो गर्भगृहोदरे ॥ २४ ॥

हेमंत (जाडेकी) ऋतु शीतल और रूक्ष होताहै इसमें सूर्यकी ताप कम होतीहै और वायु अधिक चलाकरताहै इस लिये शीतको प्राप्त होकर इस ऋतुमें वायु कुपित होजाया करताहै ॥ २० ॥ और कोष्ठस्थ होकर शीतके स्पर्शसे भीतर वायु पिंडीसा बँध जाताहै और शीघ्रही रसको शोषण कर लेताहै इससे इस ऋतुमें स्निग्ध भोजन करना हित है (कई "अनिल" के स्थानमें "अनल" पाठ मानतेहैं और उसका यह अर्थ करतेहैं कि कोष्ठस्थ अग्नि शीतस्पर्शसे पिंडीभूत होकर रसको शीघ्र शोषताहै । हेमंतमें लवण, क्षार, कडुवा, खट्टा, चरपरा, तेज रस खाना और घृत तैलसे खूब स्निग्ध करके गरमागरम भोजन करना चाहिये ॥ २१ ॥ ॥ २२ ॥ और तीक्ष्णपान (मद्यादि) पीवे और शरीरपर अगर (या अगरका अतर) लगावे, तैलका मर्दन करे और निवाये पानीसे भरे हुए होजों या बाल-टियोंमें बैठ २ कर स्नान करे ॥ २३ ॥ और ऐसे मकानमें सोवे जहां अंगारोंसे भरी अंगीठी (पाँहियोंदार अँगीठी हो) और स्थान भी विशाल हो जिसके बाहर बरामदे दालान इत्यादि और भी स्थान हों (अर्थात् भीतरके कोठोंमें) पलँगपर रेशमी (या सूती रुई भरे) गदेले बिछाकर रजाई ओढके सोवे ॥ २४ ॥

स्त्रीः श्लिष्ट्वाऽगुरुधूपाढ्याः पीनोरुजघनस्तनीः ॥ प्रकामं च निषे-वेत मैथुनं तर्पितो नृपः ॥ २५ ॥ मधुरं तिक्तकटुकमम्लं लवण-

(श्लो० २४) सांगारयाने अंगारपूर्णशकटिकासहिते । वृतः इति आच्छादितांगः (इति नि० सं०) (श्लो० २५) प्रकामं यथेच्छं मैथुनं निषेवेत । तर्पित इति—वाजीकरणादिभोज्यैस्तर्पितः ।

मेव च॥ अन्नपानं तिलान्माषाञ्छाकानि च दधीनि च॥ २६॥ तथेक्षुविकृतीः शालीन्सुगंधांश्च नवानपि॥ प्रसह्यानूपमांसानि क्रव्यादबिलशायिनाम्॥ २७॥ औदकानां प्लवानां च पादिनां चोपजायते॥ मद्यानि च प्रसन्नानि यच्च किंचिद्बलप्रदम्॥ २८॥ कामतस्तं निषेवेत पुष्टिमिच्छन्हिमागमे॥ एष एव विधिः कार्यः शिशिरे समुदाहृतः॥ २९॥

पुष्ट साथल, नितंब और स्तनोंवाली सुन्दर स्त्रियोंको अगुरुधूप आदिसे सुगंधित करके राजा उनका आलिंगन करे और इच्छापूर्वक वाजीकरणसे तृप्त होके खूब मैथुन करे॥ २५॥ और इस हेमन्तमें मनुष्य मीठे, कडुवे, चरपरे, खट्टे और सलोने अन्न (भोजन) खावे और पान करे तथा तिल, उडद, शाक और दही इन्हे भी खावे॥ २६॥ तथा ईखके विकार (गुड), शाली, चावल जो सुगंधित हों और नये भी हों तथा 'प्रसह्य' अर्थात् हठसे अथवा 'प्रसह' पाठ मानकर प्रसहसंज्ञक कुरर, श्येन आदि पक्षियोंका मांस और जलकिनारेके जीवोंका मांस और मांसाशी तथा बिलवासियोंका मांस भोजन करे॥ २७॥ तथा जलके पक्षियोंका और पैरोंवाले पक्षियोंका मांस भी खावे और निर्मल मद्य पीवे और जो जो बलदायक वस्तु हैं उनका सेवन इच्छापूर्वक करे। पुष्टि चाहनेवाले मनुष्य हेमंत ऋतु (सरदी) में पूर्वोक्त सब विधि करें और यही विधि शिशिर ऋतुमें भी करनी श्रेष्ठ है॥ २८॥ २९॥

वसंत ऋतुका बरताव।

हेमंते निचितः श्लेष्मा शैत्याच्छीतशरीरिणाम्॥ औष्ण्याद्वसंते कुपितः कुरुते च गदान्बहून्॥ ३०॥ ततोम्लमधुरास्निग्धलवणानि गुरूणि च॥ वर्जयेद्व्यमनादीनि कर्माण्यपि च कारयेत्॥३१॥ षष्टिकान्नं यवाञ्छीतान्मुद्गान्नीवारकोद्रवान्॥ लावादिविष्किरसैर्दैर्व्याधूषैश्च युक्तितः॥ ३२॥ पटोलनिंबवार्ताकुतिक्तकैश्च हिमात्यये॥ सेवेन्मध्वासवारिष्टान्सीधुमाध्वीकमासवान्॥ ३३॥ व्यायाममंजनं धूमं तीक्ष्णं च कवलग्रहम्॥ सुखांबुना च सर्वार्थान्सेवेत कुसुमागमे॥ ३४॥

(श्लो० २७) प्रसह्य हठादेव अथवा "प्रसह्य" इत्यत्र 'प्रसह' इति पाठान्तरत्वात्प्रसहसंज्ञकानां श्येनकुररादिपक्षिणां मांसं ग्राह्यम्।

हेमन्तमें शीत शरीरवालोंके शीतके कारण संचित हुआ कफ वसंतमें गरमीसे (गरमी पाकर) कुपित होता है और बहुत रोग पैदा करता है ॥ ३० ॥ इस लिये खट्टे, मीठे, चिकने, नमकीन, भारी पदार्थ त्याग देने चाहिये और वमनादिक (वमन, विरेचनादि) कर्म भी करने उचित हैं ॥ ३१ ॥ और सांठी, चावल, जौ, शीतल अन्न, मूँग, नीवार, कोदों इत्यादिको लवा आदि विष्किर जीवोंके मांसरससे या यूषोंसे युक्तिपूर्वक देवे ॥ ३२ ॥ परवल, नींब, वृंताक और तिक्त पदार्थोंको वसंतमें सेवन करे और मधुके आसव अरिष्टों (मद्यों) को तथा सीधु और माध्वीक मदिराओंको सेवन करे ॥ ३३ ॥ और व्यायाम (डंड कसरत तथा परिश्रम), अंजन, धूमपान और तीक्ष्ण कवलग्रह और निवाये जलसे सब कार्य करे ये सब वसंतऋतुमें सेवन करने योग्य हैं ॥ ३४ ॥

तीक्ष्णरूक्षकटुक्षारकषायं कोष्णमद्रवम् ॥ यवमुद्गमधुप्रायं वसंते भोजनं हितम् ॥ ३५ ॥ व्यायामोत्र नियुद्धाध्वशिलानिर्वातजो हितः ॥ उत्सादनं तथा स्नानं वनिताः काननानि च ॥ ३६ ॥ सेवेत निर्हरेच्चापि हेमंतोपचितं कफम् ॥ शिरोविरेकवमननिरूहकवलादिभिः ॥ वर्जयेन्मधुरास्निग्धदिवास्वप्नगुरुद्रवान् ॥ ३७ ॥

वसंतमें तीक्ष्ण (चरपरे), रूखे, कटुक, खारे, कसेले और निवाये जो विशेष पतले न हों, जिनमें जौ, मूँग, शहद इत्यादि प्रायः मिले हों या इनसे बने हों ऐसे भोजन करने हितकारक होते हैं ॥ ३५ ॥ और इस ऋतुमें व्यायाम, नियुद्ध (कुस्ती), मार्ग चलना, पत्थर (या गोले) फेंकना इत्यादिकी कसरत करे और उबटन लगाना, स्नान करना, स्त्रियोंका संग और वनविहार इन सबका सेवन करे ॥ ३६ ॥ और हेमंतमें संचित हुआ कफ शिरोविरेचन (नस्यों) से, वमन, (विरेचन), निरूहण और कवलधारण आदिसे दूर करे और मीठे, चिकने पदार्थको, भारी (गरिष्ठ) और पतले भोजनोंको तथा दिनके सोनेको त्याग देवे ॥ ३७ ॥

ग्रीष्म ऋतुका बरताव।

व्यायाममुष्णं त्यासं मैथुनं चातिशोषि च ॥ रसांश्चाग्नेर्गुणोद्रिक्तान्निदाघे परिवर्जयेत् ॥ ३८ ॥ सरांसि सरितो वापीर्वनानि रुचिराणि च ॥ चंदनानि परार्ध्यानि स्रजः सकमलोत्पलाः ॥ ३९ ॥

(श्लो० ३६) उत्सादनादीनि सेवेत इत्यन्वयः (श्लो० ३९) परार्ध्यानि श्रेष्ठानि परार्ध्यं श्रेष्ठम् (इति श० स्तो०) अन्ये परार्ध्यानि सुगंधियुतानि चाऽऽहुः ।

तालवृंतानिलाहारांस्तथा शीतगृहाणि च ॥ धर्मकाले निषेवेत वासांसि सुलघूनि च ॥ ४० ॥

निदाघ अर्थात् ग्रीष्मऋतु (गरमी) में व्यायाम (डंड कसरत), उष्ण पदार्थ (या गरम स्थान), परिश्रम (मेहनत), मैथुन और अति शोषण पदार्थ (जो खुश्की करे) तथा अग्नि गुणवाले अर्थात् उष्ण प्रकृतिवाले रस (चरपरे, खारे, खट्टे) त्यागने चाहिये ॥ ३८ ॥ और तालाब, नदी, बावडी अथवा रुचिर वन सेवन करने, उत्तमोत्तम चन्दन लगाना, कमल, कमोदनी आदिकी माला पहरना॥ ॥ ३९ ॥ ताडके पंखोंकी हवा, हार और ठंढे मकान और उजले, हलके, बारीक कपडे ये सब गरमीमें सेवन करने चाहिये ॥ ४० ॥

शर्कराखंडदिग्धानि सुगंधीनि हिमानि च ॥ पानकानि च सेवेत मंथांश्चापि सशर्करान् ॥ ४१ ॥ भोजनं चैव हितं शीतं सघृतं मधुरद्रवम् ॥ शृतेन पयसा रात्रौ शर्करामधुरेण च ॥ ४२ ॥ प्रत्यग्रकुसुमाकीर्णे शयने हर्म्यसंस्थिते ॥ शयीत चंदनार्द्रांगः स्पृश्यमानोऽनिलैः सुखैः ॥ ४३ ॥

खांड (या ओले) डालकर और कतक, केवडा, इलायची आदि सुगंधित मिलाके पानक (पीनेका सरबत बनाकर पिया करे या मन्थोंमें खांड मिलाके पीवे) ॥ ४१ ॥ और घृत सहित मीठे, पतले, ठंढे भोजन और रातको औटाया हुआ दूध ठंढाकर खांड मिलाके पीवे ॥ ४२ ॥ और नये २ पुष्पोंसहित शय्या (पलंग) मकानोंके ऊपर बिछाकर शरीरपर चन्दन लगाकर और सुहाती हुई पवनका स्पर्श करते हुए शयन करे ॥ ४३ ॥

प्रावृट् ऋतुका बरताव ।

तापात्यये हिता नित्यं रसा ये गुरवस्त्रयः ॥ पयोमांसरसाः कोष्णास्तैलानि च घृतानि च ॥ बृंहणं चापि यत्किंचिदभिष्यंदि तथैव च ॥ ४४ ॥ निदाघोपचितं चैव वै प्रकुप्यंतं समीरणम् ॥ निहन्यादनिलघ्नेन विधिना विधिकोविदः ॥ ४५ ॥ नदीजलं रूक्षमुष्णमुदमंथं तथाऽतपम् ॥ व्यायामं च दिवास्वप्नं व्यवायं चात्र वर्जयेत् ॥ ४६ ॥

(श्लो० ४०) तालवृंतानिलाहारान् । तालपत्रव्यजनपवनं हारांश्च ।

ग्रीष्मके पीछे (प्रावृट् ऋतुमें) तीन जो भारी रस हैं (मधुर, अम्ल और लवण) वे नित्य सेवन करने हित हैं तथा निवाया दूध और मांसरस तथा तैल और घृत ये भी हित हैं इनके सिवाय जो वस्तु बृंहण और अभिष्यंदी हैं वे भी श्रेष्ठ हैं ॥ ४४ ॥ तथा ग्रीष्मके संचित हुए और प्रकुपित होनेवाले वायुकी वायु नाशक द्रव्योंसे विधिमें चतुर वैद्य शांत करे ॥ ४५ ॥ और नदीका पानी, रूक्ष-तथा गरम वस्तु, उदमंथ (छांछ), धूप, परिश्रम, दिनका सोना और मैथुन करना ये सब इस ऋतुमें त्याग देवे ॥ ४६ ॥

यवषष्टिकगोधूमाञ्छालींश्चाप्यनवांस्तथा ॥ हर्म्यमध्ये निवाते च भजेच्छय्यां मृदूत्तराम् ॥ ४७ ॥ सविषप्राणिविण्मूत्रलालानिष्ठीवनादिभिः ॥ समाप्लुतं तदा तोयमांतरिक्षं विषोपमम् ॥ ४८ ॥ वायुना विषदुष्टेन प्रावृष्येण विदूषितम् ॥ तद्धि सर्वोपयोगेषु तस्मिन्काले विवर्जयेत् ॥ ४९ ॥ निरूहैर्वस्तिभिश्चान्यैस्तथाऽन्यैर्मारुताग्रहैः ॥ कुपितं शमयेद्वायुं वार्षिकं वाऽचरेद्विधिम् ॥५०॥

इस प्रावृट् ऋतुमें जौ, साठी, चावल, गेहूँ और पुराने शाली चावल खाने चाहिये और जिसमें तीव्र वायु न हो ऐसे स्थानमें कोमल शय्यापर मुलायम बिछोना बिछाकर सोवे ॥ ४७ ॥ और इस ऋतुमें वर्षाका जल अथवा वर्षणानन्तर नदी आदिमें प्राप्तहुआ पानी कदापि नहीं पीना चाहिये क्योंकि वह विषयुक्त जीवोंके विष्ठा, मूत्र, लार, थूँक आदिसे मिश्रित होताहै इस लिये उसे विषके समान समझिये ॥ ४८ ॥ और विषदूषित प्रावृट्की वायुसे भी वह जल दूषित होताहै इस लिये इस समयमें उसे सब कामसे त्यागना चाहिये (उस जलको पीना भी उचित नहीं, उसमें न्हाना भी योग्य नहीं इत्यादि) ॥ ४९ ॥ और निरूहण वस्तियोंसे अथवा अन्य वस्तियोंसे तथा और वायुनाशक यत्नोंसे इस समय कुपित हुए वायुको शांत करना चाहिये अथवा वर्षामें जो विधि कहीहैं वे भी जो उचित हों सो करनी चाहिये ॥ ५० ॥

ऋतावृतौ य एतेन विधिना वर्तते नरः ॥
घोरानृतुकृतान्रोगान्नाप्नोति स कदाचन ॥ ५१ ॥

(श्लो० ४८) आंतरिक्षं वर्षाभवं तत्तु मेघो वर्षति । अथवा वर्षणानंतरं नद्यादिषु समायातं सर्वमेव त्याज्यम् ।

जो मनुष्य ऋतु ऋतुमें पूर्व कही हुई विधिके अनुसार आहार, विहारादि करते हैं उनके ऋतुसम्बन्धी भयंकर रोग कदापि नहीं होते हैं ॥ ५१ ॥

भोजनके बारह भेद ।

अत ऊर्द्ध द्वादशाशनप्रविभागान्वक्ष्यामः ।
तत्र शीतोष्णस्निग्धरूक्षद्रवशुष्कैककालिकद्विकालिकौषधयुक्तमात्राहीनदोषप्रशमनवृत्त्यर्थाः ॥ ५२ ॥

यहांसे अगाडी अब हम भोजनके बारह भेदोंका वर्णन करतेहैं । यहांपर वे बारह भेद ये हैं कि शीत, उष्ण, स्निग्ध, रूक्ष, द्रव, शुष्क, एककाल, द्विकाल, औषधयुक्त, मात्राहीन, दोषशमन और वृत्त्यर्थ (देहधारणार्थ) ॥ ५२ ॥

शीत और उष्ण अन्नका उपयोग ।

तृष्णोष्णमददाहार्तान्रक्तपित्तविषातुरान् ॥ मूर्च्छार्त्तान्स्त्रीषु च क्षीणाञ्छीतैरन्नैरुपाचरेत् ॥ ५३ ॥ कफवातामयाविष्टान्विरिक्तान्स्नेहपायिनः ॥ प्रक्लिन्नदेहांश्च नरानुष्णैरन्नैरुपाचरेत् ॥ ५४ ॥

जो मनुष्य तृषा, गरमी, मद, दाह इनसे पीडित हों, रक्तपित्तके रोगी अथवा विषसे पीडित हों, जिन्हे मूर्च्छा आया करती हो, जो स्त्रीसंगसे क्षीण होगये हों उन मनुष्योंको शीतल भोजन (खान पान) देना उचित होताहै ॥ ५३ ॥ और जो कफवायुके रोगी हों या विरेचन लिये हों, स्नेहपान किये हों, जिनके देह क्लेदित (गीलीसे) रहते हों उन मनुष्योंको गरम खान पान देना चाहिये ॥ ५४॥

स्निग्ध और रूक्षका उपयोग ।

वातिकान्रूक्षदेहांश्च व्यायामोपहतांस्तथा ॥ व्यायामिनश्चापि नरान्स्निग्धैरन्नैरुपाचरेत् ॥ ५५ ॥ मेदसाभिपरीतांस्तु स्थूलान्मेहातुरानपि ॥ कफाभिपन्नदेहांश्च रूक्षैरन्नैरुपाचरेत् ॥ ५६ ॥

वातप्रधान (वातप्रकृति) तथा वायुके रोगी और रूक्ष देहवाले तथा जो परिश्रमसे थके हों या परिश्रम करते हों उन्हें स्निग्ध खान पान देवे (व्यायामोपहत" के स्थानमें कई 'व्यवायोपहत' ऐसा पाठ मानतेहैं और मैथुनसे क्षीण ऐसा अर्थ करते हैं) ॥ ५५ ॥ और जो मेदसे व्याप्त हों (स्थूल हों), प्रमेहसे पीडित हों, कफसे व्याप्त देहवाले हों उन्हें रूक्ष भोजन देवे ॥ ५६ ॥

